
GAEKWAD'S ORIENTAL SERIES.

Published under the Authority of the Government of His Highness the Maharaja Gaekwad of Baroda.

GENERAL EDITOR:

B. BHATTACHARYYA, M. A., Ph. D.,

Rajaratna.



No. LXXVI.

पत्तनस्थप्राच्यजैनभाण्डागारीयग्रन्थसूची ।

[ताडपत्रीयविविधग्रन्थपरिचयात्मकः प्रथमो भागः]

A DESCRIPTIVE CATALOGUE OF MANUSCRIPTS

In the Jain Bhandars at Pattan

Compiled from the Notes

OF

THE LATE MR. C. D. DALAL

WITH INTRODUCTION, INDICES AND APPENDICES

BY

LALCHANDRA BHAGAWANDAS GANDHI,

JAIN PANDIT, ORIENTAL INSTITUTE, BARODA.

IN TWO VOLUMES

Vol. I

Palm-leaf MSS.

BARODA

ORIENTAL INSTITUTE

1937

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press,
26-28, Kolbhat Street, Bombay.


Published by Benoytosh Bhattacharyya, Director, Oriental Institute on behalf
of the Government of His Highness the Maharaja Gaekwad of Baroda,
at the Oriental Institute, Baroda.

Price Rs. 8-0-0.

वि. सं. ११९१ वर्षे सिद्धराजराज्ये लिखिता प्रा. पुप्फवतीकथा ताडपत्रीया प्रतिः [१८२-३ पत्रे सूचिता]

प्रतिकृतिः (२)







(१-२) वि. सं. १२९४ वर्षे लिखिता श्रीहेमचन्द्राचार्य-कुमारपालभूपालचित्राङ्किता ताडपत्रीया प्रतिः [२०६ पत्रे सूचिता]

(३) वि. सं. १३३६ वर्षे सारङ्गदेवराज्ये लिखिता चित्राङ्किता ताडपत्रीया प्रतिः [३८७ पत्रे सूचिता]

अनुक्रमः ।

प्रास्ताविकम्

प्राचीनग्रन्थरत्नगवेषिणोऽवगाहितवाङ्मयाः प्राच्यविद्या–कलोत्कर्षबद्धकक्षा भारतीयेतिवृत्त–पुरातत्त्वान्वेषिणो भारतीसमुपासकाः !

प्रमोदप्रकर्षं प्राप्नुवन्तु प्रतिभावन्तो भवन्तोऽद्य, प्रबलप्रताप**चा**पोत्कट**वन**राजप्रतिष्ठितायां **चौ**लुक्यादिराजवंशीयैश्चिरपरिपालितायां सुप्रसिद्ध**हे**मचन्द्राचार्यादिभिरनेकैः सूरिपुङ्गवैर्वर्णितायां पावितायां च कालक्रमेण परचक्राक्रमणादिना परिपीडितायां विलुप्तविशिष्टवैभवायामप्यद्याप्यवशिष्टसंरक्षितवाङ्मयवैभवगौरवितायां साम्प्रतं षष्टिवर्षीयसुराज्यहीरकमहोत्सवसमुपार्जितकीर्तेः 'श्रीमन्त सरकार **सयाजीराव गायकवाड**' महोदयस्य प्रशस्तराज्यान्तर्गतायां '**अ**णहिलवाड **प**त्तन' इति प्रख्यया प्रख्यातायां प्राचीनायां **गू**र्जरराजधान्यां विद्यमानानां जैनसङ्घलेखित–सङ्गृहीत–सुरक्षितानां ताडपत्रादिपुस्तिकापरिकलित–भारतीयप्राच्यगौरवप्रदर्शक–विविधज्ञानप्रद–दुर्लभोपयुक्तानल्पग्रन्थरत्नभाण्डागाराणां रहस्यप्रकाशिकया प्रारम्भ–प्रान्त–प्रशस्त्यादि–प्रमाणोपेतयाऽनया विशिष्टया सूच्या ।

गतशताब्द्यां भाण्डागार–निरीक्षकाः

येषां ग्रन्थभाण्डागाराणां निरीक्षणार्थं सूक्ष्मपरिचयपूर्वकं रहस्यविज्ञानार्थं ग्रन्थरत्नादिग्रहणार्थं च व्यतीतायां शताब्द्यां राज्याधिष्ठातृप्रेरित–प्रोत्साहितैरितरैरपि च परदेशीयैरेतद्देशीयैश्चानेकैर्जिज्ञासुविज्ञैर्न नाम सर्वथा निष्फला नैके प्रयत्ना व्यधीयन्त ।

राजस्थानेतिवृत्तलेखनेन सुप्रसिद्धः कर्नल **टॉ**ड महाशयः प्राग् इ. सन् १८२९ (?) वर्षे जैनयति**ज्ञान**चन्द्रादिसाहाय्येन विलोक्यैतेषां मध्यात् कतिपयभाण्डागारान्, सम्प्राप्य च कतिचनैतिहासिकोपयुक्तान् ग्रन्थान् तन्महत्त्वं प्रकाश्य विचक्षणान् तदभिमुखीकृतवान् ।

तदनु '**रा**समाला' संज्ञक–**गू**र्जरेतिहाससङ्कलनया प्रख्यातः एलेक्झांडर किन्लोक **फॉ**र्बसमहाशयः **पू**र्णिमापक्ष–**सा**गरगच्छीयोपाश्रयाधिकारिणः श्रीपूज्यान् प्रसन्नीकृत्य तदधीनपुस्तकसङ्ग्रहतोऽधिगतवान् इ. सन् १८५०–५१ वत्सरे इत एवोपयुक्तां **द्व्या**श्रयमहाकाव्यादिकामैतिह्यसाधनसामग्रीम् ।

इ. सन् १८७३(४)–७५ वर्षद्वये **ब्रि**टीशसरकारप्रेरित–प्रोत्साहितः डॉ. जी. **बु**ह्लरनामधेयो विचक्षणो राजकीयप्राचीनपुस्तकसंशोधनतत्प्रयोजनया व्यलोकयद् वारद्वयं

फो. भाण्डागारम् । कृतप्रयत्नोऽपि नापारयत् **स**ङ्घवीपाटक-भाण्डागारे प्रवेष्टुम् । प्रयाणानन्तरं च प्राप्तानुमत्याऽन्यशास्त्रिद्वाराऽकारयत् तदीयं सूचिपत्रकमुपलब्धवांश्च प्राचीनां संक्षिप्तां सूचीम् । दुर्लभानां केषांचिद् ग्रन्थानां प्रतिकृतिं कारयामास । एतद्विषयकं रिपोर्टरूपं निजनिवेदनं प्राकाशयत् ।

इ. सन् १८८०–८१ वर्षे '**बो**म्बे गवर्नमेन्ट'कृते डॉ. **की**ल्हॉर्नतन्त्रेण क्रीतानि **पुण्य**पत्तने(**पू**ना) **डे**क्कनकॉलेज(भां. रि. इ.) सङ्ग्रहे स्थापितानि पञ्चसप्ततिप्रमितानि ताडपत्रीयपुस्तकानीतः **पत्त**नात् **मकामो**दीसत्कभाण्डागारादेव तत्र गतानीति प्रसिद्धिः ।

इ. सन् १८८३ वर्षे **मुं**बईसरकारप्रेरितो डॉ. रा. गो. **भां**डारकरः प्रो. आ. वि. **का**थवटे इत्यनेन सह **पत्त**नमगमत् । अचिरं तत्र स्थित्वा कतिपयपुस्तकसङ्ग्रहानवलोक्य प्राप्तां शुद्धाशुद्धां ग्रन्थनामसूचीं च इ. सन् १८८३–८४ वर्षीये निवेदने न्यदर्शयत् । यत् १८८७ वर्षे प्रासिद्ध्यत ।

इ. सन् १८९२ वर्षे श्रीमन्नृपवर्य–**गाय**कवाडेत्युपाख्य–**स**याजीत्याह्वयमहाराजानां स्वयंकृतनिदेशेन प्रो. **म**णिलाल न. द्विवेदी ददर्श तत्र दश जैनभाण्डागारान्, सङ्ग्रहद्वयं चान्यत् । तद्विषयकं तन्निवेदनं प्रसिद्धजैनपुस्तकमन्दिरस्थहस्तलिखितग्रन्थानां क्रमप्रदर्शकपत्रमिति नाम्ना १८९६ वर्षे **ब**डोदा–राजकीयमुद्रालये प्रसिद्धिमधिजगाम ।

इ. सन् १८९३ वर्षे पुनः **मुं**बईसरकारप्रेरितः प्रो. पी. **पि**टर्सनमहाशयः **पत्तनं** प्राप । तत्र च **फो.** स्थानस्थां प्राग् वस्त्रमञ्जूषेति परिचाय्यमानां प्राचीनताडपत्रीयपुस्तिकामञ्जूषां प्रेक्ष्य प्रामोदत । पञ्चसप्ततिपरिमितपुस्तिकासु वर्तमानानां ग्रन्थानां शतद्वयस्य प्रारम्भ-प्रान्तांशप्रदर्शनपूर्वकं परिचयस्तेनाकारि इ. सन् १८९२–९५ वर्षीये १८९६ वर्षे तन्नाम्ना प्रसिद्धे पञ्चमे 'रिपोर्ट' नामके पुस्तके ।

तदनन्तरं '**मुं**बई' स्थानस्थया **जै**नश्वे. कॉ. संज्ञकसंस्थया **पत्त**नेऽन्यत्र स्थितानां च जैनपुस्तकभाण्डागाराणां प्रा. मं. जैनग्रन्थानां नामादिनिर्देशवती **जै**नग्रन्थावली प्रयत्नेन विरचय्य इ. सन् १९०९ वर्षे प्राकाशि ।

एवं राजकीयैरितरैश्च स्वदेश्यैः परदेशीयैरपि विहितेष्वपि विविधप्रयत्नेषु अंशत उपयुक्तेष्वपि न नामापेक्षितकर्तव्यस्य परिपूर्णता साफल्यमथ च तादृगुपयुक्तत्वमित्यासीत् खल्वपेक्षा तादृशस्य सुप्रयत्नस्य । यः प्रामाणिकांशप्रोद्धरणेन विश्वसनीयतामापादयेत् सन्तोषं च जनयेत् । अप्रसिद्धग्रन्थानां प्रारम्भ–प्रान्तादिप्रदर्शनेन ग्रन्थानां ग्रन्थकर्तॄणां च सविस्तरं विश्वास्यं परिचयं सम्पादयेत् । ग्रन्थकृत्प्रशस्त्या ग्रन्थलेखन-दान–सङ्ग्रहकर्तॄणां प्रशस्त्युल्लेखादिनिर्देशेन च तत्कालीनस्थल–राजानुराग–राज्याधिकारि–जैन–जैनेतर–विद्वद्वैदुष्य–विद्याप्रेम–श्रीमत्ता–धर्मप्रियता–श्रमणगच्छ–कुलादिपरिस्थितिविषयकं विविधमैतिह्यमपि प्रकाशयेत् । जीर्ण–शीर्ण–गत–लुप्तावशिष्टानां प्रसिद्धाप्रसिद्धानामुपयुक्तग्रन्था-

नामान्तररहस्यं च सप्रमाणं प्रोद्घाटयेत्। सम्यगवधार्य तदर्थं सत्कृत्यपरायणैर्विद्यानुरागतो विश्वविख्यातैः 'श्रीमंत सरकार महोदय **सयाजीराव गायकवाड**'महाराजैः ता. १५-९-१४ वर्षे **दलाले**त्युपाख्यो जैनविद्वान् **ची**मनलालः समाज्ञापित आसीत्।

यशःशेष एष महाशयो गत्वा **पत्तनं** चिरं स्थित्वा च तत्र प्राचीनपुस्तकसंरक्षण-संग्रह–संशोधनादावसाधारणोद्यमिनां प्रवर्तक**का**न्तिविजयादिजैनयमिनां सुसाहाय्येन प्रायशः सर्वानपि तत्रत्यान् जैनपुस्तकभाण्डागारान् प्रैक्षिष्ट। तेन तद्विषयकमाङ्ग्लभाषागतं ता. १७–४–१९१५ वर्षे विहितं निवेदनमनन्तरप्रकाशितग्रन्थप्रदर्शनपुरस्सरमितः परमत्रोपस्थाप्यते। तदानीमेव श्रीमतः **सयाजीराव**महाराजस्य शुभाज्ञया प्रादुर्भूतायां प्रतिष्ठितायां च **गा**यकवाडप्राच्यग्रन्थमालायां तत्तदप्रसिद्धोपयोगिदुर्लभग्रन्थानां सम्पादनादौ दत्तचित्तेन स्व. **द**लालेन स्वयं सङ्कलिताया अपि विशिष्टाया अस्याः सूच्या जीवनसमाप्तिं यावत् मुद्रायन्त्रयोग्या प्रतिकृतिः (प्रेसकॉपी) न कृता कारिता वाऽऽसीत्। अथ च **जे**सलमेरुदुर्गभाण्डागारीयग्रन्थसूच्या इवास्या अपि सम्पादनकर्म विधिवशादस्मासु समापतितम्। प्रस्तुतकार्यसौष्ठवार्थं सन्देहाद्यपाकरणार्थं च तत्तद्भाण्डागाराणां साक्षाद् दर्शनं समुचितं विचार्य राज्यविद्याधिकारिणो निदेशेन इ. सन् १९२६ वर्षेऽहमपि **पत्तन**मगच्छम्, मासं यावच्च तत्र स्थित्वा स्वयमवलोक्य तत्तत्पुस्तिका **द**लालसङ्कलिते सूचिपत्रे यावदावश्यकं वैशद्यं व्यधाम्। विशेषतोऽवतारितमुपयोगि नूतनमावश्यकमवतरणादि तु द्वितीयभागे प्रसिद्धिमधिगच्छेद् यतोऽयं प्रथमो भागः षट्शतीपरिमितानां प्रायशस्ताडपत्रीयपुस्तिकानां ग्रन्थानामष्टशत्याः प्रतीनां तु सपादसहस्रद्वयस्य परिचयार्थमेव परिकल्पित इत्यत एव च तादृशानां भाण्डागाराणामेवात्र परिचयः कार्यते।

पुनरपि **यू**रोपस्थैरपि श्रीमद्भिः **सयाजीराव**महाराजैः प्रेरिता राज्यविद्याधिकारिणः **प्रा**च्यविद्यामन्दिराध्यक्षादयश्च जैनपुस्तकभाण्डागारान् विलोकितुं इ. सन् १९३३ वर्षप्रारम्भे **पत्तनं** गतवन्तः। यैः साकमस्माकमपि योजनमभूत्। दिनद्वयेन तदानीन्तनस्थितिपरिज्ञानं व्यधायि।

भाण्डागार–परिचयः।

१ सङ्घवीपाटकभाण्डागारः। 'संघवी पाडा' संज्ञकस्थानस्थितोऽयं भाण्डागारश्चिरमसूर्यम्पश्य इवासीत्। प्राचीनानामप्रसिद्धानामत्युपयोगिनां ताडपत्रमयानां पुस्तकरत्नानां प्राधान्येनापूर्वोऽयं सङ्ग्रहः। वि. सं. १९१४ वर्षेऽत्र स्थितानां ४३४ ताडपत्रीयपुस्तिकानां नामनिर्देशवती प्रायोऽशुद्धा एका सूचिका **ऋ**द्धिसागरेण निर्मिताऽभवत्। डॉ. जी. **बुह्ल**रमहाशय इमं भाण्डागारमवलोकयितुं कृतप्रयत्नोऽपि न सफलतां प्राप; तथापि तां सूचीमुपलब्धवान्, **सू**र्यपुरीय**ना**रायणशास्त्रिणं प्रेर्यान्यां सूचीं च कारितवान्। सा चाशुद्धाऽऽसीदिति डॉ. **कील्हॉर्न** इत्यनेन निजे रिपोर्टपुस्तके निरदेशि। **प्रो. पी.**

पिटर्सनमहाशयोऽप्यस्य भाण्डागारस्य प्रेक्षणे कृतप्रयासोऽप्यपूर्णाश एव बभूव । तथा च प्रो. **म**णिलाल न. **द्वि**वेदी इत एव राज्याद् गतोऽपि निष्फलप्रयत्नोऽजनि महतोऽस्य भाण्डागारस्य निरीक्षणे । तेन निवेदितमेतद्विषये निजानुभूतं विलक्षणमनुमानं चोद्ध्रियते तन्निवेदनात्—

"**सं**घवीनो पाडो ए नामनो एक भंडार हुं जोइ शक्यो नथी; केमके ते भंडारनी कूंची कोई श्रीपूज्य पासे हती ने ते श्रीपूज्य क्यां छे एनी बातमी मळी शकी नहि. रावबहादुर **र**घुनाथरावे ते उघडाववा तजवीज करी पण संघवाळा एम कहेवा लाग्या के ए भंडारनुं ताळुं ते श्रीपूज्यनुं छे; ते कांइ गया आव्यानुं कहे तो जवाबदारी कोने माथे रहेशे; एटले ए भंडार उघडाववानो विचार बंध राख्यो हतो.

अद्यापि सुधी ते भंडार उघडे तो उघडाववानो प्रयास जारी छे; परंतु जे भंडारो में तपास्या ते उपरथी मारी खातरी थइ छे के, **ए भंडारमां कशुं नवुं होवुं जोइए नहि.** केमके **फो**फळीआवाडाना त्रण भंडार तथा **वा**डी पार्श्वनाथ अने **भा**भानो पाडो वगेरे जोतां पुस्तकोनो महोटो भाग सेंकडे ९० टका जेटलो तेनो ते ज होय छे, एम जणायुं छे. वळी **संघवीना पाडामां एकलां ताडपत्रो ज छे,** कागळे लखेलां पुस्तक नथी; अने मारी पूर्ण खातरी छे के **जेटलां ताडपत्र छे ते सर्वनी कागळ उपर नकलो थयेली छे,** एटले पण **आ भंडारमां कांइ नवुं होवानो संभव नथी.** × × **सं**घवीनो पाडो न जोयो तेनुं नाम मारी यादीमां नथी."

स्व. **द्वि**वेदिनोपरि निदर्शितमनुमानं न सम्यगासीदिति ज्ञास्यतेऽस्या विशिष्टायाः सूच्या विलोकनेन । मुख्यभाण्डागारस्यास्य प्राक् सूचिताभ्यः ४३४ पुस्तिकाभ्यः कतिचिदन्यत्र **सू**र्यपुरादौ हृता गता वा श्रूयन्ते इत्यत्र ४१२ पुस्तिकानां परिचयः कारितः । अस्य भाण्डागारस्य कार्यवाहक इदानीं जैनसङ्घस्थः श्रेष्ठी '**प**न्नालाल छोटालाल पटवा' इत्यस्य वंशजः ।

२ खेतरवसी—एतन्नामकस्थानस्थितः ७६ ता. पुस्तिकासमृद्धोऽयं भाण्डागारः । **गा.** प्राच्यग्रन्थमालायां प्रसिद्धं रूपकषट्कमेतद्भाण्डागारीयादर्शाधारेण । अस्य व्यवस्थापकः 'श्रेष्ठी गभरुचंद वस्ताचंद' अचिराद् दिवं गत इत्यन्ये निर्वहन्ति तदीयं कार्यभारम् ।

३ सङ्घ-भाण्डागारः—'**फो**फळीआ वाडा, **व**खतजी शेरी' संज्ञकस्थानस्थोऽयं महान् भाण्डागारः । प्रो. पी. **पि**टर्सनमहाशयेनात्रत्यानां ७६ ताडपत्रीयपुस्तिकानां (प्रायः शतद्वयाधिकप्रतीनां) परिचयः स्वकीये पञ्चमरिपोर्टपुस्तकेऽकारीति प्रायोऽवशिष्टानां तत्र परिचायितानामप्यत्युपयोगिनीनां च कियतीनां संमील्य ७० ता. पुस्तिकानामुल्लेखः स्व. **द**लालेनात्र व्यधायि । अत्र १३७ ता. पुस्तिकाः सन्ति, ताश्च सह मेलनेन न्यून-

सङ्ख्याकाः कृता ज्ञायन्ते। एका च पुस्तिका विशिष्टे स्थूलवस्त्र एव सं. १४१८ वर्षे लिखिताऽत्रोपलभ्यते। अस्य व्यवस्थापिका जैनसङ्घसंस्था 'शेठ **धर**मचंद **अ**भेचंद (पेढी)' इति नाम्ना व्यवह्रियते।

४ तपागच्छ-भाण्डागारः—'फोफलीआ वाडा, **आ**गली शेरी' इति स्थानस्थिते-ऽस्मिन् २२ ता. पुस्तिकानां सङ्ग्रहः। जैनसङ्घसत्कः 'शेठ **मूल**चंद **दो**लाचंद' इत्यस्य व्यवस्थापक इदानीम्।

५ महालक्ष्मीपाटक-भाण्डागारः—महालक्ष्मीपाटके जैनोपाश्रये स्थितस्य ताड-पत्रपुस्तिकाऽष्टकान्वितस्यास्य लघुसङ्ग्रहस्य व्यवस्थां जैनसङ्घीयः श्रेष्ठी '**चु**नीलाल **घे**लाचंद' इति करोति।

६ वाडीपार्श्वनाथ-भाण्डागारः—वि. सं. १६५२ वर्षे बृहत्**ख**रतरगच्छीय**जि**-नचन्द्रसूरिसदुपदेशेन प्राक् प्रतिष्ठितस्य **वा**डीपार्श्वनाथ-विधिचैत्यस्यैकस्मिन् प्रदेशे स्थापितोऽयं भाण्डागारः। यस्य चैत्यस्य प्रशस्ति-शिलालेखः '**ए**पिग्राफिआ इंडिका' [वॉ. १, पृ. ३२३] पुस्तकेऽत्रापि च परिशिष्टे प्रकाशितः। अत्र ताडपत्रीयं पुस्तक-चतुष्टयमेव प्रेक्ष्यते। **गा.** प्राच्यग्रन्थमालायां प्रकाशिताः **त**त्त्वसङ्ग्रह-हम्मीरमदमर्दनादयो ग्रन्था अस्य सङ्ग्रहस्यादर्शाधारेण। अस्य समुत्साही व्यवस्थापको जैनश्रेष्ठी '**वा**डीलाल **ही**राचंद' अचिरात् परलोकं प्रयातः।

७ मोदी-भाण्डागारः—'**म**का मोदी' नाम्ना प्रख्यातोऽयं भाण्डागारः। इ. सन् १८८०-८१ वर्षे डॉ. **की**ल्हॉर्नमहाशयेन '**मुं**बईसरकार'कृते याः ७५ परिमिताः ताडपत्रीयपुस्तिकाः क्रीता याश्च **पु**ण्यपत्तने(पूना) **डे**क्कन-कॉलेजसङ्ग्रहे (भां. रि. इन्स्टिट्यूटमध्ये) स्थापितास्ता इत एव तत्र गताः। १८९३ वर्षे चैनं दिदृक्षु**र्द्वि**वेदी सखेदं निवेदयति स्म-'**म**का मोदीनुं नाम डॉ. **भां**डारकरे आप्युं छे पण ते माणसे भंडार वळी गयानुं कही कशुं बताव्युं नथी.' एवमवशिष्टस्य ता. पुस्तिकाद्वयस्य सूचनमत्र विहितम्। साम्प्रतमयं सङ्ग्रहः **त**पागच्छीय**सा**गरशाखायाः **सा**गरसंज्ञके उपाश्रये वर्तते। '**हे**मचन्द्राचार्य जैनसभा' नामधेया संस्थाऽस्य संरक्षणादिव्यवस्थां करोति।

८ अदुवसीपाटक-भाण्डागारः—'अदुवसी पाडा' नामकस्थानस्थितेऽस्मिन् सङ्ग्रहे ता. पुस्तकद्वयमेव।

उपरि सूचितेषु तदितरेषु च **प**त्तनीयेषु पुस्तकभाण्डागारेषु स्थितानां कागदपत्रात्मकानां लिखितानामुपयोगिनां ग्रन्थानां प्रारम्भ-प्रान्तादि-प्रशस्ति-परिचय-वक्तव्याद्युल्लेखो द्वितीये भागे विधास्यते। ग्रन्थविस्तरभयात्, **जे.** भां. सूच्यादावस्माभिः केषांचित् परिचायितत्वाच्चात्र सूचितेष्वपि केवलमप्रसिद्धानां ग्रन्थानां विषयविभागेन नामादि-निर्देशं कृत्वा, **बृ**हट्टिपनिकायां नाम प्राचीनायां ग्रन्थसूच्यां च येषामुल्लेखः समवाप्यते तेषां समन्वयं च प्रदर्श्यैव सन्तुष्यते।

सं. प्राकृतापभ्रंशादिभाषासु विविधविषयेऽप्रसिद्धा ग्रन्थाः ।

व्याकरणे ।

[१]कातन्त्र–वृत्ति–पञ्जिका । त्रिलोचनदासः ।
——————— उद्द्योतः । त्रिविक्रमः । [ले. सं. १२२१
[२]कातन्त्रोत्तरम् । विजयानन्दः । [ले. सं. १२०८(?)
[३]सिद्धहेम–शब्दानुशासन–लघुवृत्त्यवचूरिः पं. धनचन्द्रः ।
[४]प्राकृतप्रबोधः । पं. नरचन्द्रः ।
[५]मलयगिरि–शब्दानुशासनम् । मलयगिरिः ।
शब्दब्रह्मोल्लासः (?) उदयप्रभः ।
उक्ति–व्यक्तिः । दामोदरः
————— विवृतिः ।

भाषायाम् ।

आहारविशुद्धिः (प्रा. गू.)
कलानिधिः (मराठी) वैजनाथः ।

काव्ये ।

[६]तिलकमञ्जरीकथा–टिप्पनम् । शान्तिसूरिः ।
[७]विक्रमाङ्काभ्युदयम् । सोमेश्वरः (भूलोकमल्लः)
[८]शिशुपालवध–टीका (सन्देहविषौषधिः) वल्लभदेवः ।

नाटके ।

[९]रघुविलासनाटकम् । रामचन्द्रसूरिः ।
[१०]अनर्घराघवनाटक–टिप्पनम् (रहस्यादर्शः) देवप्रभसूरिः ।

अलङ्कारे ।

[११]सरस्वतीकण्ठाभरण–वृत्तिः (पदप्रकाशः) आजडः ।
काव्यप्रकाश–सङ्केतः (काव्यादर्शः) भट्टसोमेश्वरः ।

---

१ कातन्त्रापरनामकलापक–चतुष्काख्यात–कृद्वृत्तिर्दुर्गसिंहकृता । कातन्त्रचतुष्काख्यात–कृत्–पञ्जिका त्रिलोचनदासकृता दौर्गसिंहवृत्तिविषमपदव्याख्यारूपा । २ 'कातन्त्रोत्तरं विद्यानन्दापरनामकं समासप्रकरणं यावत् विद्यानन्दसू. कृ. व्या. ।' बृ. ३ 'हैमचतुष्कवृत्ति–अवचूरिः २२१३ ।' बृ. ४ 'प्राकृतरूपसिद्धिः हैमप्राकृतवृत्त्यवचूरिरूपा मलधा. पं. नरचन्द्रकृता प्राकृतप्रबोधवाच्या १६०० ।' बृ. ५ 'मुष्टिव्याकरणं मलयगिरिकृतम् ।' बृ. ६ 'तिलकमञ्जरीकथा धनपालकृता चम्पूरूपा वर्णनसारा ।–टिप्पनकं शान्त्याचार्यीयं १२०० ।' बृ. ७ 'विक्रमाङ्काभ्युदयकाव्यम् ।' बृ. ८ 'माघकाव्यटीका वल्लभदेवकृता १२००० ।' बृ. ९ 'रघुविलासनाटकं पं. रामचंद्रकृतम् ।' बृ. १० 'मुरारि–नाटकम् ।–टिप्पनकं देवप्रभसूरिकृतं ७५०० ।' बृ. ११ 'श्रीभोजराजकृतालङ्कारस्य वृत्तिः पदप्रकाशनाम्नी आजडकृता काव्यबन्धादिवाच्या ।' बृ.

[1]काव्य–शिक्षा (विनयाङ्का) विनयचन्द्राचार्यः ।

काव्य–कल्पलता–विवेकः ।

छन्दःशास्त्रे ।

छन्दोऽनुशासनम् । वाग्भटः ।

[2]छन्दोवृत्तिः (अमृतसञ्जीवनी) हलायुधः ।

छन्दोऽनुशासनोद्धारः ।

[3]वृत्तरत्नाकर–वृत्तिः (१) पं. श्रीकण्ठः ।

,, ,, (२) त्रिविक्रमः ।

राजनीतिशास्त्रे ।

कौटलीयराजसिद्धान्तटीका (नीतिनिर्णीतिः) । योग्घमः (मुग्धविलासाङ्कः)

कामशास्त्रे ।

[4]शम्भली(कुट्टिनी)मतम् । दामोदरगुप्तः ।

ज्योतिर्निमित्तादौ ।

उत्पातदर्शनम् ।

गणधरहोरा (प्रा.)

गर्गसंहिता (ध्वजाध्यायः)

गर्भलक्षणम् ।

गुर्वादिचारः ।

[5]नाडीवि(सं)चारः (प्रा.)

नाडीविज्ञानम् (सं.)

[5]पिपीलिकाज्ञानम् (प्रा.)

[6]प्रश्न–व्याकरणटीका (चूडामणिः)

———————— (लीलावती)

भूमि–ज्ञानम् (अप.)

मेघमाला (? अप.)

वर्षालक्षणम् ।

[7]सिद्धादेशः ।

श्वानरुतम् (प्रा.)

(१) गमनागमने

(२) जीवित–मरणे

[8]उपश्रुतिद्वारम् (प्रा.)

[8]छायाद्वारम् (प्रा.)

[8]ज्योतिर्द्वारम् (प्रा.)

[8]नाडीद्वारम् (प्रा.)

[8]निमित्तद्वारम् (प्रा.)

[8]रिष्टद्वारम् (प्रा.)

[8]शकुनद्वारम् (प्रा.)

[8]स्वप्नद्वारम् (प्रा.)

शकुनविचारः (प्रा. अप.)

शनैश्चरचक्रम् (अप.) .

---

१ 'कविशिक्षा बप्पभट्टशिष्य (?) विनयचन्द्रकृता ।' –बृ. २ 'हलायुधच्छन्दोवृत्तिर्भट्टहलायुधकृता १२३३ ।' बृ. ३ 'वृत्तरत्नाकरो भट्टकेदारकृतः १५० । तद्वृत्तिः श्रीकण्ठकृता ८२० ।' बृ. ४ 'कुट्टिनीमतकाव्यं सं. दामोदरकृतं १२९० ।' बृ. ५ प्राकृतं पिपीलिकाज्ञानं नाडीसंचारज्ञानं च । ६ 'प्रश्नव्याकरणज्योतिर्वृत्तिः चूडामणिग्रन्थः २३०० ।' बृ. ७ 'सिद्धाज्ञापद्धतिः ।' बृ. ८ देवतादि ११ द्वारैः कालज्ञानम् ।

चूडामणि-सारः । भट्टलक्ष्मणः । प्रणष्टलाभादिप्र. (प्रा.)[1]

योगे ।

योगकल्पद्रुमः । (बृ.)

योगशास्त्रम् (त्रिभुवनसारः)

योगसङ्ग्रहसारः (अध्यात्मपद्धतिः) नन्दीगुरुः ।

प्रा. सं. नीति-सुभाषिते ।

गाथाकोशः (प्रा.)

[2]सप्तशती(प्रा.)-छाया । जल्हणदेवः ।

विद्यापरिपाटिः (प्रा.)

विवेकपादपः (सूक्तसमुच्चयः) कविविबुधचन्द्रः ।

विवेककलिका । नरेन्द्रप्रभाचार्यः ।

सुभाषितद्वात्रिंशिका (प्रा.)

सूक्तमाला (सं.)

सूक्तमुक्तावली । मेघप्रभः ।

सूक्तरत्नाकरः (सं. १) मन्मथसिंहः । [ले. सं. १३४७

„ (२)

सूक्तसङ्ग्रहः (१ सं.) लक्ष्मणः ।

„ (२ सं.)

„ (३ प्रा.)

वेदान्ते ।

खण्डनखण्डखाद्यटीका (शिष्यहितैषिणी) अनुभवस्वरूपः ।

न्याये ।

न्यायकुसुमाञ्जलि-टीका । वामध्वजः । [ले. सं. १३४२

तत्त्वोपप्लवः । भट्टजयराशिः । [ले. सं. १३४९

तन्त्रटीका(अजिता)-निबन्धः उ. परितोषमिश्रः ।

बौद्धन्याये ।

[3]तर्कभाषा । मोक्षाकरगुप्तः ।

[4]हेतुबिन्दुः (सटीकः)

---

१ 'चूडामणिसारग्रन्थः ४१ प्रकरणो लक्ष्मणभट्टकृतः ६७२ ।' बृ. २ शातवाहनकृतगाथा-सप्तशती ।-वृत्तिः जल्हणदेवकृता ।' बृ. ३ 'तर्कभाषाटीका बौद्धमतवाच्या बालावबोध ३परिच्छेदा ८४० ।' बृ. ४ 'हेतुबिन्दुटीका तर्करूपा ।

[1]धर्मोत्तर(न्यायबिन्दुटीका)टिप्पनम् । मल्लवाद्याचार्यः । [ले. सं. १२३१

जैनन्याये ।

क्षणिकत्व(वाद)-निरासः ।
[2]प्रमाणसङ्ग्रहः ।
प्रमाणमीमांसोद्धारः ।
[3]बोटिक-प्रतिषेधः । हरिभद्रसूरिः ।
[4]ब्राह्मण्यजाति-निराकरणम् ।
[5]सर्वज्ञ-व्यवस्थापकम् ।

प्राकृतमूला अप्रसिद्धा जैनसिद्धान्त-व्याख्याग्रन्थाः ।

[6]आवश्यकलघुवृत्तिः । तिलकाचार्यः । [ले. सं. १४९२
„ स्वरूपम् (प्रा.)
[7]उत्तराध्ययनचूर्णिः (प्रा.)
[8] „ लघुवृत्तिः (सुखबोधा) नेमिचन्द्रसूरिः । [ले. सं. १२२८, १३१०
ओघनिर्युक्त्युद्धारः (प्रा.)
कायोत्सर्गोद्धारः (प्रा.) [ले. सं. १२९३
[9]चन्द्रप्रज्ञप्ति-टीका । मलयगिरिः । [ले. सं. १४८०-१
[10]जम्बूद्वीपप्रज्ञप्तिचूर्णिः (प्रा.) [ले. सं. १४८१
[11]जीतकल्पचूर्णिः (प्रा.) [ले. सं. १२८४
र. सं. १२७४] [12]जीतकल्प-वृत्तिः । तिलकाचार्यः । [ले. सं. १२९२, १४५६
[13]तीर्थोद्गारिकप्रकीर्णकम् (प्रा.) [ले. सं. १४५२

१ **न्याय**बिन्दुसूत्रं **बौद्ध**मतवाच्यम् । तट्टीका च **धर्मो**त्तराचार्यकृता सू. टी. १४७७ ।' बृ. २ **प्रमाण**संग्रहप्रकरणं ९ प्रस्तावं **जैनं** ७१२ ।' बृ. ३ **बोटि**कनिषेधो वस्त्रव्यवस्थापनरूपः ।' बृ. ४ 'वज्रसूत्री(ची) द्विजवदनचपेटा विप्रजात्यादिनिरास(निराकरण)वाच्या ।' बृ. ५ **हारिभद्रो नन्दि**-वृत्त्याद्यनमस्कारसंबद्ध-**सर्व**ज्ञव्यवस्थापनावादः । योऽपि सोऽपि बहुरल्पो वा ४' बृ. ६ '**आव०** लघुवृत्तिः श्री**ति**लकीया १२९६ वर्षे कृता १२३२५ ।' बृ. ७ '**उत्त०** चूर्णि**र्गो**वालियमहत्तरशिष्यकृता ५९००, ५८५० ।' बृ. ८ 'उ.——लघुवृत्तिः ११२९ वर्षे **दे**वेन्द्रगण्यपरनामश्री**ने**मिचन्द्रसूरीया ससूत्रा १४००० ।' बृ. ९ '**चन्द्र०** वृत्ति**र्म**लयगिरीया ९५०० ।' बृ. १० '**जम्बू०** चूर्णिः १८७९ ।' बृ. ११ '**जीत**कल्प० चूर्णिः **सिद्ध**सेनीया १००० ।' बृ. १२ '——— वृत्तिः १२२(७)४ वर्षे श्री**ति**लकीया १८०० । **श्राद्ध**जीतकल्पस्य सूत्र-वृत्ती श्री**ति**लकीये गाथा ३० वृत्तिः ११५ ।' बृ. १३ '**तीर्थो**द्गारः गाथा १२३३ ।' बृ.

[1]दशवैकालिकवृत्तिः (सुखबोधा)   सुमतिसूरिः ।   [ले. सं. ११८८

[2]   तिलकाचार्यः ।

[3]दशाश्रुतस्कन्धसूत्रम् (प्रा.)   [ले. सं. १४५६

,, निर्युक्तिः ,,   [,,

,, चूर्णिः ,,   [,,

[4]द्वीप–सागर–प्रज्ञप्तिः (प्रा.)   [ले. सं. १३१०

[5]निशीथचूर्णिः (प्रा.)   [ले. सं. ११५७, १३३०

—— विशेषचूर्णिः (प्रा.)

—— भाष्यम् (प्रा.)   [ले. सं. १३३०

[6]पञ्चकल्पचूर्णिः (प्रा.)   [ले. सं. १४५६

—— भाष्यम् (प्रा.)   सङ्घदासक्षमाश्रमणः ।   [,,

[7]पर्युषणाकल्पटिप्पनम् ।   पृथ्वीचन्द्रसूरिः ।   [ले. सं. १३८४

र. सं. १३२५(?)]   [8]——— निरुक्तम् ।   विनयचन्द्रसूरिः ।

प्रतिक्रमणोद्धारः (प्रा.)

प्रत्याख्यानोद्धारः (प्रा.)

प्रत्याख्यानविचारः (प्रा.)   शालिभद्रसूरिः

[9]बृहत्कल्पसूत्रम् (प्रा.)

कल्पनिर्युक्तिः (प्रा.)   [ले. सं. १३७७

——— भाष्यम् (प्रा.)   [ले. सं. १३७७

[10]चूर्णिः (प्रा.)   [ले. सं. १२९१, १३७७

र. वि. सं. १३३२]   [11]बृहत्कल्पसूत्रवृत्तिः (सुखावबोधा)   क्षेमकीर्तिसूरिः ।

[12]महानिशीथम् (प्रा.)   [ले. सं. १४५४

---

१ 'दश० वृत्तिः 'लघु–बृहद्वृत्त्युद्धाररूपा सुमतिसूरीया २६०० ।' बृ. २ '-   श्रीतिलकीया नेमिचरित्रगर्भा ७००० ।' बृ.   ३ 'दशाश्रुतस्कन्धसूत्रं दशाध्ययनमयम् २१०६, २२२५ ।'   निर्युक्तिः १५४, २२० ।   चूर्णिः ४३२१ ।' बृ.   ४ 'द्वीपसागरप्रज्ञप्तिः गाथा २२३ श्लोकाः २८० ।' बृ.   ५ निशीथसूत्रं विंशोद्देशमयम् ८१२, ९५० । भाष्यम् ७००० ——— चूर्णि–सूत्र–भाष्याणि २८००० ।' बृ.   ६ 'पञ्चकल्पसूत्रम् ११३३ । ——— भाष्यं सङ्घदासगणिकृतम् गाथा २५७४, ३०३५ ——— चूर्णिः ३०००, ३१३६ ।' बृ. ७ 'पर्युषणाकल्प० टिप्पनकं पृथ्वीचन्द्रीयं ।' ६४० बृ.   ८ ——— निरुक्तटिप्पनकं विनयचन्द्रसूरिकृतम् १५८ ।' बृ.   ९ कल्पसूत्रं षडुद्देशमयम् ४७३ । बृहद्भाष्यम् १२००० । भाष्यम् ७६०० । १० 'कल्पचूर्णिः १२७०० । कल्पविशेषचूर्णिः ३१००० ।' बृ.   ११ 'कल्पवृत्तिः सूत्र–भाष्यगर्भा । आद्यानि ४६०० मलयगिरीयाणि । शेषा तु १३३२ वर्षे तपाक्षेमकीर्तीया ४२००० ।' बृ. १२ 'महानिशीथसूत्रं लघु–मध्यम–बृहद्वाचनम् ३५००, ४२००, ४५४४ ।' बृ.

रचनासंवत्] [लेखनसंवत्

वि. सं. ९५६] [1]यतिप्रतिक्रमणसूत्र–वृत्तिः । पार्श्वः । [वि. सं. १२२८, १२९८

[2]वन्दनकचूर्णिः (प्रा.) यशोदेवसूरिः । [वि. सं. १४४४

—— स्तवोद्धारः (प्रा.) [वि. सं. १२९३

[3]विशेषावश्यक–लघुवृत्तिः । कोट्टा(ट्या)चार्यः । [वि. सं. १४९१

सं. ११८३] श्रावकप्रतिक्रमणसूत्र–चूर्णिः (प्रा. बृ.) विजयसिंहाचार्यः । [वि. सं. १३१७

वि. सं. ९५६] [1] ———वृत्तिः (१) पार्श्वः । [वि. सं. १२२८, १२९८

वि. सं. १२२२] ————(२ बृ.) चन्द्रसूरिः । [वि. सं. १२९९

————(३ बृ.) तिलकाचार्यः ।

श्राद्धजीतकल्पः (प्रा.)

षडावश्यकोद्धारः (प्रा.) [ले. सं. १२९३

सामायिकोद्धारः (प्रा.) [”

प्राकृतभाषाप्रधाना अप्रसिद्धा जैनोपदेशग्रन्थाः ।

[4]अध्यात्मतरङ्गिणी (टीका)

अनुशासनफलकुलकम् (प्रा.)

[5]उपदेशकन्दली–वृत्तिः । बालचन्द्रसूरिः । [वि. सं. १२९६

उपदेशकुलकानि (प्रा.)

[6]उपदेशमाला–विवरणम् (१) वर्धमानसूरिः । [वि. सं. १२२७, १२७९

वि. सं. १२३८] [7] ———— (२) रत्नप्रभसूरिः । [वि. सं. १२९३, १३९४

वि. सं. १२९९] [8] ———— (३) उदयप्रभसूरिः ।

———— (४) सर्वाणन्दसूरिः ।

कथासमासः (प्रा.) जिनभद्रसूरिः

उद्धारः

[9]उपदेशमाला (पुष्पमाला)–वृत्तिः । म. हेमचन्द्रसूरिः [वि. सं. १३१३, १४२५

---

१ ‘चैत्य–साधुवन्दन–श्रावकप्रतिक्रमणसूत्रवृत्तिः ९५६ वर्षे पार्श्वेण कृता २००० प्रमाणा ।’ बृ.

२ ‘ईर्या० १५०, चैत्य० ८४०, वन्दन० ७२७ चूर्णयः ११७४ वर्षे यशोदेवकृताः ।’ बृ.

३ ‘विशेषावश्यकसूत्रं श्रीजिनभद्रगणिकृतम् ४००० । ——— जीर्णा वृत्तिः १४००० पत्तनं विना नास्ति ।’ बृ.

४ ‘अध्यात्मतरङ्गिणीटीका दिगम्बरीयतर्करूपा ।’ बृ.

५ ‘उपदेशकन्दली–वृत्तिर्बालचन्द्री ७६०० ।’ बृ.

६ ‘उपदेशमाला–वृत्तिः सिद्धर्षीया हे० केनापि कथाभिर्योजिता सं० १५००, ९५०० ।’ बृ.

७ ‘ ——— दोघट्टी रात्नप्रभी सं. १२३८ वर्षे । असूत्रा ११९५०, ससूत्रा ११८२९ ।’ बृ.

८ ‘ ——— कर्णिका १२९९ वर्षे औदयप्रभी ससूत्रा १२२७४, असूत्रा ११४११ ।’ बृ.

९ ‘पुष्पमालावृत्तिर्मलधारिसूत्रकृत्हेमचन्द्रैः ११७५ वर्षे कृता १३८६८ ।’ बृ.

रचनासंवत्] [लेखनसंवत्

उपदेशसारः (प्रा.) देवभद्रसूरिः ।
चारित्र–मनोरथमाला (प्रा.) धनेश्वरसूरिः ।
चित्त–समाधि–प्रकरणम् (प्रा.) चन्द्रप्रभसूरिः ।
जिन–पूजाद्युपदेशः (प्रा.) नेमिचन्द्रसूरिः । [वि. सं. १२०८
जीवानुशासनम् (प्रा.) देवसूरिः ।
——— वृत्तिः ।
जीवानुशास्तिकुलकम् (प्रा.) यशोघोषसूरिः ।
ज्ञानाङ्कुश (सं.)
[1]दानादिप्रकरणम् (सं.) सु(सू)राचार्यः ।
दुःख–सुखविपाककुलकम् (प्रा.)
[2]धर्मविधि–वृत्तिः । जयसिंहसूरिः ।
वि. सं. ११९१] [3]धर्मोपदेशमाला–वृत्तिः । विजयसिंहसूरिः ।
धर्मोपदेशशतम् (प्रा.) धर्मघोषसूरिः ।
पञ्चपर्वकुलकम् (प्रा.)
सं. ११८६] परिग्रहपरि(प्र)माणम् (प्रा.) धर्मघोषसूरिशिष्यः । [सं. ११८६
[4]पिण्डविशुद्धिः (प्रा.) जिनवल्लभगणिः ।
[5] ——— वृत्तिः (१) यशोदेवसूरिः ।
सं १२९५][3] [6] ——— (दीपिका २) उदयसिंहसूरिः ।
प्रवचनसन्दोहः (प्रा.)
[7]प्रवचनसारोद्धार–लघुवृत्तिः ।
[8]प्रव्रज्याविधान–वृत्तिः । प्रद्युम्नकविः ।

१ 'दानादिप्रकरणं सं. सूराचार्यकृतं सप्तावसरं काव्यादिबन्धं प. ३४ ।'
२ 'धर्मविधिप्रकरणवृत्तिः जयसिंहसूरिकृता ११९४२ ।' बृ.
३ 'धर्मोपदेशमाला–लघुवृत्तिः ९१५ वर्षे जयसिंहीया ।'
——— विवरणं स्तम्भतीर्थे विना न ।' बृ.
४ 'पिण्डविशुद्धिसूत्रं जैनवल्लभम् गाथा १०३ ।' बृ.
५ '——— वृत्तिः ११७६ वर्षे यशोदेवी २८०० ।' बृ.
६ '——— दीपिका लघुवृत्तिरूपा ५५० ।' बृ.
७ 'प्रवचन० विषमपदटीका भृगु० विना न ।' बृ.
८ 'पवज्जाविहाण–वृत्तिः १३३८ वर्षे प्रद्युम्नीया ४५०० ।' बृ.

रचनासंवत्] [लेखनसंवत्

सं. ११८५] [1]प्रशमरति–वृत्तिः। हरिभद्रसूरिः। [वि. सं. १२९८,१४९७

बोधकुलकम् (प्रा.)

बोधप्रदीपः (सं.)

[2]भवभावना (प्रा.) म. हेमचन्द्रसूरिः। [वि. सं. ११९१

भव्यजीवमनोरथाः (प्रा.)

भावनाकुलकम् (प्रा.) सोमदेवः।

——— (२) यशोघोषः।

भाववर्धनम् (प्रा.)

भावश्रावकलक्षणानि (प्रा.)

मनःसंवरणकुलकम् (प्रा.)

सं. १२८४] मनःस्थिरीकरणम् (सविवरणं प्रा. सं.) महेन्द्रसूरिः।

मिथ्यात्वकुलकम् (प्रा.)

मिथ्यात्व–परिहारः (प्रा.)

विवेककुलकम् (प्रा.) जिनप्रभः।

विषयनिन्दापञ्चाशत् (प्रा.)

शीलकुलकम् (२ प्रा.)

शील–रक्षा (प्रा.)

शीलाङ्ग–रथ–विधिः (प्रा.)

[3]श्राद्धदिनकृत्य–वृत्तिः। देवेन्द्रसूरिः।

श्रावकवर्षाभिग्रहाः (प्रा.)

श्रावकव्रतग्रहणम् (प्रा.) जयसिंहसूरिशिष्यः।

श्रावक–सामाचारी (प्रा.) तिलकाचार्यः।

——— –व्याख्या (१) ,,

——— (२)

श्रुतधर्मप्रकरणम् (प्रा.)

सम्यक्त्वकुलकम् (प्रा.)

संवेगमञ्जरी (प्रा.) देवभद्रसूरिः।

साधर्मिक–वात्सल्यकुलकम् (प्रा.) जिनप्रभसूरिः।

---

१ 'प्रशमरति–वृत्तिः ११८५ वर्षे हरिभद्रीया १८००।' बृ.

२ 'भवभावना–वृत्तिः सूत्रकृन्मलधारिहेमचन्द्रीया ११७० वर्षे १३०००।' बृ.

३ 'दिनकृत्यवृत्तिः तपाश्रीदेवेन्द्रीया १२८२०।' बृ.

रचनासंवत्] [लेखनसंवत्

सामाचारी (प्रा.)

सं. १२८४] सारसङ्ग्रहः (प्रा.) महेन्द्रसूरिः ।

सारसमुच्चयकुलकम् (प्रा.)

हितोपदेशः (प्रा.)

अपभ्रंशभाषायामप्रसिद्धा उपदेशग्रन्थाः ।

जीवानुशास्ति-सन्धिः । जिनप्रभसूरिः ।

ज्ञानप्रकाशकुलकम् । ”

दंगड ।

दानादिकुलकम् । जिनप्रभसूरिः

——— (२)

धर्माधर्मविचारः । जिनप्रभसूरिः

धर्मोपदेशकुलकम् ।

भावनाकुलकम् । जिनेश्वरसूरिः

भावनासारः ।

श्रावकविधिः । जिनप्रभसूरिः

सिद्धिकुलकम् ।

सुभाषितकुलकम् । जिनप्रभसूरिः

संवेगमातृका (माई)

प्राकृतभाषायामप्रसिद्ध-कथा-चरित्रग्रन्थाः

आर्द्रकुमारकथा (२ गद्य-पद्ये)

वि. सं. ११६०] [1]ऋषभजिनचरितम् । वर्धमानसूरिः । [वि. सं. १२८९

एलकाक्षकथा

कथानककोशः । विनयचन्द्रसूरिः । [वि. सं. ११६६

[2]कथारत्नकोशः ।

[3]कथावली । भद्रेश्वरसूरिः । [वि. सं. १४९७

१ 'श्रीआदिनाथचरित्रं प्राकृतं जयसिंहदेवराज्ये ११६० वर्षे वर्धमानसूरिरचितम् ११०००, १२००० ।' बृ.

२ 'कथारत्नकोशः सम्यक्त्वादि ५० अधिकारः ११५८ वर्षे देवभद्रसूरीयः १२३०० ।' बृ.

३ 'कथावली प्रथमपरिच्छेदः प्रा. मु. २४ जिन-१२ चक्र्यादि-हरिभद्रसूरिपर्यन्तसत्पुरुषचरित्र-वाच्यो भाद्रेश्वरः २३८०० ।' बृ.

रचनासंवत्] [लेखनसंवत्

[1]कथासङ्ग्रहः (१८ पापस्थानके १)

——— (२)

——— (३) अमरसूरिशिष्यः । [वि. सं. १३९८

——— (४)

कलावतीकथा ।

कालकाचार्यकथा (१) विनयचन्द्रः । गा. ७८ ।

——— (२) गा. ८५ ।

——— (३) गा. १८० । [वि. सं. १३६४

——— (४) गा. १५४ ।

——— (५) गा. १३२ ।

[2]चन्द्रप्रभचरितम् । हरिभद्रसूरिः । [वि. सं. १२२३

जम्बूकुलकम् ।

दवदन्तीचरितम् ।

देवकीसुतचरितम् ।

द्वादशव्रतकथाः ।

धन्यसुन्दरीकथा ।

वि. सं. १२३३] [3]नेमिनाथचरितम् । रत्नप्रभसूरिः । [वि. सं. १४७०

[4]पञ्चमी-कथा (माहात्म्यम्) महेश्वरसूरिः । [वि. सं. १३१३

वि. सं. १२५४] [5]पद्मप्रभचरितम् । देवसूरिः । [वि. सं. १४७९

पादलिप्ताचार्यकथा । [वि. सं. १२९१

[6]पार्श्वनाथचरितम् । देवभद्राचार्यः । [वि. सं. ११९९

पुष्पवतीकथा । अभयसूरिः (?) [वि. सं. ११९१

[7]प्रत्येकबुद्धकथा ।

प्रदेशिकथा ।

---

१ 'कथापुस्तिका अनेकविधकथाभिरनिर्दिष्टनामिकाभिरुपेता विविधाः ।' बृ.

२ 'चन्द्रप्रभचरितं प्रा० श्रीकुमारपालराज्ये हारिभद्रम् ८०३२ ।' बृ.

३ 'नेमिचरितं प्रा० गद्य-पद्यमयं १२३३ वर्षे देवसूरिशिष्यरत्नप्रभीयम् १२६८० ।' बृ.

४ 'पञ्चमीकथा दशकथानकात्मिका प्रा. महेश्वरसूरीया २००४ ।' बृ.

५ 'पद्मप्रभचरित्रं प्राकृतं न ।' बृ.

६ 'पार्श्वचरितं प्रा० ११६५ वर्षे नवांग-अभयदेवप्रथमशिष्यदेवभद्राचार्यैः कृतम् ९००० ।' बृ.

७ 'प्रत्येकबुद्धचरितं १२६१ वर्षे श्रीतिलकीयं ६०५० ।' बृ.

रचनासंवत्] [लेखनसंवत्

प्रद्युम्नचरितम् (गद्यम्) [वि. सं. १३४५

बप्पभट्टिकथा । [वि. सं. १२९१

मल्लवादिकथा । [वि. सं. १२९१

मल्लिनाथचरितम् । [वि. सं. १३४५

वि. सं. ११९३] [1]मुनिसुव्रतस्वामिचरितम् । श्रीचन्द्रसूरिः ।

सं. ११३९ (?)] [2]रत्नचूडादिकथाः(जिनपूजाऽऽद्युपदेशे) नेमिचन्द्रसूरिः [१२०८

राम-लक्ष्मणचरितम् । [वि. सं. १३४५

[3]लीलावतीकथा । कुतूहलः (?)

वङ्कचूलकथा (गद्ये)

[4]वासुपूज्यचरितम् । उ. चन्द्रप्रभः ।

विक्रमसेनचरितम् । पद्मचन्द्रसूरिशिष्यः ।

वीरजिनचरितम् ।

वि. सं. ११६०] [5]शान्तिनाथचरितम् । देवचन्द्रसूरिः । [वि. सं. १२२८

शालिभद्रचरितम् ।

शीलवतीकथा ।

[6]श्रेयांसनाथचरितम् । देवभद्रसूरिः । [वि. सं. १४७०

सगरचक्रिचरितम् । [वि. सं. ११९१

सिद्धसेनकथा-चरितम् । [वि. सं. १२९१

[7]सीताचरितम् । भुवनतुङ्गः (?)

सुकोशलकथा । [वि. सं. १२०३,१२१३

सुबाहुचरितम् ।

अपभ्रंशभाषायामप्रसिद्धकथा-चरितग्रन्थाः ।

अञ्जनासुन्दरीकथा ।

अन्तरङ्गसन्धिः । रत्नप्रभः । [वि. सं. १३९२

---

१ 'मुनिसुव्रतचरितं प्रा० ११९३ वर्षे चन्द्रसूरिरइयं (रचितं) गाथा १०९९४ ।' बृ.

२ 'बृहत्पूजाष्टकं रत्नचूडकथयाऽङ्कितम् । रत्नचूडकथा पूजाफलवाच्या नेमप्रभा(? मिचन्द्रा)-चार्यीया ३५०० ।' बृ.

३ 'लीलावतीकथा भूषणभट्टसुतकृताऽऽद्यरसमिश्रिता च परसमयगता गाथाः १४३९ ।' बृ.

४ 'वासुपूज्यचरितं प्रा० चान्द्रप्रभं हेमसूर्यादिशोधितम् ८००० स्तम्भतीर्थे विना न ।' बृ.

५ 'शान्ति-चरितं प्रा० गद्य-पद्यमयम् ११६० वर्षे श्रीहेमसूरिगुरुदेवचन्द्रसूरीयम् १२१०० ।' बृ.

६ श्रेयांसचरितं प्रा० देवभद्रीयम् ११००० स्तम्भतीर्थे विना न ।' बृ.

७ 'सीताचरितं प्रा० ३१०० । धर्माधर्मशास्त्रगतं प्राकृतं ३४०० ।' बृ.

रचनासंवत्]			[लेखनसंवत्
	ऋषभजिन–चरित–स्तवनम् ।	जिनप्रभः ।	
वि. सं. १३२८]	नर्मदासुन्दरीसन्धिः ।	जिनप्रभः ।	
	नेमिनाथबोली ।		
	—— रासः ।	जिनप्रभः ।	
	पद्मश्रीचरितम् ।	धाहिलः ।	
	भव्यकुटुम्बचरितम् ।	जिनप्रभसूरिः ।	
	भव्यचरितम् ।	जिनप्रभसूरिः ।	
वि. सं. १२९७]	मदनरेखासन्धिः ।	[जिनप्रभसूरिः]	
	मल्लिनाथचरितम् ।	जिनप्रभः ।	
	महावीरचरितम् ।		
	मृगापुत्रकुलकम् ।		
वि. सं. १३१६]	वज्रस्वामिचरितम् ।	जिनप्रभसूरिः ।	
	सीतासत्त्वम् ।		
वि .सं. १२(?)६१]	सुभद्राचरितम् ।		
	सुलसाख्यानम्	देवचन्द्रसूरिः ।	[वि. सं. ११९१
	स्थूलभद्रसन्धिः ।		

संस्कृतभाषायामप्रसिद्धकथा–चरितग्रन्थाः ।

इलातीपुत्रकथा (धर्मोपदेशशतान्तर्गता)		[वि. सं. १३३९
[1]उपमितिभवप्रपञ्चा–कथा–सारोद्धारः (१)	देवसूरिः ।	
[2] ———————— (२)	देवेन्द्रसूरिः ।	
ऋषिदत्ताकथा (ध. अन्तर्गता)		
[3]कथारत्नाकरः ।	नरचन्द्रसूरिः ।	[वि. सं. १३१९
कुमारपालप्रबन्धः ।		[वि. सं. १४७५
कृतपुण्यकथा (ध. अन्तर्गता)		[वि. सं. १३३९
गजसुकुमालकथा (ध. अन्तर्गता)		”
चारुदत्तादिकथा (ध. अन्तर्गता)		”
त्रिषष्टिश. पु. चरितम् ।	विमलसूरिः ।	
दृढप्रहारिकथा (ध. अन्तर्गता)		[वि. सं. १३३९

१ ‘उपमितभवप्रपञ्चोद्धारः सं. देवसूरिकृतः २३७० ।’ बृ.

२ ‘उपमितसारोद्धारः सं. १२९८ वर्षे श्रीचन्द्रशिष्यदेवेन्द्रसूरीयः ५७३० ।’ बृ.

३ ‘कथारत्नसागरः १५ तरङ्गात्मको मलधारिनरचन्द्रसूरीयः १५ कथः ।’ बृ.

रचनासंवत्] [लेखनसंवत्

द्वादशव्रतकथाः ।
धनश्रीकथा (ध. अन्तर्गता) [वि. सं. १३३९
धन्य–शालिभद्रकथा ।
[1]धर्माभ्युदय(सङ्घपतिचरित)महाकाव्यम् । उदयप्रभसूरिः
नर्मदासुन्दरीकथा (ध. अन्तर्गता) [वि. सं. १३३९
नागदत्तकथा (ध. अन्तर्गता) "
पञ्चाणुव्रतकथाः ।
[2]पार्श्वनाथचरितम् । सर्वाणन्दसूरिः ।
मरुकदृष्टान्तः ।
वज्रकर्णकथा (ध. अन्तर्गता) [वि. सं. १३३९
वसुमित्रकथा (ध. अन्तर्गता) "
विक्रमकथा ।
विक्रमसेनकथा (ध. अन्तर्गता) वि. सं. १३३९
विलासवतीकथा (ध. अन्तर्गता) "
वि. सं. १२४६ (?) [3]शान्तिनाथचरितम् (१) माणिक्यचन्द्राचार्यः । [वि. सं. १४७०
वि. सं. १३२२ [4]———— (२) मुनिदेवसूरिः ।
सनत्कुमारचरितम् ।
सीताचरितं महाकाव्यम् (ध. अन्तर्गतम्) [वि. सं. १३३९
स्तेनकथा ।
स्थविराकथा ।

प्राकृतापभ्रंशादिभाषाप्रधानमप्रसिद्धं जैनस्तुति–स्तोत्रादि ।

अजित–शान्तिस्तवः (अप.) वीरगणिः ।
[5]अजित–शान्ति–स्तववृत्तिः । गोविन्दाचार्यः ।
अनन्तनाथ–स्तोत्रम् (प्रा.) देवभद्रसूरिः ।
आत्मशुद्धिस्तवः ।

१ 'धर्माभ्युदयकाव्यं वस्तुपालचरित्रशाच्यमुदयप्रभीयम् ५२००-५०४० ।' बृ.
२ 'पार्श्वचरितं सं. सर्वानंदसूरिकृतम् ।' बृ.
३ 'शांतिचरितं सं. माणिक्यसूरीयम् ५५७४ ।' बृ.
४ 'शांतिचरितं सं. १३२२ वर्षे मौनिदेवम् ४८८५ ।' बृ.
५ 'अजित-शान्ति-स्तववृत्तिः श्रीगोविन्दीया ३०० देव[पत्तनं] धिना न ।

रचनासंवत्]

ऋषभजिन–जन्माभिषेकः (अप.)

——— पारणकम् (,,)

स्तवः (,,)

स्तवनम् (प्रा.) धर्मकीर्तिः ।

स्तुतिः (,,)

स्तुतिः (पञ्चाशिका प्रा.)–मू. धनपालः,

———— वृत्तिः (१) प्रभानन्दसूरिः ।

———— (२) नेमिचन्द्रगणी ।

ऋषिमण्डलस्तव–बृहद्वृत्तिः ।

कल्याणकप्रकरणम् (२ प्रा., अप.)

——— स्तवः । आशाराजः ।

———— स्तुति–स्तोत्रादि (२)

गणधर(युगप्रधान)सप्ततिः (प्रा.)

—— स्तुतिः ।

————होरा (प्रा.)

गम्भीरस्तवः । विमलः ।

गुरु(देवभद्रसूरि)स्तुतिः (सं. प्रा.)

गौतमस्वामि–स्तुतिः । रत्नप्रभसूरिः ।

चतुर्विंशतिका (अप.)

——जिन–कल्याणकम् (,,)

———— नमस्कारः । (,,) शान्तिभद्रः ।

चतुर्विंशतिजिनस्तुतिः । सोमप्रभः ।

——स्थानकम् (प्रा.)

चर्चरी स्तुतिः (अप.) जिनप्रभः ।

—— गुरुस्तुतिः (,,)

चैत्यपरिपाटिः (,,) जिनप्रभः ।

जिनकल्याणकस्तोत्रम् (प्रा.)

—————— (अप.) मुनिचन्द्रः ।

जिनगणधरनमस्कारः (,,)

वि. सं. १२९३] जिनजन्ममह–स्तवनम् (२ अप.) जिनप्रभः ।

जिन–जन्माभिषेक: (अप.) जिनप्रभ: ।
जिनप्रतिमाकोश: (,,)
जिनमहिमा (,,) जिनप्रभ: ।
जिनस्तव: । नरचन्द्राचार्य: । [वि. सं. १३३४
—— स्तुति: (अप.)
——स्तोत्रम् ।
—— (अप.)
जिनागमवचनम् (,,)
त्रयोविंशतिस्थानम् (प्रा.)
त्रिषष्टिध्यानकुलकम् (,,)
द्वात्रिंशिका । देवभद्र: ।
धर्मघोषसूरिस्तुति: (प्रा. अप.)
——स्तोत्रम् (,,)
नमस्कारफलप्र. (अप.)
नवफणपार्श्वनमस्कार: (,,) शान्तिसमुद्र: ।
नेमिनाथ–जन्माभिषेक: (,,)
——स्तवनम् (,,)
पञ्चकल्याणकस्तोत्रम् (सं. प्रा.)
पञ्चमी–स्तोत्रम् (प्रा.)
पार्श्वनाथ–जन्मकलश: (अप.) धर्मसूरिशिष्य: ।
—— जन्माभिषेक: (,,) जिनप्रभ: ।
—— महास्तव: (सं. प्रा.)
बिरदावली (जिनपतिस्तुति:) विमलसूरि: ।
महर्षिकुलकम् (प्रा.)
—— स्तव: (,,)
महादण्डकप्र. (,,)
महासतीकुलकम् (,,)
मुनिसुव्रत–स्तोत्रम् (अप.) जिनप्रभ: ।
मोहराज–विजय: (,,) जिनप्रभ: ।

रचनासंवत्]

विज्ञप्तिका (प्रा.) जिनवल्लभगणी ।
विमलगिरि–स्तवनम् ।
वीतराग–स्तवनम् । देवभद्रः ।
वीरजिन–पारणकम् (अप.) वर्धमानसूरिः ।
————विज्ञप्तिका (,,)
————स्तवः
शान्तिनाथ–स्तवः (सं., प्रा.)
———— स्तुतिः (प्रा., अप.)
शाश्वतचैत्य–स्तवः (प्रा.)
सकलतीर्थ–स्तोत्रम् (,,) सिद्धसेनसूरिः ।
सतीकुलकम् (,,)
समवसरणस्तवः (,,)
साधारणस्तवः (,,)
स्तम्भनपार्श्व–स्तोत्रम् (प्रा.) देवभद्रः ।
स्तुतिद्वात्रिंशिका (सं., अप.)
स्तोत्रसङ्ग्रहः (अप.)
स्थानकप्रकरणम् (प्रा.)
—— स्तवनम् (,,)
स्नात्रकुसुमाञ्जलिः ।

प्राकृतभाषायामप्रसिद्धाः प्रकीर्णग्रन्थाः ।

[1]अजीवकल्पः (प्रा.)
आचार्यप्रतिष्ठा–विधिः (,,)
वि. सं. ११९२] क्षेत्रसमास–वृत्तिः । सिद्धसूरिः ।
कर्मप्रकृतिसङ्ग्रहणी (प्रा.)
चतुर्दशककुलकम् (,,)
चार्चिकग्रन्थः (,,)
जम्बूद्वीपविचारः (,,)
जीवविभक्तिः (,,) जिनचन्द्रगणी ।

१ 'अजीवकल्पः गाथा ४४ ।' बृ.

रचनासंवत्] [लेखनसंवत्

दर्शनचतुर्विंशतिका (प्रा.)

दशविधप्रत्याख्यानम् (,,)

दशविंशतिभावना (,,)

[1] दुःषमग(द)ण्डिका (,,) [वि. सं. १२८४

दुःषमपद्धतिः (,,)

दुःषमोद्धारः (,,) उदयप्रभसूरिः ।

द्वात्रिंशज्जीवपरिमाणम् (,,)

द्वादश भावनाः (,, २)

द्वादशार्थविचारः (,,)

प्रतिष्ठाविधानम् (,,)

प्रायश्चित्तविधिः ।

पौषधिकप्रायश्चित्तसामाचारी । तिलकाचार्यः ।

मूलशुद्धिः (प्रा.)

योगविधिप्रकरणम् ।

विचारसप्ततिः (प्रा.)

विभक्तिविचारः (,,) अमरचन्द्रसूरिः ।

विमानविचारः (,,)

[2] व्युच्छेद्यगण्डिका (,,) [वि. सं. १२८४

वि. सं. ११९९] शतक–बृहद्भाष्यम् (,,) चक्रेश्वरसूरिः

[3] शतपदी । धर्मघोषसूरिः । [वि. सं. १३००

षट्त्रिंशत्स्थानकम् (प्रा.)

षट्त्रिंशिका (,,)

संक्षेपाराधना (,,)

सङ्घाचारटीका । देवेन्द्रसूरिः ।

सागारप्रत्याख्यानविधिः (प्रा.)

सूक्ष्मार्थविचार–विवरणम् । मू. जिनवल्लभगणी ।

१ 'दूसमदण्डिका गाथा ९२, ११२ ।'–बृ. 'दूसमविच्छेयदण्डिका २०४ ।' बृ. २ 'व्युच्छेद-दण्डिका गाथा १७३ । द्वितीया तु योगसारगणिकृता ।' बृ. ३ 'शतपदी ११७ पदार्थमयी आम्बलिकप्रणीता १२९४ वर्षे महेन्द्रसिंहाचार्यकृता ५४५० ।' बृ.

सचित्रास्ताडपत्रीयाः पुस्तिकाः ।

	लेखनसंवत्	पत्रे
१ निशीथचूर्णिपुस्तकम् ।	वि. सं. ११५७	२०३
२ महावीरचरितपुस्तकम् (त्रि. श. पर्व १०)*	वि. सं. १२९४	२०६
३ श्रावकप्रतिक्रमणसूत्रचूर्णिः ।	वि. सं. १३१७	३८९
४ कथारत्नाकरः ।	वि. सं. १३१९	१४
५ कल्पसूत्रम् ।	*वि. सं. १३३६	३८७
६ कालकाचार्यकथा ।	"	"
७ ————	वि. सं. १३४४	३७९
८ कथासङ्ग्रहः ।	वि. सं. १३४५	१३६
९ त्रिषष्टिशलाकापुरुषचरितम् ।	वि. सं. १४३६	३६४
१० द्व्याश्रयकाव्यवृत्तिः ।	वि. सं. १४८६ (?)	१५१
११ †पञ्चतीर्थ्यालेख्यपटः (वस्त्रे)	वि. सं. १४९०	१५४
१२ †शान्तिनाथप्रासादालेखः (वस्त्रे)	वि. सं. "	"
१३ उत्तराध्ययन-निर्युक्तिः ।	अनिर्दिष्टसंवत्सरा	३३४
१४ शान्तिनाथचरितम् ।	"	३३५
१५ हैमबृहद्वृत्तिः ।	"	४०२
१६ —— गणः ।	"	"
१७ वङ्कचूलकथा ।	"	१५३

* एतासां प्रतिकृतयोऽत्र प्रारम्भे प्रदर्शिताः । † ईस्वी सन् १९३२ वर्षीय 'इण्डियन् आर्ट एण्ड लेटर्स' संज्ञकपुस्तके [७१–७८ पृष्ठेषु] श्रीयुत 'नानालाल महेता' महाशयस्य एतद्विषयकः सचित्र उल्लेखोऽवलोकनीयः । ❀ इतः पूर्वं टिप्पणी [१-२४] पृ. ४९१-४९८ पत्रेषु पठनीया ।

जिनागमादि-लेखन-संरक्षणादिप्रवृत्तिः ।

प्रथमस्तीर्थकृद् ऋषभोऽर्हन् प्रव्रज्याग्रहणात् प्राक् परमप्राचीने काले प्रजाहितार्थमुपदिष्टवान् [1]लेखादिका द्वासप्ततिकलाः । लिपिविधानरूपा लेखकला च तेनैव जिनेन निजाङ्गजायै ब्राह्म्यै उपदिष्टेति ब्राह्मीलिपिनमस्करणं[3] ब्राह्मीप्रभृत्यष्टादशलिपीनां लेखादिद्वासप्ततिकलानां च परिचय-समुल्लेखादि समुपलभ्यतेऽङ्गोपाङ्गादिसंज्ञया प्रसिद्धे जैनसिद्धान्ते[4]। माता-पितरौ बालं महावीरं लेखाचार्यस्य पार्श्वे नीतवन्तावित्याद्यपि च सूचितम्।[5]

[6]अर्धमागधीभाषायामर्थतोऽर्हद्भाषितानि सूत्रतो गणधरग्रथितानि श्रमणभगवन्महावीर-गौतम-सुधर्मस्वामि-जम्बूप्रभृतीनां निर्देश-संवादपरायणानि जैनसिद्धान्तसूत्राणि महावीर-जिननिर्वाणादनन्तरं चतुर्दशपूर्वधरभद्रबाहु-स्थूलभद्र-दशपूर्वधरार्यवज्रार्यरक्षितादि सुप्रशस्तमतिमद्भिर्मुनिपुङ्गवैश्चिरं गुरुपरम्परयाऽवधारितानि परिपाट्या परिपठ्यमानान्यासन् । विषमकालद्वादशवार्षिकदुष्कालादिदुर्विलसितादपचीयमानं श्रुतं परिहीयमानं मति-स्मृति-धृति-शक्त्यादि च परिभाव्य परोपकारपरायणैः समयज्ञैर्दीर्घदर्शिभिर्युगप्रधानैः सुप्रयत्नेन सङ्घटितानि समुद्धृतानि च तानि ।

श्रुतकेवलिनाऽऽर्यशय्यम्भवेन दशवैकालिकम्, चतुर्दशपूर्वधरेण भद्रबाहुस्वामिना दशा-कल्प-व्यवहारसूत्रादि, आर्यश्यामापरनामकालकेन प्रज्ञापना, आर्यरक्षितेनानुयोगपार्थक्यम्, देववाचकेन नन्दीसूत्रम्, हरिभद्रसूरि[2]प्रभृतिना महानिशीथसूत्रादि च जैनश्रुतात् समुद्धृतं श्रूयते ।

जैनागमसूत्राणां निर्युक्तिनामधेयं व्याख्यानं भद्रबाहुस्वामिना, भाष्यं जिनभद्र-सङ्घदासगणिक्षमाश्रमणाभ्याम्, चूर्णिसंज्ञकं जिनदासगणिमहत्तरेण, वृत्ति-व्याख्या-विवरणादिस्वरूपं च सिद्धसेनाचार्य-हरिभद्रसूरि-गन्धहस्ति--कोट्याचार्य-शीलाङ्काचार्य-शान्तिसूरि-श्रीमदभयदेवसूरि-द्रोणाचार्य-नेमिचन्द्रसूरि-मलधारिहेमचन्द्रसूरि-चन्द्रसूरि-मलयगिरिप्रभृतिभिर्भूरिभिर्बहुश्रुतैः सूरिभिर्व्यरचि । सुविस्तृतं च तत् तत्तत्काले पुस्तकादिषु लिखितं सम्भाव्यते । श्रुतदेवतां वागीश्वरीं पुस्तकव्यग्रहस्तां वर्णयद्भिः, श्रुतज्ञानप्रकारे पत्रादि-पुस्तकादिलिखितं द्रव्यश्रुतं प्रतिपादयद्भिः, देवानां पुस्तकरत्नस्य वर्णनं विदधद्भिः,पुस्तकग्रहणे संयमासंयमौ प्रबोधयद्भिः, पुस्तकपञ्चकप्रकारं प्रपञ्चयद्भिर्जैनप्रवचन-निर्युक्ति-भाष्य-चूर्णि-विवरणकारैः प्रख्यापितमेव पुस्तकानां ततोऽपि प्राचीनत्वम् ।[7]

पुरा पाटलिपुत्रपुरे सम्मीलितसङ्घसङ्घटितो वाचनाविख्यातः, [8]स्कन्दिलाचार्य-नागार्जुनवाचक-देवर्धिगणिक्षमाश्रमणादिश्रमणसङ्घस्य प्रशस्यप्रयत्नेन मथुरापुरी-वलभीपुरादौ पुस्तकाधिरूढः परम्परालेखितः सम्प्राप्यते साम्प्रतमपि जैनसिद्धान्तः ।

अन्यच्च श्रूयते विक्रमादित्यसन्मानितेन सिद्धसेनदिवाकरेण चित्रकूटनगरे पुरातनचैत्यगृहे पूर्वाचार्यैः स्थापितपरमरहस्यविद्यामयपुस्तको लेप्यमयः स्तम्भः प्रत्यौषधप्रयोगेण प्रोद्घाटित आसीत् ।[10]

श्रूयते च प्रव्रजितया सङ्घसन्मानितया जनन्या दुर्लभदेव्या वलभ्यां संरक्ष्यमाणे पुस्तकादिधर्मोपकरणे मल्लस्तदन्तर्गतं व्यलोकयद् देवताधिष्ठितं पूर्वगतं गुरुनिषिद्धदर्शनमपि द्वादशारनयचक्रपुस्तकम्। वाचितायामेव यदीयायां प्रथमायामार्यायामविधिरिति यद् हृतं देवतया, प्रतिभादिप्रसादितायाश्च तस्याः प्रसादेन नवीनं च व्यरचयत् तत् तार्किकशिरोमणिर्मल्लवादी[11] भृगुकच्छे राजसभायां वीरनि. सं. ८८४ (वि. सं. ४१४) वर्षे बुद्धानन्दविजेता जिनानन्दसूरिभागिनेयोऽजितयशो–यक्षयोर्बन्धुः।

सुप्रसिद्धेन याकिनीमहत्तराधर्मपुत्रेण भवविरहाङ्कहरिभद्रसूरिणा,[12] सज्जनोपाध्यायशिष्येण महेश्वरसूरिणा,[13] गूर्जरेश्वरचौलुक्यदुर्लभराज–भीमदेव–कर्णदेव–सिद्धराजजयसिंह–परमार्हतकुमारपालभूपालादीनां सौराज्ये शतशो ग्रन्थान् विरचयद्भिर्जिनेश्वरसूरि–[14] [15]जिनचन्द्रसूरि–सूराचार्या[16]भयदेवसूरि–[17]नेमिचन्द्रसूरि–[18]गुणचन्द्रगणि–[19]वर्धमानसूरि-[20]हेमचन्द्राचार्य–[21]प्रभृतिभिर्विद्वद्वरैश्च प्रसङ्गतो विहितो जिनप्रवचनादिपुस्तकलेखन–पूजन–दान–व्याख्यान–श्रवणादिश्रावककर्तव्यसदुपदेशोऽपि पठ्यते। गूर्जरेश्वरसिद्धराजजयसिंह–कुमारपालभूपाल–गूर्जरेश्वरमहामात्यवस्तुपाल–तेजःपाल–सुप्रसिद्धहेमचन्द्राचार्यादिचरित–प्रबन्धादिषु निर्दिष्टास्तत्कारिताः प्राच्यपुस्तकभाण्डागारा यद्यपि साम्प्रतं नोपलक्ष्यन्ते; तथापि तैर्गूर्जरेश्वरैस्तन्महामात्यादिभिः पृथ्वीपाल–वस्तुपाल–तेजःपालादिभिश्च समभ्यर्थ्य कारितौ[22] लेखितास्तदधिकारसौराज्ये वि. सं. ११५४ वर्षतस्तदनन्तरमपि च वि. सं. १४९७ वर्षं यावत् चिरस्थायिन्या मष्या नागरीलिप्यां मनोहरैरक्षरैर्मलवारीयं(पृ. २०१)सुचारु–ताडपत्रीयपुस्तिकासु विलिखिताः प्रभूता ग्रन्था अत्र समुपलभ्यन्ते। वस्त्रे लिखिता अपि ग्रन्था अत्र वीक्ष्यन्ते [पृ. ३४४] मन्त्रीश्वरवस्तुपालादिसन्मानितदेवेन्द्रसूरि–विजयचन्द्रसूरिप्रभृतीनां सदुपदेशेन विक्रमीयचतुर्दशशताब्द्याः प्रारम्भे मधुमत्यां(महुवा) वाग्देवताभाण्डागारकरणाय भिन्नभिन्नस्थानीयैः सुश्रावकैः कृतः प्रशस्तः प्रयत्नोऽवसीयते [पृ. ५२]

साम्प्रतं वर्तमानेषु पत्तनीयज्ञानकोशेषु सोमतिलकसूरिसंज्ञितभाण्डागारादिविधाने [पृ. २०२, २०९, २२७, २२८] सदुपदेशादिविशिष्टः प्रयत्नो वैक्रमपञ्चदशशताब्द्यां विद्यमानानां तपागच्छाधिपदेवसुन्दरसूरि–[23]सोमसुन्दरसूरिप्रमुखानां विज्ञायते। येषां पदप्रतिष्ठादिप्रबन्धोऽत्र पत्तने वि. सं. १४२०, वर्षे, १४५८ वर्षे च समहं समजनि।

अत्र विशेषतो धन्यवादमर्हन्ति [24]षष्टिपरिमिताः श्रमण्यः श्राविकाश्च जैनमहिला देवसुन्दरसूरिगुरुबन्धुजयानन्दसूरिभ्रातृजारूपल–क्षत्रियझालाकुलविजपालराज्ञीनीतादेवी–प्रभृतयः। अणहिलपाटकपत्तन–सिद्धपुर–भृगुकच्छ–स्तम्भतीर्थ–घोघा–देवपत्तन–देवगिरिप्रमुखविविधस्थानवास्तव्याभिर्विविधवंशोकेश–प्राग्वाट–श्रीमाल–पल्लीवाल–धर्कटादि–ज्ञातिविभूषणाभिरितो वर्षाणां पञ्चशत्याः प्राक् सञ्जाताभिः सत्कुलीनाभिर्याभिर्निजभर्तृ–

मातृ–पितृ–स्वसृ–श्वश्रूप्रभृतीनां पुण्यकृते ज्ञानाराधनार्थं स्व–परश्रेयोऽर्थं च प्रभूताः सिद्धान्तादिप्रतयो लेखितास्तथा च ताः पठन–पाठन–व्याख्यान–श्रवणादिकृते सद्गुरुभ्यो वितीर्णा ज्ञानकोशेषु च संस्थापिता एवं च याभिः कृतं स्वजन्मनो लक्ष्म्याश्च साफल्यम् ।

उपसंहारः प्रस्तुतायाः सूच्याः प्रकाशेन न केवलं प्रसिद्धाप्रसिद्धोपयुक्तदुर्लभप्राचीन-ग्रन्थादिपरिज्ञानम्, प्रामाणिकं समुपयुक्तमैतिह्यमपि प्रसिध्यति। यत इतः प्रतिप्रशस्ति प्रभूत इतिहासः प्रकाशतामागच्छेत् । अन्यान्यप्रशस्त्युल्लेख–प्रतिमालेख–शिलालेखादिभिरैतिहासिकैः साधनैः संमेलने सन्तोलने समन्वये चोपयुक्तो विशिष्टः प्रतिष्ठितः प्रामाणिक इतिहासः सङ्कलितो भवेत्। पृथक् पृथक् तथाविधा सङ्कलनाऽत्र दुःशका। ग्रन्थविस्तरभयतोऽपि नात्र प्रयतितम् । मन्त्रिवंशप्रशस्त्यादिविषये त्वस्माभिरन्यत्र (ओ. कॉ. रि. पृ. ११३२–४०) पृथक् प्रायति। तथा दिक्सूचनार्थं जिज्ञासुपाठकानामितिवृत्तसमुत्सुकानां समुपकृतये चास्याः परिशिष्टेऽप्रसिद्धग्रन्थाभिज्ञापकसङ्केतसङ्कलिता ग्रन्थानां वर्णानुपूर्व्या सूची क्रमानुसारिणी ग्रन्थरचना–लेखन–संवत्सरसूची तथा च स्थानविशेष–भूपाल–राज्याधिकारि–ग्रन्थकारादि-ज्ञापकभिन्नभिन्नाभिज्ञानसमन्विता इतिहासोपयोगिनाम्नां सूच्यपि वर्णक्रमेण विरच्यात्र पुरस्कृता ।

स्व. साक्षर**ची**मनलालदलालस्य निवेदन(Report)संशोधनादावत्रत्याधिकारिभिः डॉ. **वि**नयतोषभट्टाचार्यमहाशयैस्तथा विशेषनामसूच्यादौ 'मि. **म**हादेव अनन्त जोशी' इत्यनेन च प्रासङ्गिकं साहाय्यं व्यधायीत्येषां नामस्मरणमत्र समुचितम् ।

एवं 'यावद् बुद्धि–बलोदयम्' 'यथाशक्यम्' कृतेऽस्मिन्नत्युपयोगिनि कर्तव्ये गुणैक-पक्षपातिनः सज्जना हेयं परिहरन्तु, सुज्ञेयं परिजानन्तु। परिज्ञाय च समुचितं ग्राह्यं गृह्णन्तु। जीर्ण–शीर्णानामवशिष्टानां प्राचीनानामादर्शपुस्तकानामग्नि–जल–स्थल–जन्तुजातादेः परिरक्षणार्थं श्रेष्ठोपयुक्तप्राच्यपुस्तकालयविरचनार्थं सम्प्रतिसम्प्राप्य'फोटोस्टॅट मशिन'प्रभृति-साधनादिनाऽऽदर्शप्रतिकृतिबाहुल्यविधानार्थमप्रसिद्धानामत्युपयोगिनां विविधविषयविभक्तानां ग्रन्थानां प्रकाशनार्थं प्रचारार्थं च प्रयतन्ताम्। सफलीकुर्वन्तु ग्रन्थरचना–लेखन–संग्रह–संरक्षण–सूचीसङ्कलन–सम्पादन–प्रकाशन–परिश्रमम् । विधाय चैवं सम्यक् प्रथयन्तु भारतीयं विविधं विज्ञानम्। साधयन्तु स्व–परश्रेयः। वितरन्तु च सहस्रशो धन्यवादानस्य प्रयत्नस्य प्रेरक–प्रोत्साहकाय सुयशस्विने महाराजाय श्रीमते **सयाजीराव गायकवाड** महोदयायेत्याशास्ते–

वि. सं. १९९२ अक्षयतृतीयायाम् प्राच्यविद्यामन्दिरे ता. २४–४–३६ **वटपद्रे।**	**गान्धीत्युपाह्वो भगवान्श्रेष्ठितनुजो लालचन्द्रः।**

A REPORT ON THE SEARCH FOR MANUSCRIPTS IN THE JAIN BHANDARS AT PATTAN.

Ever since its foundation, Pattan has been the centre of Jainism, and under the beneficient royal patronage afforded to it in the 11th, 12th and 13th centuries, its preceptors devoted themselves to writing historical, religious, ethical, philosophical, literary and other works. Although the work was continued in the 14th, 15th and 16th centuries and still later, the works composed in the 11th to 13th centuries are of greater historical interest than those composed later on. This literary activity resulted in the formation of great libraries for collecting and preserving old, contemporaneous and new compositions.

The gift of books to the preceptors for the purpose of reading and reciting them to the people is considered a great merit among the Jains, and hence they spent in former times and are still spending a large amount of money for getting MSS. written. Kumārapāla is said to have established 21 big Bhandars, while Vastupāla, the Minister of Vīradhavala, had also founded three big Bhandars at the enormous cost of 18 crores. Rich and pious Jains also devoted a large sum of money after this for the merit of their deceased relatives. All this is evident from the important Praśastis (donor's colophons) given at the end of the respective MSS. This will account for the large accumulation of MSS. in the Jain Bhandars.

It is a matter of regret that out of the Bhandars founded by Kumārapāla and Vastupāla and other Jain Ministers, no Bhandar is at present extant. No single MS. written at the command of Kumārapāla is to be found in the Pattan Bhandars. This is accounted for by the fact that Kumārapāla's successor Ajayapāla was a great hater of Jains and Jainism, and tried his level best to destroy the Jain literature. Minister Udayana and others at that time removed the MSS. from Pattan to Jesalmere and other unknown places. The palm-leaf MSS. at Jesalmere are mainly from Pattan. The libraries founded by Vastupāla met the same fate, perhaps at the hands of the Mahomedans.

The palm-leaf collection of Sheth Hālābhāi contains a MS. of Jitakalpa-bṛhat-cūrṇi by Śrī Candrasūri copied in Samvat 1284 at the end of which there are a few verses in praise of Vastupāla. This, I think, is the only remnant of the vast collection made at the command of Vastupāla.

Leaving the past aside, I now come to the present collections in Pattan.

I. The first and foremost among these is the famous palm-leaf collection in the Saṅghavī's Pāḍā. The collection belongs to the Laghupośālika branch of the Tapāgaccha. The collection, it appears, was put in order in the time of Munindra Soma and lastly by Ṛddhisāgara in Samvat 1914. I have got the list of the MSS. prepared by him from a Jain. The list mentions three peṭis or large boxes containing altogether 434 pothis. It is only a list of titles and very incomplete and inaccurate. Some fifteen MSS. from these were taken to Surat and one MS. (on Nyāya) was stolen away. When Dr. Bühler visited Pattan, he was not allowed access to this Bhandar; but he managed to get a list prepared of this collection by Nārāyaṇa Śāstrī of Surat. But it was not done accurately as is evident from Dr. Kielhorn's report on MSS., where he has singled out only 28 important works out of which 3 only are new. Dr. Peterson also tried his best to have access to this collection and examine for himself the MSS. before publishing the list prepared by the Śāstrī but could not. The Conference office then deputed a Śāstrī to prepare a list of the Jain Bhandars at Pattan. I got that list from the Conference Office and found it to be quite unreliable. It mentions 397 pothis.

Such being the case, I decided to prepare a detailed Descriptive Catalogue of all the palm-leaf MSS., as I thought it advisable to put once for all before the learned world what this Bhandar really contained. I have not only discovered many new and important Sanskrit and Prākṛta works both Jain and Brahmanical, hithertofore either unknown or known to have been lost; but also quite an enormous bulk of Apabhraṁśa literature which, when published, would help us in pursuing an intensive study of this language, as it is the immediate source of many Indian vernaculars.

The collection was in a highly deplorable condition. But when I took up the work of cataloguing, Pravartaka Kāntivijayajī to whom I shall ever remain under a deep debt of gratitute for his kind offices in helping me to have a complete access to these MSS., put the collection in order and change the old covers and supply new ones. The keeper of the collection was very obstinate and would only lend us 20 or 30 MSS. at a time; others were lent only when these were all returned. I had, therefore, to spend not only most of the day but also half of the night in inspecting the MSS. that they may be returned in time. The collection, as now catalogued by me, contains 413 pothis; most of them contain single works though there are many which consist of more than one work. The keeper of the collection has now been furnished with a list of the MSS. in his collection with particulars of author, date of composition, and age of MS. compiled from the catalogue prepared by me.

II. The collection of the Saṅgha deposited in Vakhatajī's Śeri, Fofaliā Vādā is the largest collection at Pattan containing 2686 paper MSS. and 137 palm-leaf MSS. Most of the paper MSS. are on the whole well arranged; but 81 small palm leaf MSS. were bundled up in cloth pieces without wooden boards and cloth covers when I first saw them. Pravartaka Kāntivijayajī has now got them arranged, placed them between wooden boards and they are well taken care of. Dr. Peterson has described 76 palm-leaf MSS. of this collection in his 5th report. The following three collections are also deposited here:—

(1) The collection originally belonging to Limḍī's Pāḍā. It contains at present 425 paper MSS., some of which are rare and old. It contains the oldest paper MS. at Pattan written in Saṃvat. 1356–57.

(2) New copies of some of the rare MSS. in Pattan and elsewhere. The number of MSS. is·366.

(3) Some of the MSS. belonging to Vastā–Māṇek.

III. The collection belonging to Vāḍi Pārśvanātha's Temple contains only 4 palm-leaf MSS.; but the importance of the collection lies in the fact that, it contains a large number of paper MSS. copied from old palm-leaf MSS. about Samvat 1480–1490 under the orders of the then existing pontiff of the Kharatara Gaccha.

२०६. शतपदी by **धर्मघोष.** *प. २३२; १४½″×२″

२०७. प्रवचनसारोद्धारवृत्ति (द्वार १) by **सिद्धसेन.** प. २३१; १७″×२″

२०८. सूक्तरत्नाकर by **मन्मथसिंह.** †प. २६८; १३½″×२″

Beginning:—

ॐ नमः सर्वज्ञाय ।

जीयाज्जगन्मंगलदीपकस्य कल्याणकुंभः शिवसौधमूर्धनि ।
श्रीशारदा पद्मवनीप्रभावा न तुल्यकैवल्यमहःसमूहः ॥ १ ॥
धर्मार्थकामक्रममोक्षमुख्यद्वारानिवारामलवृत्तरत्नं ।
श्री**सूक्तरत्नाकर**नाम काव्यं विस्तारयेग्रेसरसूरिसूक्तैः ॥ २ ॥
महत्तमश्रीमथनावियोगाज्जगाम सा कामदुघानघा गौः ।
प्रकाश्यतां यत्र पवित्रवर्णाः स सूक्तरत्नाकर एव सेव्यः ॥ ३ ॥
आदौ जिनाशीर्वचनानि धर्मो नृणां भवो बाल–युव–प्रवृद्धाः ।
कुलीन–रूपान्वित–सज्जनाः स्युः स्वच्छोपकार्युत्तमवृत्त–धीराः ॥ ४ ॥
गुणी सुसंगागतसत्क्रिया त्रितत्त्वागम–ज्ञान–सुदर्शनानि ।
मिथ्यात्व–चारित्र–सुनंदयः स्युः परीपह–क्षांति–मनो–वचोगं ॥ ५ ॥
जितेंद्रिय–निःस्पृहता विवेको विनीतता स्याद् विजयः कषाये ।
साधुप्रमादो गृहिधर्म–पंचव्रती निशाभोजन–साम्य...... ॥

End:—

यस्मिन् पुष्प(ष्य)ति विश्वविस्मयकरे स्वःश्रेणिनिःश्रेणिका
द्रागंगप्रतिमां पदस्थिति सती द्वारां चतुःसप्ततिः ।
सोयं नव्यजनप्रबोधजनको धर्माधिकारः पुरः
काव्ये सर्वरहस्यवीचिनिचिते श्रीसूक्तरत्नाकरे ॥

इति श्रीसूक्तरत्नाकरनामनि महाकाव्ये धर्माधिकारोऽयं प्रथमः संपूर्णः ।
ग्रंथाग्रं ४३४० ॥ मंगलं महाश्रीः ॥ छ ॥ छ ॥ शुभं भवतु ॥

* अन्त्यं पत्रत्रयं शीर्णम् । † २,४८,११० इत्येतानि पत्राणि न सन्ति ।

विद्यासिंहतनूद्भवः सुचरितो वेजल्लदेव्यंगजः
श्रीमन्मन्मथसिंह एष विदधे श्रीसूक्तरत्नाकरं ।
नानाशास्त्रगृहीतसूक्तलहरीलीलालयं तत्र सद्-
धर्माख्यं प्रथमं समाप्तमखिलं द्वारं निदानं श्रियः ॥छ॥छ॥छ॥

Prasasti of the Donor:—

सुपर्वसरलोत्तुंगः शाखाशतसमावृतः ।
श्रीमान् श्रीमालवंशोस्ति सर्वत्रापि प्रमाणकृत् ॥ २ ॥
श्रेष्ठी जयंत इत्यासीत् तत्र मुक्तामणेः समः ।
पात्त(तू)नाम्नी च तत्पत्नी गेहलक्ष्मीरिवांगिनी ॥ ३ ॥
श्रीसंघकृत्यधौरेयाः सम्यक्सम्यक्त्वशालिनः ।
तत्पुत्राः क्रमशोऽभूवन् गुरुभक्तिभृतो ह्यमी ॥ ४ ॥
विद्वान् महणनामाद्यो मदनाख्यो महत्तमः ।
सामंतो झांझणाख्यश्च लाडणोनल्पवासनः ॥ ५ ॥
वयज्ज तेज्ज च सुते सुदुस्तपतपोंचिते ।
लाडणस्य तु ललनादेवीति दयिताभवत् ॥ ६ ॥
तत्सुता अरिसिंहाद्या एवं वंशे विवर्धति ।
श्रीरत्नसिंहसुगुरोर्लाडणो धर्ममशृणोत् ॥ ७ ॥
ततः स्वस्यै[व] पुण्यार्थी सूक्तरत्नाकरस्य तु ।
चतस्रः पुस्तिकाः पुण्या लेखयामास लाडणः ॥ ८ ॥
ज्योतिर्मुक्तावतंसा रविरजनिकरस्फारताडंकपत्रा
ज्योत्स्नाक्लृप्तांगरागा जलनिधिवसना स्वर्नदीहारयष्टिः ।
यावन्नर्नर्ति कीर्तिश्चरमजिनपतेर्विश्वरंगेत्र तावत्
मंद्रव्याख्याननादैः कलयतु तुलनां दुंदुभेः पुस्तकोयं ॥छ॥

Colophon:—

सं. १३४७ वर्षे आषाढवदि ९ गुरौ आशापल्यां महं वीरमेन श्रीरत्नाकर-पुस्तिका लिखिता ॥छ॥

२०९. त्रिषष्टिशलाकापुरुषचरित्र(पर्व २–३). प. २९५; १८ 1/4"×२"

Prasasti of the Donor:—

तन्वानं स्वकलाकलापमधिकं वर्याजवालंकृतं
लक्ष्मीर्वंशनटीव यं श्रितवती प्रेंष(ख)द्गुणाध्यासितं ।

रंगान्नोत्तरणाभिलापमकरोद् या वर्ण्यतामागता
पल्लीपाल इति प्रसिद्धमहिमा वंशोस्ति सोयं भुवि ॥ १ ॥
वंशेभवत् तत्र सोही मुक्तात्मा श्रावकाग्रणीः ।
त्रिद्यन् महामहतेजा अजाड्योपि सुशीतलः ॥ २ ॥
तस्योढा सुगुणैः प्रौढा शुभधीः सूहवाभिधा ।
पासणागस्तयोः पुत्र एक एव गुणैरपि ॥ ३ ॥
पउसिरिनाम्नी भार्या तस्याभूद् धर्मकार्यकृत् ।
तयोः पुत्रत्रयं पुत्रीद्वयं चाद्वंद्वमानसं ॥ ४ ॥
तदादिमः साजणनामधेयः समुल्लसन् निर्मलभागधेयः ।
सत्यं च शौचं कलिराजभीतं हृद्दुर्गमाशिश्रियदाशु यस्य ॥ ५ ॥
धौर्येणाद्भुतराणकप्रतिकृतिर्जज्ञे ततो राणको
दिक्चक्रं परिपूरयन् शुचि यशो निश्वासदानोदयात् ।
योसाध्यत् परलोकमाशु हृदये श्रीवीरनाम स्मरन्
सद्धर्मेण गुणान्वितेन विशिपा(खा)गोपेण सत्वोत्कटः ॥ ६ ॥
मोहादित्रयसंहर्ता तृतीय आहडोभवत् ।
जिनधर्मरक्तचेता जेता दुःकर्मजालस्य ॥ ७ ॥
आद्या तयोरद्भुतधर्मधाम पत्नी द्वितीया जसलंवनाम्नी ।
दानादिधर्मांबुनिषेकयोगैरात्मा यकाभ्यां विमलोभ्य(व्य)धायि ॥ ८ ॥
सहजमतिः सज्जनस्याभून् पत्नी पतिव्रता ।
तत्पुत्री रतधीनामा सुतौ मोहण–साल्हणौ ॥ ९ ॥
चाहडस्याथ भार्याभूत् चांदूश्चंद्रकलोज्वला ।
पंचापत्यानि तयोः क्रमादिमानीह जातानि ॥ १० ॥
तेषामाशाभिधो ज्येष्ठ आशादेवीति तत्प्रिया ।
तयोर्बभूव सगुणा जैत्रसिंहादिसंततिः ॥ ११ ॥
अद्वितीयो द्वितीयोपि श्रीपाल इति विश्रुतः ।
तत्पत्नी वील्हुका नाम्ना पुत्रो वील्हाभिधः सुधीः ॥ १२ ॥
तृतीयो धांधको नाम कलत्रं तस्य रुक्मिणी ।
लक्ष्मीप्रियः पद्मसिंहस्तुर्यो रत्नाद्यपत्यकः ॥ १३ ॥
पुत्रश्च जज्ञे ललतू लालसो धर्मकर्मणि ।
वासूश्चास्यांगना जाता व्रतान्मदनसुंदरी ॥ १४ ॥

कर्पूरी च तथा पद्मसिंहजा भावसुंदरी ।
कीर्तिश्रीगणिनीपादौ द्वाभ्यामाराधितौ मुदा ॥ १५ ॥
न्यायोपात्तस्य वित्तस्य फलं धर्मे नियोजनं ।
अनर्घ्यस्येव रत्नस्य किरीट–कटकादिषु ॥ १६ ॥
परोपकारात् त्वपरो न कश्चिदत्रास्ति धर्मो भुवनत्रयेपि ।
श्रुता ... स्थं ... व्याख्यायमानं दुरितावसानं ॥ १७ ॥
श्रीमत्कुलप्रभगुरोराकर्ण्यैवं विशुद्धमुपदेशं ।
मोहारिकदनकालः श्रीपालो धर्मसुविशालः ॥ १८ ॥
दुःप्रतिकारौ पितराविति च ज्ञात्वा पितुः सुकृतहेतोः ।
अजितादिशीतलांतं सुपुस्तकं लेखयामास ॥ १९ ॥
चतुर्भिः कलापकं ।

त्र्यग्रत्रयोदशशते शरत्सु राज्ञः श्रीविक्रमाद् विधियुतं सुधिया च तेन ।
व्याख्यापितं च सुकुलप्रभसूरिपट्टलक्ष्मीविशेषकनरेश्वरसूरिपार्श्वात् ॥ २० ॥
यावत् तारकचक्रघर्घरीधरो दिक्कुंभिशैलूषवान्
मेरुश्चारुनटः प्रताडयति तत् ज्योत्स्नालतातंतुभिः ।
वध्वा व्योममृदंगकं रवि–शशिप्रोद्यत्पुटद्वंद्वकं
तावन्नंदतु पुस्तकोयमसकृद् व्याख्यायमानो बुधैः ॥ २१ ॥

Colophon:—

संवत् १३०३ वर्षे कार्तिकशुदि १० रवावद्येह श्रीभृगुकच्छे ठ० सउधरेण पुस्तकं लिखितमिति ॥

२१०. वासुपूज्यचरित्र by चन्द्रप्रभोपाध्याय.

प. ३१२; अपूर्ण १६½"×२"

Beginning:— नमः श्रीवासुपूज्याय ।

सुहसिद्धिवहुवसीकरणपच्चला जस्स नामवन्ना वि ।
भवियाण सिद्धमंतक्खर व्व सो जयउ पढमजिणो ॥ १ ॥
कलिकालवियंभिरमोहि(ह)तमच्छाइए जए जस्स ।
रविबिम्बं पिव विप्फुरइ तित्थमिह नमह तं वीरं ॥ २ ॥
पणयजणकप्परुक्खंकुर बि(व) सिवपहपयासदीव व्व ।
कमनहकिरणा रेहंति जस्स तं नमह जिणनिवहं ॥ ३ ॥
दिसिवहुमुहसीमंते सुतणुपहा जस्स जहथामं ।
कुंकुम–सिंदूर–पसाहणाइं सो जयउ वसुपुज्जो ॥ ४ ॥

तं पणमह **सुयदेविं** मुहससिजुह्लापसंगओ जीसे ।
पायडियमु(सु)त्तिरयणो पसरइ वयणामयसमुद्दो ॥ ५ ॥
मंदस्स वि मह बुह–कवि–गुरु त्ति पयवीपरंपरा जाया ।
जाण पसाया ताणं गुरूण पयकमलमहिवंदे ॥ ६ ॥
पणमह **गोयमसामिं** अणिंदभूई वि इंदभूयि त्ति ।
जो पवरकयपबंधो वि अप्पबंधु त्ति विक्खाओ ॥
गयणं व पवयणं तमतिरोहियं पयडियं बहुपएहिं ।
जेण रविण व्व तमहं वंदे **हरिभद्द**सूरिअ(गु)रुं ॥
गंग व्व **तरंगवई** जेहिं कहा निम्मिया पवित्तपया ।
ते **सिद्धसेविय**पए **पालित्तय**सूरिणो वंदे ॥
सिरि**जीवदेव**सूरिं वंदे जस्स प्पबंधकुसुमरसं ।
आसाईऊण सुचिरं अज्ज वि मज्जंति कविभसला ॥
किं दुज्जणनिंदाए किं वा इह पत्थणाए सुयणाण ? ।
पढमा पढमं चिय पावकारिणी निप्फला इयरा ॥
कइपत्थणाइ किंचिरमग्घइ कव्वं सदूसणं लोए ।
पिउ–माइपत्थणाए ससुरकुले दूहववहु व्व ॥
अह किं इमाए चिंताए पत्थुअत्थस्स विग्घभूयाए ।
सगुणेहिं चिय कव्वं अग्घेइ सुसीलसुन्ह व्व ॥
ता थोत्तारिहथुणणो वड्डि(ड्डि)य[क]ह्लाणनिहयपच्चूहो ।
सिरिवासुपुज्जचरियं रएमि इणमो जहासत्तिं ॥
अइदुक्करं खु एयं बाहाहिं रुद्दा(द्द)समुद्दतरणं व ।
ता हसणिज्जो होहामि नूण(णं) विबुहाण अहमहवा ॥
कठिणो वि चंदकंतो ससिसाहिज्जेण जह जलं मुयइ ।
अहमिय देवयासन्निहाणओ तहमिमं काहं ॥

प. २७ अपभ्रंश—

केंव वहेसउं अज्जु लगि निययभुयाबलगव्वु ।
मिलियए मज्झि विगुत्ताह अहह ! निप्फलु सव्वु ॥

अहह जामिणि कि भणि न सखीण
जहि जम्मु अम्ह हुयउ अहव दिवहिं तहिं रवि किं वुग्गिउ
किह मंगल दिंति यहिं [अ]च्छहि निसिहि महिलहि वि जग्गि तु ।

गब्भि वि किह् न विलीण अह् जीवेण वि किन्न चत्त ?
इह् सयंवरमंडवि वि जं उवविट्ठ विगुत्त ॥

प. २९६— इति श्री**वासुपूज्यचरित्रे चंद्रप्रभोपाध्याय**विरचिते द्वितीयः सुरभवः समाप्तः ॥

२११. (१) **पश्चाशक.** प. १–९९; ९″×१¾″

(२) **सङ्ग्रहणी.** गा. ३६६ प. १–४६

(३) **बत्तीसजीवपरिमाण.** गा. २८ प. ४६–४९

Beginning:—

सिरि**वीर**जिणं नमिउं वोच्छं **ब**त्तीसजीवपरिमाणं ।
भव्वजणजाणणट्ठं रक्खट्ठं अत्तसरणट्ठं ॥

(४) **दूसमगंडिया.** गा. ११२ प. १–१९

(५) **वोच्छेयगंडिया.** गा. १७३ प. १९–४६

Beginning:—

अह् पुण सुरत्थुवंतो देसे देसे समोसरंतो ।
सो रुचा(भव्वा)रविंदभाणू **राय**गिहं पुरवरं पत्तो ॥ १ ॥

End:—

एत्थं संसारपहे कम्मारद्धो जिओ परिब्भमइ ।
पाठे(वे)ण जाइ निरयं तिरि–मणुयत्तं सकम्मेहिं ॥ १७३ ॥
वोच्छेयगंडिया समत्ता ।

Colophon:—

संवत् १२८४ वर्षे माघ वदि ५ शुक्रे समर्थिता लिखिता **पद्म**चंद्रेण ।

(६) **जंबूद्वीपसमास.** प. ४७–६१ (अपूर्ण)

२१२. (१) **उपदेशमाला.** प. १–६५

(२) **कर्मस्तव.** गा. ५७ प. ६६–७२

(३) **कर्मविपाक** by **गर्गर्षि.** गा. १६८ प. ७३–९१

(४) **सङ्ग्रहणी** (श्रीचंद्रीया). गा. २७३ प. ९२–१२६

(५) **एकविंशतिस्थानक** by **सिद्धसेन.** गा. ६४ प. १२६–१३३

(६) **नवपदप्रकरण.** गा. १३७ प. १३३–१५०

End:—

पणमामि अहं निच्चं अणसणविहिणा य निरति(इ)यारेहिं ।
जेहं कयं चिय मरणं दिट्ठंतो **खंद**एणेत्थ ॥ १३७ ॥

(७) **पोषधविधिप्रकरण** by **देवभद्र.** गा. ११८ प. १५०–१६५

End:—

पोसहविहिपगरणं रइयं सिरि**देवभद्द**सूरीहिं ।
धम्मं जस्सवद्धणकरं मुणंतु.........धम्मरया ॥

पोसहविहिप्पगरणं समत्तं ।

(८) **सुबाहुचरिय.** गा. २१९ प. १६६–१९२

Beginning:—

नमिऊण **वद्धमाणं** असुर–सुर–मणुयवंदियं सिरसा ।
वोच्छं **सुबाहुचरियं** गुरुवइट्ठं समासेणं ॥

२१३. (१) **उणादिगणविवरण** by **हेमचन्द्र.** प. १–१६६; १४½″×२″

(२) **उणादिसूत्र** (४ पाद).

inning:—

नमस्कृत्य गिरं भूरिशब्दसंतानकारणं ।
उणादयो विधास्यन्ते बालव्युत्पत्तिहेतवे ॥ १ ॥

End:—

तिजेर्दीर्घश्च । इत्युणादौ सूत्रतः चतुर्थः पादः समवसितः ।

(३) **उणादिवृत्ति.** a commentary on (२) प. १–७६

End:— इत्युणादिवृत्तौ चतुर्थः पादः समवसितः ।

Colophon:—

संवत् १२३१ वर्षे मार्ग. सुदि ८ रवौ ले. **मुंजालेन** उणादिवृत्तिपुस्तिका लिखितेति ।

(४) **वीतरागस्तव** (२० प्रकाश). प. १–२२

२१४. **प्रवचनसारोद्धार** (त्रुटित). प. १७२; १४″२¼″

२१५. (१) **दशवैकालिक.** प. १–७२

(२) **पाक्षिकसूत्र.** प. १–३१

२१६. (१) **निशीथ.** प. १–६८; ११″२¼″

(२) **व्यवहारसूत्र** (अपूर्ण). प. ६९–११०

२१७. **त्रिषष्टिशलाकापुरुषचरित्र** (नेमिचरित्र). प. ३३८+३; १४¾″×२″

Prasasti of the Donor:—

श्रीमालवंशे प्रागासीद् **देहडि**र्देहिनां वरः ।
पुण्यपाल–**देवपालौ** सुतौ तस्य बभूवतुः ॥ १ ॥

यशोनामा पुण्यपालतनयस्तस्य सूनवः ।
सांताकः सिंधुलश्चैव ऊदलः सांग एव च ॥ २ ॥
त्रयः सांताकतनया आंबडः शूर एव च ।
स लब्धो लब्धलक्षोभूत् सर्वभूतदयापरः ॥ ३ ॥
सिंधुल्लधर्मपत्न्यासीत् सूहवदेविनामतः ।
सुतः सामंतनामाभूत् यस्तत्त्वज्ञशिरोमणिः ॥ ४ ॥
अंगजौ ऊदलस्यापि आभड आसकस्तथा ।
त्रयः सांगाकसुता वीसलो वयज-देदकौ ॥ ५ ॥
चाहडो देपालसुतः सीहडश्चाहडांगजः ।
त्रयः सीहडतनयाः सांगणः सुकृतांगणः ॥ ६ ॥
सहजपालः सज्जनः सांगणांगरुहाः क्रमात् ।
शूराकः साल्हादश्चैव श्यामलः सालिगस्तथा ॥ ७ ॥
श्रीमान् विवेकसिंहाख्यः पूर्णिमापक्षमंडनं ।
तत्पट्टे श्रीरामचंद्रप्रभुः सप्रतिभोऽभवत् ॥ ८ ॥
तत्पट्टमंडनं श्रीमान् धीरसिंहाभिधः प्रभुः ।
तच्छिष्योऽभयसिंहाख्यगुरुर्भविकसंमतः ॥ ९ ॥
तस्मै स्वगुरवेदत्त पित्रोः श्रेयःकृते सुधीः ।
सामंतो नेमिचरितं पुस्तकं स्वस्तिकारणम् ॥ १० ॥
काले विक्रमतो बाण-मुनि-यक्षमिते सति ।
रोहेलायां स्थित इदं सामंतः सुकृतं व्यधात् ॥ ११ ॥

२१८. (१) उपदेशमणिमाला. गा. २५ प. १-२

Beg:—जीवदयाइ रमिज्जइ etc.

(२) मिथ्यात्वकुलक. गा. ९ प. २

Beg:—वि(चि)त्तद्धमि मह न वसी etc.

(३) नवफणश्रीपार्श्वनाथनमस्कार (अपभ्रंश). गा. ५

Beginning:—

जय चिंतामणि जयनाहु जय नवफणमंडिय
जय वाणारसिजाय कायजियनीलसिखंडिय
जय वामाइ(ए)वि-आससेणकुलनहयलभूषण
जय देवासुर-श्रमणसंघसंथुय धुयदूषण ।

ता देवदेव ! धरणिंदथुय कमठदप्प चूरंतु
पउमावइपणमियचलण मणवंछिय पूरंतु ॥ १ ॥

End:—

चेइय-सयडालघरे नवफणपासजिणिंदु ।
नमि सरवण अहिछत्रपुरे खरतर संतिसमुद्दु ॥ ५ ॥

(४) **उपदेशमाला.**	गा. ५४२	प. १–४६
(५) **गौतमपृच्छा.**	गा. ५३	प. ४६–५१
(६) **चउसरण.**	गा. २७	प. ५१–५३
(७) **आराधना कुलक.**	गा. ६९	प. ५६–६२
(८) **अणसणपच्चक्खाण.**		प. ६२ (double)
(९) **विवेकमञ्जरी.**		प. ६३–७५

Leaves 76-142 containing **विवेकमंजरी** १४४ गाथा, अर्हत**त्रिजग-स्तोत्र** श्लो० ८, **योगशास्त्र** श्लो० १६४, **वीतरागस्तव** श्लो० २००, शृणु देवि महा० **स्तोत्र** श्लो० ३३, **भक्तामरस्तव** श्लो० ४४, **आत्मानुशासन** ७८ are missing.

(१०) **पुष्पमाला** (प्रा०).	गा. ५०५	प. १४२–१८७
(११) **जम्बूद्वीपप्रकरण.**	गा. ११२	प. १८८–१९६
(१२) **गुरु(देवभद्र)स्तुति.**		प. १९६–१९७

Beginning:—

श्रीमत्तीर्थपतिप्रणीतसमयक्षीरोदचंद्रद्युतिः
सच्चारित्रपवित्रितासुरनदीनीहारभूमिधरः ।
ज्ञानश्रीकुलसद्म संयमरमाशृंगारदीक्षागुरुः
सूरीणां प्रमुखश्चिरं विजयतां श्री**देवभद्रो** गुरुः ॥

End:—

जत्थ गिहवास-पास छोडेउं सुहगुरु ! तुम्ह समीवे ।
चरणभरधुरं धरिस्समहं कइया पुण सो दिवसो ॥ १७ ॥

इति गुरुस्तुतिः ।

(१३) **चैत्यवन्दन-प्रतिक्रमणसूत्र.** प. १९७–२२५

Contain two stotras

(अ) **जिनस्तोत्र** (अपभ्रंश). गा. ९

Beginning:—

हेव सूसमु हूअ मह देव ! हिव दूसमु दूरट्ठिउ सयल रिद्धि ।

End:—

जइ वि निग्घिणु हुउं निरासंकु निल्लिज्जउ लक्खणरहिउ
जइ वि नाह ! तुह आण—चुक्कउ ।
निक्किट्ठु निट्ठुरु अह हु जइ वि सयलगुणविमुक्कउ
तह वि हु जिणवर ! कर किज्जउ एक्कउ पसाउ
अप्पण पायहं हिट्ठि पहु दिज्जउ मज्झ वि ठाउ ॥ ९ ॥

(आ) **नयगमस्तव** by **जिनप्रभसूरि.**

Beginning:—

नयगमभंगपहाणा विराहिआ गहिआ व सुपमाणा ।
भव—सिवदाणसमाणा जिणवरआणा चिरं जयइ ॥

End:—

इय विन्नत्तो जिण ए(प)हु **जिणपह**सूरीहिं जगगुरु पढमो ।
विन्नत्तीइ पसायं निव्विर्त्ति कुणउ अम्हाणं ॥

(१४) **लघुअजितशांति** (चवण–जम्मण). गा. ८ प. २२६(१)

(१५) **गौतमपृच्छा.** गा. ५२ प. २२६–२३०

(१६) **शीलकुलक.** गा. ३५ प. २३०–२३३

Beginning:—

समग्गसोहग्गमहानिहाणं नमित्तु नेमिं जियपंचबाणं ।

End:—

इच्चाइ सीलस्स महागुणाओ जाणित्तु etc.

(१७) **लघुरत्नत्रय** (नवकारेण विबोहो etc). गा. १३

(१८) **प्रश्नोत्तररत्नमाला.** प. २३३–२३७

(१९) **धर्मलक्षण.** प. २३७–२३९

Colophon:—

संवत् १३८८ वर्षे **हारी**जनगरवासं विमुच्य **व्याघ्र**पह्यां वासः कृतः । ततो व्यव० **जसभद्र** तत्सुतव्यव० **अरिसिंह** तदंगजो व्यव० **सोहड**स्तस्यांगजा व्यव० **सलषणसीह** व्यव० **कूरपाल** व्यव० **देपाल** व्यव० **षोषल** । सर्वेषां भ्रातॄणां कुटुंबेन पुण्यकर्मणा **ओसवालवीशा**विशेषेण विभूषितः । ततो व्यव० **षोषलेन** सुतधरणी—**संग्राम**प्रमुखकुटुंबयुतेन पितृष्वसुर्बा० **शो**भीश्रेयसे तस्या

एव द्रव्येण स्वाध्यायपुस्तिका स्वीयसुतसुतादिकुटुंबस्य पठन-गुणनार्थं पुस्तिका लिखापिता । नंदताच्चिरं पुस्तिकेयं ॥

२१९. धातुपारायण. प. १-२६७; १५$\frac{3}{4}$"×२"

End:—

इति आचार्यश्री**हेमचंद्र**विरचिते स्वोपज्ञ**धातुपारायणे** स्वार्थणिजन्तो णिचु-रादिगणः संपूर्णः । समर्थितं चेदं **धातु**पारायणमिति ॥

२२०. शतकचूर्णि. प. १२५; १५$\frac{3}{4}$"×२"

Beginning:—

ओं नमः सिद्धेभ्यः ।

सिद्धो णिद्धुयकम्मो सद्धम्मपणायगो तिजगणाहो ।
सव्वजगुज्जोयकरो अमोहवयणो जयइ **वीरो** ॥ १ ॥

End:—

शतकचूर्णिः समाप्ता । ग्रंथाग्र २३२२ मंगलं महाश्रीः ।

श्रीमालकुले विपुले जज्ञे श्रेष्ठी **यशोधनो** विपुलः ।
समभूत् तदीयदयिता जीवहिता **ना**गदेवीति ॥ १ ॥
सा चतुरोऽसूत सुतांश्चतुरः श्री**वच्छ** इति ततोप्यन्ये ।
सालिग-**सो**हिक-**पा**सुकसंज्ञाश्च **यशो**मतिश्च सुता ॥ २ ॥

इतश्च । अस्मिन्नेव सुपर्वणि वंशेभूदु**सभ** इति शुभः श्रेष्ठी ।
तस्य **श्री**रिति जाया तयोः सुता **वे**लुकेत्यस्ति ॥ ३ ॥
तां **सा**लिगोनुरूपां परिणिन्ये नयवतीं तयोस्तनयः ।
शोभनदेवो गुरुदेवचरणयुगकमलहंसः ॥ ४ ॥
स जनन्याः श्रेयोर्थं श्रेष्ठमतिः **शत**कचूर्णिटिप्पनकं ।
लेखयति स्म ततोदा**न्म**हिमागणिनीपठनहेतोः ॥ ५ ॥
भूमिर्नभः सुमेरुः सवितृ-शशिनौ चराचरा सु(भू)भृतः ।
यावदिह संति लोके तावदियं पुस्तिका नंद्यात् ॥ ६ ॥

२२१. (१) कल्पसूत्र. प. १-१३८

Beginning:—

(२) कालि(ल)काचार्यकथा. गा. १३२ प. १३८-१५२

अणुसरि आगमवयणं सिरि**काल**यसूरिजुगप्पहाणेहिं ।
पज्जोसवणचउत्थी जह आयरिया तह सुणेह ॥ १ ॥

End:—

सूरि वि य कालेणं जाणित्ता णियय‌आउपरिमाणं ।
संलेहण विहेउं अणसणविहिणा दिवं पत्तो ॥ १३२ ॥

कालयसूरिकथा श्लोक १६९ ॥

२२२. **द्वादशव्रतकथा** (प्रा. सं.). प. २०५; १४३/४"×१३/४"

२२३. (१) **न्यायकन्दली** by **श्रीधर.** प. १५५; १४१/२"×२१/४"

End:—

भट्टश्री**श्रीधर**कृतायां **पदार्थ**प्रवेशके **न्याय**कंदली समाप्ता ।

Colophon:—

सं. १२४२ फाल्गुनसुदि १ शुक्रे । ग्रं. ६०००

(२) **पदार्थधर्मसङ्ग्रह** (न्यायकन्दलीसूत्र). प. १५६–२००

Beginning:—

प्रणम्य हेतु**मी**श्वरं मुनिं **कणाद**मन्वतः ।
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥ १ ॥

End:—

योगाचारविभूत्या यस्तोषयित्वा महेश्वरं ।
चक्रे वैशेषिकीं विद्यां तस्मै **कण**भुजे नमः ॥

समाप्तं(प्ता) **पदार्थ**प्रवेशकाख्या कृतिराचार्यपादानां ग्रंथाग्रं ७७७ ।

Colophon:—

संवत् १२४२ फाल्गुनवदि ६ गुरौ पं० **परमचंद्रगणि**नादेशमासाद्य पं० **महादेवेन न्याय**कंदलीवृत्तिसूत्रं समाप्तमिति ॥

२२४. **योगशास्त्रविवरण** (प्रथमप्रकाश). प. १२८; १४१/४"×२१/४"

Colophon:—

संवत् १२५५ वर्षे मार्गशुदि १ रवौ अद्येह श्री**पत्तने** श्री**देवाचार्य**वसत्यां श्री**धनेश्वरसूरी**णां हेतोर्द्वादशसहस्र**योग**शास्त्रवृत्तिः परमश्रावकठक्कुर**वर्धमा**नेन **सुद**र्शनवास्तव्यपारि० **वीशल**पार्श्वात् लिखापिता । प्रथमप्रकाशवृत्तिग्रंथ १८०० अष्टादश शतानि ग्रंथसंख्या शिवमस्तु ॥

२२५. **हैमीनाममालावृत्ति.** प. २४०; १५"×२"

२२६. **शिशुपालवध** by **माघ.** प. १८५; १५१/४"×२१/४"

End:—

दत्तकसूनोर्माघस्य कृतौ **शिशुपालवधे** महाकाव्ये श्र्यंके विंशतितमः सर्गः ।

२२७. (१) **योगशास्त्र** (१२ प्रकाश). प. १२९; १३″×२″

(२) **वीतरागस्तव.** प. १३०–१५५

(३) **साम्यशतक** by **अभयसिंहसूरि**शिष्य (?) प. १५७–१७१

(४) **सुभाषितसमुच्चय** (**यो**गशास्त्रवृत्त्यन्तर्गत). प. ७३–१६२

Beginning:—

आचार्यश्री**हे**मचंद्रविरचिते द्वादशप्रकाशप्रमाणश्री**यो**गशास्त्रसूत्रस्य आद्यचतुः-प्रकाशानां वृत्तिमध्यात् साधु–श्रावकादिजनस्योपयोगीनि भणित्वा पठनाय वाचनाय च । यथाश्रुतधरैराकृष्ट आंतरसुभाषितानि यथा ।

End:—

इति **यो**गशास्त्रवृत्तिमध्यात् **सु**भाषितसमुच्चयः ॥ एवं समस्तग्रंथ ८०० अत्रांतर-श्लोकाः ४३० । शिवमस्तु ।

(५) **अभिधानचिन्तामणि** (१ काण्ड). प. १६३–१६८

Beginning:—

अभिधानचिंतामणिनाममालायां देवाधिदेव–प्रथमकांडात् प्रथमतस्त्रयोविंशति-श्लोकान् विमुच्य अग्रेतनश्लोका विलिख्यंते यथा ।

End:—

इति आचार्यश्री**हे**मचंद्रविरचितायाम**भि**धानचिंतामणिनाममालायां देवाधिदेवः प्रथमः कांडः ॥

(६) **हस्ति(पुण्य)पालस्वप्न** by **हेमचन्द्र.** प. १६९–१७३

Beginning:—

श्री**हे**म० त्रि० चरितानां मध्यात् श्री**म**हावीरचरिते (पर्व १०, स. १३) अष्ट-स्वप्नानां श्री**म**हावीरस्यैव मुखेन कथितविचारो यथा ।

End:— इति स्वप्नफलं ।

(७) **प्रश्नोत्तररत्नमाला.** प. १७४–१७७

(८) **धर्मलक्षण.** प. १७७–१७९

(९) **प्रशमरति.** प. १८०–२२१

Colophon:—

संवत् १३०३ वर्षे भाद्रवावदि १०

(१०) **तत्त्वार्थाधिगम.** प. २२२–२४९

(११) **अन्ययोगव्यवच्छेदद्वात्रिंशिका.** प. २५०–२५८

२२८. (१) **उपदेशमाला.** प. १–६७; १४″×२″

(२) **मूलशुद्धिप्रकरण** by **प्रद्युम्नसूरि.** गा. २१२ प. ६८–९३

२२९. अनुयोगद्वारचूर्णि by **जिनदासगणि.** प. १५८; १२¾″×२″

End:—

कृतिः श्रीश्वेतांबराचार्यश्रीजिनदासगणिमहत्तरपूज्यपादानां **अनुयोगद्वाराणां** चूर्णिः ।

२३०. (१) **पाक्षिकसूत्र.** प. ३२

(२) **दशवैकालिक.** प. १–६७

(३) **पिण्डविशुद्धि** by **जिनवल्लभ.** प. ६८–८०

२३१. आवश्यकनिर्युक्ति (प्रा०). गा. २५०० प. २०२; १४″×२″

Colophon:—

संवत् १२१२ मागसिरसुदौ १० रवौ लिखितेयं उमता व्यास (?वास्तव्येन) ।

Donor's Prasasti:—

आसीत् प्राग्वाटवंशे विमलतरमतिर्विश्वविख्यातकीर्तिः
सद्बुद्धिर्वाहलाख्यो जिनपतिचरणाराधने न्यस्तचित्तः ।
तस्याभूत् साधुशीला जिनमतिगृहिणी धर्ममार्ग[प्रवृत्ता]
या शक्ता जानकीव प्रवरगुणगणै रामदेवस्य मान्या ॥ १ ॥
जातौ तस्याश्च पुत्रौ विनय-नयपरौ ग्रामणीः श्रावकाणां
एकः सद्यक्षदेवः प्रकटगुणगणः......द्वितीयः ।
ज्येष्ठस्याभूत् सुपत्नी जिनवृपकलिता भोयणीये (?)...
दीनानाथादिदाने वितरणचतुरा क्षान्ति-दान्तिप्रसन्ना ॥ २ ॥
सुता जातास्तस्यास्त्रय नरगुण............
यशोदेवश्चाद्यः प्रथितगुणदेवाख्य इतरः ।
[तृती]यो जिका(ह्वा)ख्यो जिनपतिमतभावितमतिः
सुता जासीत्याख्या विनयकलिता कर्मनिरता ॥ ३ ॥
कु......प्रयापेमतुलं मात्रा निजश्रेयसे
संशुद्धं भणितेन पुस्तकं सदा जिह्वाभिधेन स्फुटं ।
श्रेष्ठं लेखितमागमस्य विबुधैर्द्वैधा सुमान्यं सदा
नानावर्णसुपत्रप...............रत्नाकरं ॥ ४ ॥
यावत् तारकनायकौ दिनकरौ देवाचलस्तोयधि-
र्यावज्जैनमतं वरं सुरनदी स्वर्गो दिशां मंडलं ।

यावच्छेषफणावलिषु जगती...............
स्तावन्नंदतु पुस्तकं प्रतिदिनं पापठ्यमानं बुधैः ॥ ५ ॥

२३२. द्व्याश्रयकाव्यवृत्ति (८ सर्ग) by **अभयतिलक.**
प. २८४-?; १८$\frac{3}{4}$"×२$\frac{1}{2}$"

Contains paintings one of Hemachandra and another of Kumarapala.

२३३. पञ्चवस्तुक by **हरिभद्र.** गा. १९०० प. १८२; १४"×१$\frac{1}{2}$"

End:—

इय पंचवत्थुगमिणं उद्धरियं रुद्दसुयसमुद्दाओ ।
आयाणुस्सर[ण]त्थं भवविरहं इच्छमाणेणं ॥
गाहग्गं पुण एत्थं गणिऊण ठावियं एयं ।
सीसाण हियट्ठाए सतरस सयाणिं पाएण ॥ १७०० ॥
पंचवस्तुकं समाप्तं ।

२३४. (१) **कल्पसूत्र.** गा. १२१६ प. १४५
(२) **कालिकाचार्यकथा** (सं.). प. १४६-१५५

Beginning:—

पर्वेदं भाद्रपंचम्याश्चतुर्थ्यामभवद् यतः ।
श्रीमत्कालिकसूरीणां तेषां वक्ष्ये कथामहं ॥ १ ॥

End:—

नत्वा नुत्वा च सौधर्मं गते शक्रे गणेश्वरः ।
तत्क्षमाश्रवणेनैवानशनी त्रिदिवं ययौ ॥ ७३ ॥
पृथक्त्व ५ पक्ष २ यक्षादि १३ श्रेष्ठी प्रद्युम्नः कथां व्यधात् ।
प्रार्थितो मोढगुरुणा श्रीहरिप्रभसूरिणा ॥ ७४ ॥
॥ श्रीकालिकसूरिकथा समाप्ता ॥

श्रियो गृहे घोषपुरीयगच्छे सूरिः प्रमाणंद इति प्रकृष्टः ।
बभूव पूर्वं गुणरत्नखानिः सुचारुचारित्रपवित्रगात्रः ॥ १ ॥
विजयचंद्रगुरुः प्रवरो गुणी श्रुतमहोदधिरस्य पदेभवत् ।
अखिलधर्मसुकर्मविधायको गुरुरिव प्रतिभाति विचक्षणः ॥ २ ॥
तत्पट्टपूर्वाचलमौलिभानुर्दुर्वारमाररिपुशातनपंडितो यः ।
श्रीभावदेवः प्रबभूव सूरिः पदे तदीये श्रुत-शीलयुक्तः ॥ ३ ॥

ततो जराभीरुजयी समस्ति **जयप्रभः** सूरिवरोऽस्य पट्टे ।
अर्कः प्रतापेन च चंद्रमासौ कलाकलापेन बुधस्तु बुद्ध्या ॥ ४ ॥
हुडापाद्रपुरेऽप्यस्ति श्रीमान् **पार्श्व**जिनेश्वरः ।
तस्य **गो**ष्ठिपदे ख्यातो वंश एपः प्रकीर्त्यते ॥ १ ॥
प्राग्वाटवंशे भुवनावतंसे विख्यातनामाऽजनि **चा**सपा सः ।
तद्गेहिनी **जा**सलदेवीनाम्नी तत्कुक्षिजातास्तनयास्त्रयोऽमी ॥ २ ॥
सर्वलक्षणसंपूर्णाः सर्वधर्मसमन्विताः ।
सहदेवश्च पे(खे)ताको **ल**खमाकः सहोदराः ॥ ३ ॥
सहदेवस्य च पत्न्या **ना**गलदेव्याः सुतौ शुभौ जातौ ।
आमाह्वौ विख्यातौ धर्मधुराभारवाहने दक्षौ ॥ ४ ॥
आमाकपत्नी जिनधर्मतत्परा **रं**भा सुशीला सुगुणा सुवंशजा ।
तत्कुक्षिजातास्तनयास्त्रयो वरा धर्मार्थकामा इव जंगमा भुवि ॥ ५ ॥
मुहुणा **पू**नाकेन च **हृ**रदेवसमन्वितेन पुण्यवती ।
मातुः पितुः श्रियोऽर्थं प्रददौ **क**ल्पस्य पुस्तिका गुरवे ॥ ६ ॥

२३५. (१) **उपदेशमाला.** गा. ५४२ प. ४९
(२) **धर्मोपदेशमाला.** गा. १०० प. ४९–५५
(३) **पञ्चकल्याण** (प्रा०). प. ५५–७०

End:—

चवणं जम्मण निक्कमण तह य नाण निव्वाणं ।
कल्लाणपंचएणं जिणिंदइंदेहिं निम्मवियं ॥ ५१ ॥
पंचकल्लाणं समात्तं ।

(४) **मूलशुद्धिप्रकरण** by **प्रद्युम्न.** गा. २१२ प. ७०–८६
(५) **जम्बूद्वीपप्रकरण** (प्रा. नमिऊण सजल०). प. ८६–९४
(६) **जीवदयाप्रकरण** (प्रा०). प. ९४–१०५
(७) **नवपदप्रकरण** (प्रा०) by **जिनचन्द्र.** प. १०५–११९
(८) **वन्दित्तु** (प्रा०). गा. ५० प. ११९–१२४
(९) **विवेकमञ्जरी** (प्रा०) by **आसड.** प. १२४–१३७
(१०) **योगशास्त्र** (४ प्रकाश) by **हेमचन्द्र.** प. १–३८
(११) **वीतरागस्तव** (२० प्रकाश). प. ३९–५४
(१२) **प्रशमरति.** प. ५५–८१

२३६. प्रवचनसारोद्धार (जीर्ण श्लिष्ट त्रुटित). प. २०७

२३७. **विजयचन्द्रकेवलिचरित्र** (प्रा. अपूर्ण). प. ६–७९

२३८. (१) **दशवैकालिकलघुवृत्ति** (अपूर्ण). प. १८०

(२) **पन्नवणा** (प्रथमखण्ड त्रुटित). प. १५५–२३२

२३९. (१) **आर्द्रकुमारकथानक** (प्रा० पद्य). प. १–८; १५"×२½"

Beginning:—

अप्पं पि भावसल्लं अणुद्धियं राय–वणियतणएहिं ।
जायं कडुयविवागं किं पुण बहुयाहिं पावाइं ? ॥ १ ॥

End:—

उग्गं काऊण तवं उप्पाडिऊण केवलं नाणं ।
ता अद्दयमुणिसीहो पत्तो मोक्खं परमसोक्खं ॥ १५९ ॥

(२) **वङ्कचूलकथा** (प्रा. गद्य सचित्र). प. ९–१६

Beginning:—

थोवो वि कओ नियमो कल्लाणपरंपराए सुहहेउ ।
संपज्जइ अन्नभवे दिट्ठंतो रायहंसाइं ॥

तेणं कालेणं etc.

End:—

साहुणा दिण्णो पडिच्छेओ ताहिं भत्तिए ॥

वंकचूलकथा समत्ता ।

(३) **मनःस्थिरीकरण.** प. १६–२५

(४) **सारसङ्ग्रह** (प्रा०). प. २५–३२

Beginning:—

सद्दी(सिद्धी) कम्माभावे सो तवसा तत्थ वी(वि) वरं नाणं ।
तं पि य संपि(चि)यधम्मं तत्तवियारो तहिं सारो ॥

End:—

इय धम्मसूरिसुगुरूवएसओ सिरि**महिंद**सूरीहिं ।
कइवयथूलपयाऊ संकलियं **बारचुलसीए** ॥

आउ(?)संग्रहो समत्तो ॥

(५) **शाश्वतचैत्य** (प्रा० अपूर्ण). प. ३२–३६

Beginning:—

उसभाईजिणपडिमं एकं पि ण्हवंत–पूययंतेहिं ।
चिंतेयव्वं एयं भवेहिं विवेगमंतेहिं ॥

(६) **आहारविशुद्धि** (प्रा० मध्ये त्रुटित). प० १२८–१५७

Beginning:—

जीवा सुहेसिणो तं सिवंमि तं संजमेण सो देहे ।
सो पिंडेण सदोसो सो पडिकुट्ठो इमो नेय ॥
आहाकम्मुद्देसिय–पूइयकम्मे य मीसजाए अ ।
ठवणा–पाहुडियाए पाओयर–कीय–पामिच्चे ॥ २ ॥

Contains Gujarati translations rendered from Prakrit.

प. १३५–सीका हेठइ दोरउ बांधिवउ । हिट्ठिलउ दोरउ ऊपलउ वेउ हाथि धरेवा । जउ पाणिउ प्रत्यासन्न खरउ खरउं सीकं गियउ होइ तउ हेट्ठिलउ दोरउ ताणेवउ । जिम्व पाणिउं पाणिय मिलइ किम्वइ तहिं ठावि वातणं न लाभइं त क्षीरवृक्ष-हेठइ नेउ पात्रु मेल्हइ अथवा पात्रु दुर्लभु त खापरउं नवउं पाणीइ अचेतनि भीजविउ जिव सचित्तु पाणिउ तहिं आवट्टइ नहिं इं ति नववटवृक्षादिकहेठइ तहिं घाति उपरि ठवइ । अथवा जइ खापरउ न संपजइं त चीखलमाज्झि खावउ खणिउ वटादिपत्र नालु करि उपरि ठवइ ऊपरि पत्रादि छाया करइ पाषती म्लांखरेवा विकरइ ।

प. १३७–अम्हि जाणाउं वइद तउ पइलउ वइद पासि पूछइ अथवा भणइ अम्ह अमुकइं औषधि एउ रोगु उपसांतउ । × ×

वलियउ विहरेवा गियउ भणइ जइ हउं तइं देखउं तउ मुज्झु आपणी माता आपणउ पिता भाइउ वेटउ वहिन वेटी सांभलइ इत्यादि । पश्चात् संबंधे संस्तवो यथा–जउ हउं तुम्हि देखं तउ मुझ आपणा सासू सुसरादिक सांभलइ । माय पीय पुव्वसंथव सासू सुसराइयाण पच्छाउ । × × ×

(७) **आराधना** (प्रा० त्रुटित). प. १५८–१६७

२४०. पञ्चतीर्थि आलेखपट.

Colophon:—

(१) संवत् १४९० वर्षे का० व० ३ चंपकनेरवासिप्राग्वाटसा० खेताभा० लाडी सा० गुणेयकेन लेखकारिता ।

Colophon:—

(२) संवत् १४९० वर्षे का० व० ३ चंपकनेरवासि मं. तेजाभा० भावदेसु-तको० बाघाकेन प्राग्वाटज्ञातीयेन श्रीशांतिनाथप्रासादालेखः कारितः ।

२४१. (१) **न्यायावतारसूत्र.** प. १–२; १३″×२″

(२) **न्यायप्रवेशकसूत्र.** प. २–६

(३) **न्यायावतारवृत्ति** (त्रुटित). ३०–६८

(४) **अन्ययोगव्य० द्वात्रिंशिका** (अपूर्ण) by **हेमचन्द्र.** प. १–५

२४२. (१) **श्रावकव्रतग्रहण** (प्रा० अपूर्ण) by **जयसिंहसूरि.** प. १–६; १५"×२"

Beginning:—

नमः श्रीवर्धमानाय ।

नमिऊण वद्धमाणं सुरअसुरनरिंदाविंदकयमाणं ।

गिण्हामि सावयाणं वयाणि संमत्तमूलाणि ॥ १ ॥

End:—

सिरिजयसिंहमुणीसर Following Folio missing

(२) **त्रिषष्टिध्यानकुलक**(प्रा०). गा. ३७ प. १–२

Beginning:—

नमिऊण जिणं वीरं वोच्छं ते व(च)डिअसुहज्झाणाणं ।

आहरणसंगहमिणं सुमरणहेउं गुरुवएसा ॥ १ ॥

End:—

सव्वत्थ बिंदुजोगो पाविय भावाउ इत्थ विन्नेउं ।

अन्नाण ज्झाणंमी पाई पाढो वि कत्थेवं ॥ ३७ ॥

त्रिषष्टिध्यानकुलकं समाप्तं ॥

(३) **चउद्दसगकुलग** (प्रा०). गा. ४० प. २–३

Beginning:—

जीवगुणठाण–मग्गण अजीवउवगरणरयणसुयसिद्ध ।

कप्पाइयसुरेसरसंपत्ति समत्तकामगई ॥ १५ ॥

End:—

चउद्दसगकुलगमेयं जो जाणेइ सद्दहेइ ज्झायइ य ।

सो लोयग्गपइट्ठियसिरिसिद्धसमंनिओ होइ ॥ ४० ॥

(४) **प्रकीर्णक** (पञ्चमहाव्रतादिविषये प्रा० सं०).

२४३. (१) **उपदेशमाला** (प्रा०). गा. ५४१ प. १–७७; ८"×१½"

(२) **सङ्ग्रहणी** (प्रा०) by **चन्द्रसूरि.** गा. २७३ प. १–४५

(३) **सकलतीर्थस्तोत्र** (प्रा०) by **सिद्धसेनसूरि.** प. १००–१०४

Beginning:—

संसारतारयाणं तियसासुरमणुयवंदि[य]कमाणं ।

तित्थयराणं तिहुयणचेइयभवणे नमंसामि ॥ १ ॥

सम्मेयसेल–सेत्तुज्ज–उज्जिले अब्बुयंमि चित्तउडे ।
जालउरे रणथंभे गोपालगिरिंमि वंदामि ॥ १९ ॥
सिरिपासनाहसहियं रम्मं सिरिनिम्मियं महाथूभं ।
कलिकाले वि सुतित्थं महुरानयरीउ(ए) वंदामि ॥ २० ॥
रायगिह–चंप–पावा–अउज्झ–कंपिल्लहृणपुरेसु ।
भद्दिलपुरि–सोरीयपुरि–अंगइया–कन्नउज्जेसु ॥ २१ ॥
सावत्थि–दुग्गमाइसु वाणारसीपमुहपुव्वदेसंमि ।
कम्मग–सिरोहमाइसु भयाणदेसंमि वंदामि ॥ २२ ॥
राजउर–कुंडणीसु य वंदे गज्जउर पंच य सयाइं ।
तलवाड देवराउ रूउत्तदेसंमि वंदामि ॥ २३ ॥
खंडिल–डिंडूआणय नराण–हरसउर खट्टऊदेसे ।
नागउरमुविदंतिसु संभरिदेसंमि वंदेमि ॥ २४ ॥
पल्ली–संडेरय–नाणएसु कोरिंट–भिन्नमाले(ले)सु ।
वंदे गुज्जरदेसे आहाडाईसु मेवाडे ॥ २५ ॥
उवएस–किराडउए वि जयपुराईसु मरुमि वंदामि ।
सच्चउर–गुड्डुरायसु पच्छिमदेसंमि वंदामि ॥ २६ ॥
थाराउद्दय–वायड–जालीहर–नगर–खेड–मोढेरे ।
अणहिल्लवाडनयरे व(च)ड्डावल्लीय बंभाणे ॥ २७ ॥
निहयकलिकालमहियं सायसयं सयलवाइथंभणए ।
थंभणपुरे कयवासं पासं वंदामि भत्तीए ॥ २८ ॥
कच्छे भरुयच्छंमि य सोरट्ठ–मरह[ट्ठ]–कुंकण–थलीसु ।
कलिकुंड–माणखेडे दक्षि(क्खि)णदेसंमि वंदामि ॥ २९ ॥
धारा–उज्जेणीसु य मालवदेसंमि वंदामि ।
वंदामि मणुयविहिए जिणभवणे सव्वदेसेसु ॥ ३० ॥
भरहयि(म्मि) मणुयविहिया महिया मोहारिमहियमाहप्पा ।
सिरिसिद्धसेणसूरीहिं संथुया सिवसुहं देंतु ॥ ३२ ॥

सकलतीर्थस्तोत्रं समाप्तं ।

(४) **श्रावकविधि** (प्रा०) by **धनपाल.** गा. २३ प. १०५–१०८

Beginning:—जत्थ पुरे जिणभवणं etc.

(५) **धर्मोपदेश** (अपभ्रंश). गा. ७

End:—

जेण न चिंतिउ गुरुवयणु अ[ब्भ]सिउ न जिणधम्मु ।

काइ किज्जइ तिणि......हि बंध बहुविहु कम्मु ॥ ७ ॥

(६) **आत्मशुद्धिस्तव.** ग्रं. ९

End:—

अथेहं सुकृतं पारभविकं दुष्कृतं त्यजन् ॥ आत्मशुद्धिस्तवः समाप्तः ।

(७) **स्तव** by **हरिभद्र.** श्लो० २०

Beginning:—

त्वत्सेवानिरतांस्त्वदर्पितदृशस्त्वत्संकथासंस्थितान् ।

त्वद्भक्तांस्त्वदनन्यसक्तमनसस्त्वत्तो न चान्यार्थिनः ॥

End:—

न स्वप्नेपि जिन! त्वदंघ्रिकमलद्वंद्वादृतेन्वेमि वा

नाथैतन्मम कुर्वतः प्रतिदिनं यत् किंचिदप्यस्ति तद्

यन्नास्त्येव हि नास्ति तत् तदपि च त्यक्ष्यामि नैतद्व्रतं ॥ २० ॥

हरिभद्रविरचितः स्तवः ।

(८) **कायस्थितिस्तवन.** गा. १३

Beginning:—

यद्दर्शनमप्राप्ता भ्रमंति भवसागरे यथा जीवाः ।

कायस्थितिक्रमेण श्रीवीरमहं तथा स्तोष्ये ॥

End—

एवं कालमनंतं भ्रांतोहं शासने तवादृष्टे ।

शासनदाने भवता प्रसीद मम वीरजिनराज! ॥ १३ ॥

इति कायस्थितिस्तवनं समाप्तं ॥

(९) **साधुगुण** (?).

२४४. (१) **सङ्ग्रहणी** by **श्रीचन्द्र.** ८½"×१¼"

Colophon:—

सं० ७१ द्वि० श्रा० शु० ३ गुरौ ठ० राजडेन लिखितं ।

(२) **यमकस्तुतिवृत्तिका** on the original text of **सोमसूरि.**

गा. ५६ (अपूर्ण).

Beginning:—

ॐ नमो वीतरागाय ।

जाड्यध्वंसकृते नत्वा नाभेयप्रमुखान् द्विजा(जिना)न् ।

आत्मनः स्मृतये वक्ष्ये यमकस्तुतिवृत्तिकां ॥ १ ॥

क सोमसूरिस्तुतयो गभीराः क मादृशः स्वल्पधियस्तथापि ।
तदर्थजिज्ञासनकौतुकेन समुत्सुका मे क्रियते मनीषा ॥ २ ॥

इह हि जन्म–जरा–मरणजलकल्लोलमालाकुलापारसंसारपारावारमध्यवर्तिजंतुना etc.

The orginial seems to be by Somaprabha. The commentator is not known as the MS is incomplete.

End:—

कैरवबोधसोमप्रभासमा न अच्छा अनच्छा अनच्छा स्निग्धा......चासौ विभा दीप्तिश्च अनच्छविभा अनच्छविभा अलकानां केशानां The last folio is torn.

२४५. (१) कल्पसूत्र(प्रा०). ग्रं. १२१६; प. १–१३८; ११$\frac{1}{2}$"×१$\frac{3}{4}$"
(२) कालकाचार्यकथा (प्रा० पद्य). प. १३९–१७९

Beginning:—

नमो सुयदेवयाण । अत्थि इहेव जंबुदीवे भारहे वासे धरावासं नामं नयरं ।

End:—

कालिकाचार्यकथानकं समाप्तं । ग्रंथाग्रं कथानिकाया ३६० एवं ग्रंथ १५७६.

२४६. (१) योगशास्त्र (४ प्रकाश) by हेमचन्द्र. प. १–६७
(२) वीतरागस्तव (२० प्रकाश). प. ६७–९५
(३) प्रशमरति by उमास्वाति. प. १–३७
(४) वन्दित्तुसूत्र. प. ३७–४३
(५) प्रकीर्ण (अतिचार, लघुशान्ति).
(६) धरणोरगेन्द्रस्तोत्र by वादिदेवसूरि. गा. ३५ प. ४३–४८
(७) भयहरस्तोत्र by मानतुङ्ग. प. ४८–५१
(८) संसारदावानलस्तुति. प. ५१–५२

२४७. (१) हैमलघुवृत्ति (चतुष्कावचूरि सं.). प. १५८
(२) ,, (आख्यातावचूरि सं.). प. ८१

२४८. (१) दशवैकालिक. प. १–५९
(२) पाक्षिकसूत्र. प. ६०–८५
(३) यतिप्रतिक्रमणसूत्र. प. ८५–९३
(४) अजितशान्ति. प. ९४–१००
(५) सुभद्राचरित्र (अपभ्रंश) by अभयगणी. प. १०१–१०९

Beginning:—

पणमेविणु जिणु **संति** जगसंतिहिकारु ।
भवियइं सिवसुहकारु भ...... ॥ १ ॥

सिरि**सुभद्रा**चरिउ कहेवी गरुआएसिहिं सुणि संखेवी ।
अत्थि पुरी पोराणा नामिहि **चंपा**उरी धण–कण–रयणसमिद्धा नोपइ **अमराउर** ।

जीयसत्त तहिं नरगणइंदु अरिगण–मयकुलमलणमइंदू ॥
तहिं पुरि निवसइ सेट्ठी जिणसासणि भत्तू जीवाईण विहत्तू नामिहि **जिणदत्तू** ॥ ३ ॥

धूया तस्स **सुभद्दा** नामं सव्वगुणाणं जं किर थाणं ।
किं बहुणा भणिएणं जो सीलु धरेइ तेण वि तीसनरिंदा पय–भत्ती करेइ ॥ ४ ॥

End:—

अंनु वि सीलु विसिद्धि(ट्ठ)उ पालउ जो किर इच्छइ सिवपुरि आलउ ।
जोउं **सुभद्दह** चरिउं पढउ मण–भाविहिं सो सीलं पालंतउ सलहउं ॥ ५ ॥

सीलं पालिवि सिद्धिहि गच्छइ **अभय**गणी वि ठाउं तं इच्छइ ।
संवच्छर **इगसट्ठे** आसोअे मासे कि............... ॥

(६) **ऋषभपञ्चाशिका.**

(७) **अजितशान्ति.**

२४९. उपदेशकन्दलीवृत्ति by **बालचन्द्र.** प. २८९; ११"×२½"

२५०. ऋषभपञ्चाशिकावृत्ति (मध्ये त्रुटिता) by **प्रभानन्द.** प. १६६; १२"×१½"

Beginning:—

नमः परमात्मने ।

जयति विजितांतरारिप्रोन्मीलद्विमलकेवलालोकः ।
प्रकटिततत्त्वः स्तुतिमुखरसुरपति**र्जिन**पतिः **प्रथमः** ॥ १ ॥

क्व गभीरेयं भणिति**र्धनपाल**कवे**र्युगा**दिजिनविनुतौ ।
विवरणकरणकृतमतिस्तस्यां क्व जडमतिर्मादृक् ! ॥

स्वगुरूपदेशलेशाद् वक्ष्येहं तदपि किमपि लेशेन ।
आख्यातुमिह विशेषं विदुषामन्तर्मुखमतीनाम् ॥

End:—

समाप्तेयं **ऋषभपंचाशत्** नाम श्रीधनपालकविविरचिता **युगादिजिनस्तुतिर्ल**-
लितोक्तिनाम्नी श्रीप्रभानंदाचार्यविरचिता तद्वृत्तिश्चेति ।

चांद्रे कुलेस्मिन्नमलश्रीरित्रैः प्रभुर्बभूवाभयदेवसूरिः ।
नवांगवृत्तिच्छलतो यदीयमद्यापि जागर्ति यशःशरीरं ॥ १ ॥
तस्मान्मुनींदुर्जिनवल्लभोथ तथा प्रथामाप निजैर्गुणौघैः ।
विपश्चितां संयमिनां गणे च धुरीणता तस्य यथाधुनापि ॥
तेषामन्वयमंडनं समभवन् संजीवनं दूषमा-
मूर्च्छालस्य मुनिव्रतस्य भवनं निःसीमपुण्यश्रियः ।
श्रीमंतोभयदेवसूरिगुरवस्ते यद्वियुक्तैर्गुणै-
र्द्रष्टुं तादृशमाश्रयांतरमहो ! दिक्चक्रमाक्रम्यते ॥
यतिपतिरिह देवभद्रनामा जयति तदीयपदावतंस एषः ।
विषमविषयरोगसंनिपाते दधति रसायनतां वचांसि यस्य ॥
शिष्यस्तदीयः प्रतिभाभिरामः श्रीमान् प्रभानंदमुनीश्वरोस्ति ।
स निर्ममे वृत्तिमिमां युगादिभर्तुः स्तुतावत्र सुखावबोधां ॥

इति श्वेतांबरश्रीमद्देवभद्राचार्यशिष्यश्रीप्रभानंदाचार्यविरचिता ललितोक्तिनाम्नी ऋषभपंचाशद्वृत्तिः परिसमाप्तेति ॥

सुललितमतिर्विनीतः प्रारंभात् प्रभृति विवरणेमुष्मिन् ।
लिखनादौ साहाय्यं विदधे सोमप्रभमनीषी ॥

२५१. (१) **उपदेशमाला.** गा. ५४० प. १–५०; १३"×१$\frac{3}{4}$"
(२) **धर्मोपदेशमाला** (सिज्झउ०). गा. १०१ प. ५१–६०
(३) **मूलशुद्धि** by **प्रद्युम्न**सूरि. गा. २१२ प. ६१–७९
(४) **क्षेत्रसमास** (नमिऊण सजलजलहर०). गा. ९० प. ८०–८७
(५) **नवपदप्रकरण** by **जिनचन्द्र.** गा. १४० प. ८८–१००
(६) **भावना.** गा. २०८ प. १०१–१२१

Beginning:—

पढममणिच्चमसरणय संसारो एगया य अण्णत्तं ।
असुइत्तं आसंवरो य तह निज्जरा नवमी ॥

End:—

संमत्तंमि उ लद्धे विमाणवज्जं न बंधए आउं ।
जइ वि न संमत्तजढो अहवा बद्धाउओ पुव्विं ॥ २०८ ॥

भावणा समत्ता ॥

(७) **सुबाहुचरिय.** प. १२२–१४२

Beginning:—

नमिऊण महावीरं ससुरासुर–मणुयवंदियं सिरसा ।
वोच्छं सुबाहुचरियं etc.

(८) **जीवदयाप्रकरण**(प्रा० अपूर्ण).

२५२. **उत्तराध्ययन.** प. १६१; १४½′×२¾″

२५३. **प्रवचनसारोद्धारवृत्ति** (अपूर्ण) by **सिद्धसेन.**
प. २२१–२७२; १६½″×२″

२५४. **सिद्धहैमलघुवृत्त्यवचूरि**(अ. १–३½). प. २०६; १४″×२″

२५५. (१) **उपदेशमाला.** गा. ५४४ प. ४८; १३¼″×१¾″
(२) **पिण्डविशुद्धि** by **जिनवल्लभ.** गा. १०४ प. ४९–५७
(३) **विवेकमञ्जरी** by **आसड.** प. ५७–६९
(४) **क्षेत्रसमास** (जम्बूद्वीपप्रकरण सजलजलहर०). प. ७०–७६
(५) **स्थविरावली.** गा. ५१ प. ७६–८१
(६) **प्रव्रज्याविधान.** गा. ३१ प. ८१–८४
(७) **आराधनाकुलक.** गा. ६९ प. ८४–८९
(८) **शीलोपदेशमाला.** गा. ११५ प. ८९–९९
(९) **श्राद्धदिनकृत्य.** गा. ३४४ प. ९९–१२५
(१०) **गौतमपृच्छा**(नमिऊण०). गा. ५४ प. १२५–१२९
(११) **बृहच्चतुःशरण** (प्रा०). गा. ६३ प. १२९–१३४
(१२) **धर्मोपदेशमाला.** गा. १०३ प. १३४–१४२
(१३) **महावीरस्तोत्र** (प्रा०). गा. २० प. १४२–१४४

Beginning:—

जइज्जा समणे भयवं महावीरे जिणुत्तमे ।
लोगनाहे सयंबुद्धे लोगंतिअविबोहिए ॥

(१४) **कुसुममाला** (प्रा०) by मलधारिहेमचन्द्र. प. १४३–१८७
(१५) **भवभावना** (प्रा० अपूर्ण) by मलधारिहेमचन्द्र. गा. ४३–८५

२५६. (१) **ओघनिर्युक्ति.**
(२) **पिण्डनिर्युक्ति.** } प. ८०; १३″×२½″
(३) **तत्त्वार्थसूत्र.** प. २–२१

(४) **प्रशमरति.** प. २२–५०

(५) **काव्यादर्श** by **दण्डी.** प. १–४९

End:—

इत्याचार्यदंडिनः कृतौ काव्यादर्शे तृतीयः परिच्छेदः समाप्त इति। मंगलं महाश्रीः।

Colophon:—

संवत् १[ ]९० द्वितीये ज्येष्ठे ९ लिखितेति माणिकक्षुल्लकेन।

२५७. (१) **दमयन्तीचम्पू** (त्रुटित). प. १७१; १३½″×२″

(२) ,, **विवरण** by **चण्डपाल.** प. १६२

२५८. **हैमबृहद्वृत्ति** (पाद ९–१०). प. २८२–४३०; १६″×२″

२५९. **धातुपारायणवृत्ति** by **हेमचन्द्र.** प. २६३; १३¾″×२″

Colophon:—

संवत् १३०७ वर्षे चैत्रवदि १३ भौमे श्रीवीसलदेवकल्याणविजयराज्ये वाम-......धा,.....प्रभृतिपंचकुलप्रतिपत्तौ श्रीचंद्रगच्छीयश्रीचंद्रप्रभसूरिशिष्यैः आ-चार्यश्रीनेमिप्रभसूरि......श्रीहेमचंद्रधातुपारायणवृत्तिपुस्तिका लेखिता। लिखिता च ठ० देवश[र्मणा]

२६०. **वसन्तराजशाकुन** (३–१८ वर्ग). प. १३०; १४½″×२″

२६१. (१) **उपदेशमाला.** प. १–५७; १३½″×२″

(२) **पुष्पमाला.** प. ५७–११४

(३) **श्राद्धदिनकृत्य.** प. ११४–१५३

(४) **विवेकमञ्जरी.** प. १५३–१६९

(५) **गौतमपृच्छा.** गा. ५४ प. १७०–१८२

(६) **चैत्यवन्दनादिभाष्यत्रय.** प. १८२–१९९

(७) **क्षेत्रसमास** (नमिऊण सजल०). प. १९९–२१२

(८) **भयहरस्तोत्र.** प. २१२–२१५

(९) **संयममञ्जरी** (अपभ्रंश) by **महेश्वरसूरि.** प. २१५–२१८

(१०) **प्रकीर्ण** (अजितशान्ति, पापप्रतिघातादि त्रुटित). प. २१९–२४९

२६२. (१) **श्राद्धदिनकृत्यवृत्ति** by **देवेन्द्रसूरि.** प. ३५७; १४½″×२½″

ग्रंथाग्र १२८२० । सं. १४०९

(२) **कातन्त्रवृत्तिपञ्जिका** by **त्रिलोचनदास.** प. १६५; १४″×२″

प. २२—इति त्रिलोचनदासकृतायां दुर्गसिंहोक्तविवरणपंजिकायां प्रकृति-सन्धिः समाप्तः ॥

२६३. **योगशास्त्रान्तरश्लोकाः** (त्रुटित). प. ६३

२६४. (१) **परिशिष्टपर्व** by **हेमचन्द्र.** प. १६२; १४¾″×२″

(२) **सार्धशतकवृत्ति** (त्रुटित). प. १६०–२७३

Pras'asti of the Donor:—

नम्रनाकिसुरशत्रुनरेन्द्रः स्थैर्यनिर्जितसुमेरुनगेंद्रः ।
विश्वविश्वनयनो गततंद्रो विष्टपे जयति **वीरजिनेंद्रः** ॥
भूभामिनीहारललाटपट्टललामकल्पं नगरं समस्ति ।
ख्यातं जने **वीरपुराभिधानं** धनाढ्यलोकाभिनिवासरम्यं ॥
पुण्यागण्यगुणान्वितोतिविततस्तुंगः सदा मंजुल–
च्छाया–श्लेषयुतः सुवर्णकलितः शाखा–प्रशाखाकुलः ।
पल्लीपाल इति प्रभूतमहिमा ख्यातः क्षितौ विद्यते
वंशो वंश इवोच्चकैः क्षितिभृतो मूर्ध्नोपरिष्टात् स्थितः ॥
तस्मिन्नभूत् ठक्कुरधंधनामा श्राद्धः सुधीः सर्वजनाभिमान्यः ।
तस्याभवद् **रासलदेविकाह्वा** जनी च दाक्षिण्य–दयानिवासा ॥
कामकाम्यवपुषो **जिनेश्वर**..................

२६५. (१) **प्रवचनसारोद्धार.** ग्रं. २८०० प. १५६; १५″×२″

Colophon:—

संवत् १२९५ वर्षे भाद्रपदशुद्ध ५ पंचम्यां सोमे समर्थिता ।
आदर्शदोषात् मतिविभ्रमाद् वा यत् किंचिदूनं लिखितं मयात्र ।
तत् सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यंति हि ये लिखंति ॥

(२) **दशवैकालिक.** प. १–६६

२६६. **लक्षणसमुच्चय** (**वैरोचनीय**). प. ११५–२४४; १४″×२″

प. ११७—धवस्रग्वर्जनो (?) द्वादश विधि
प. १३५—त्रिधा लिंगस्नान
प. १४४—अधिवासन १५
प. १६५—इति **वैरोचनीये** ल० त्रिकलिंगारोपण १७
प. १६९—ल० तोरण–स्तंभ–गुरुपूजादिभूतानि स्थापने १८
प. १७५—बाण (?) लिंगादियातद्वारहर्त्संस्थापन १९
प. १८०—ईशानादिध्वजनिवेशनाख्यो २०
प. १९४—मंडप–यत्यादिगृहस्थापने २२
प. २०१—देवस्थापन–वेधत्यागनिर्णयः २३

प. २०६—शल्योद्धार २४

प. २१५—वास्तुपूजास्थापन २५

प. २२४—ल० च्छंद्वास्तुभूषणाख्यकसामान्यपंचचरकप्रासादवर्जनीयद्वि-(षड्)विंशतितमो विधिः ।

प. २३३—साचारनवप्रासादवर्जनी......... २७

प. २३६—लिंगमानप्रासादलक्षणः

२६७. (१) **शृङ्गार**(? अमरु) **शतक.** श्लो० १०१ प. २८; १२″×१$\frac{3}{4}$″

(२) **न्यायावतारसूत्र.** प. १८–२१

(३) **काव्यप्रकाशसूत्र.** प. १३

(४–५) **त्रुटितग्रन्थद्वय** (अव्यवस्थित).

२६८. (१) **पञ्चाशक.** प. १–८३; १३$\frac{1}{2}$″×२″

(२) **कर्मस्तव.** प. ८४–९१

(३) **कर्मविपाक.** प. ९१–१०७

(४) **शतकप्रकरण.** प. १०७–११९

(५) **सत्तरिया.** गा. ९१ प. ११९–१२९

(६) **मूलशुद्धि** (त्रुटित). गा. १०४

जिणसासणचेइयाणं तइयं ठाणं । संजईणं ति पंचमं ठाणं ।

(७) **जीवदयाप्रकरण** (त्रुटित).

२६९. **सार्धशतकवृत्ति.** प. १८६; १३$\frac{1}{2}$″×२″

२७०. **परिशिष्टपर्व.** प. २४४; १७″×२″

Contains a long Pras'as'ti (incomplete hence not reproduced).

२७१. (१) **दशवैकालिक** (अनुपयोगि). प. २५४; १०$\frac{1}{2}$″×१$\frac{1}{2}$″

(२) **उत्तराध्ययन** (?).

Beginning:—

अरहंते वंदित्ता चउद्दसपुव्वी तहेव दसपुव्वी ।
एक्कारसंगसुत्तउ(त्थ)धारए सव्वसाहू य ॥
वंदे.........वोच्छं चरणकरणाणुओगा उ ।
अप्पक्खरं महत्थं अणुग्गहत्थं सुविहियाणं ॥
ओहे पिंड समासे चेय होंति एगट्ठा ।
निज्जुत्तति य अत्था जं बद्धा तेण निज्जुत्ती ॥

(३) **भक्तपरिज्ञा** (प्रा०).

(४) **संस्तारकप्रकीर्णक** (प्रा०).

(५) **पिण्डविशुद्धि.**

२७२. तत्त्वोपप्लव by **जयराशि.** प. १७६; १४″×१½″

Beginning:—

तत्त्वोपप्लवासहपथविषमो नूनं मया नृप !(? इतः) नास्ति तत्फलं वा स्वर्गादि । सत्यं नावदातस्य कर्मणः भागा (?) उक्तं च परमार्थविद्भिराप(: पार)लौकिको मार्गोनुसर्तव्यः । आ.........लोकव्यवहारं प्रति सदृशौ बाल–पंडितावित्यादि । ननु यद्युपप्लवस्तत्त्वानां किं माया । अथातस्तत्त्वं व्याख्यास्यामः । पृथिव्यापस्तेजो वायुरिति तत्त्वानि । तत्समुदाये शरीरेंद्रिय–विषयसंज्ञेत्यादि । नानार्थत्वात् । किमर्थं प्रतिबिंबनार्थं । किं पुनरत्र प्रतिविन्य(बिंब्य)ते ? । पृथिव्यादीनि तत्त्वानि लोके प्रसिद्धानि । तान्यपि विचार्यमाणानि न व्यवतिष्ठंते, किं पुनरन्यानि ? । अथ कथं तानि न संति तदुच्यते । सल्लक्षणनिबंधनं मानव्यवस्थानं । माननिबंधना च मेय-स्थितिस्तदभावे तयोः सद्व्यवहारविषयत्वं कथं । स्वया......ताम......नब...... व्यवहारः क्रियते । तदात्मनि रूपास्तित्वव्यवहारो घटादौ च सुखास्तित्वव्यवहारः वर्तयितव्यः । अ[थ] [इं]द्रियार्थसंनिकर्षोत्पन्नज्ञानमव्यपदेश्यमव्यभिचारिव्यवसा-यात्मकं प्रत्यक्षमिति ।

End:—

अन्यत्र पंडितानामपि व्यवहारो दय(म)–दानदर्शनात् । तदेवमुपप्लुतेष्वेव तत्त्वेष्वविचारितरमणीयाः सर्वे व्यवहारा घटंत इति ।

ये याता न हि गोचरं सुरगुरोर्बुद्धेर्विकल्पा दृढाः
प्राप्यंते ननु तेपि यत्र विमले पाखंडदर्पच्छिदि ।
भट्टश्री**जयराशि**देवगुरुभिः सृष्टो महार्थोदय-
स्तत्त्वोपप्लवसिंह एष इति यः ख्यातिं परां यास्यति ॥
पाखंडखंडनाभिज्ञा ज्ञानोदधिविवर्धिताः ।
जयराशेर्जयंतीह विकल्पा वादिजिष्णवः ॥

Colophon:—

सं. १३४९ वर्षे मार्ग. वदि ११ शनौ धवलक्कके मह० **नरपालेन तत्त्वोपप्लव** ग्रंथपुस्तिकालेखीति ॥ भद्रं

२७३. अष्टकटीका by **जिनेश्वराचार्य.** प. २००; १५″×२″

२७४. उपमितिभवप्रपञ्चा (उत्तरखण्ड) by **सिद्धर्षि.** प. २४८; १६″×२

Beginning:—

अथास्ति जगदाह्लादं साह्लादं नामतः पुरं ।
निःशेषभुवनाश्चर्यकारणं दुःखदारणं ॥ १ ॥

२७५. **द्व्याश्रयवृत्ति** (पाद ९-२८) by **अभयतिलक.**
In Continuation of No. 232. प. ३६०; २०"×२½"

२७६. **आवश्यकटिप्पन** by मलधारि**हेमचन्द्र.** प. १८९; १५"×२"

Colophon:—

संवत् १२५८ वर्षे मार्ग. वदि ५ शुक्रे

२७७. **पञ्चवस्तुक.** प. १२७; १२"×२"

Colophon:—

संवत्सरशतेष्वेकादशैकवर्षे षष्ठ्या फाल्गुनशुक्लद्वितीयायां शनिश्चरदिने कर्मापनयनिमित्तं लिखितमिदं पंचवस्तुनः सूत्रं । श्री**वीर**चंद्रसूरिभिर्लिखापितं ।

श्री**वीर**चंद्रसूरिभ्यो दत्तेयं ज्ञानवृद्धये ।
पंचवस्तुकसूत्रस्य पुस्तिका गुणमच्छ्रिया (?) ॥ १ ॥
संवत् १२६२ श्रावणवदि ६

२७८. **आवश्यकचूर्णि** (अपूर्ण). प. १-२७७; १७"×२¼"

२७९. **पिण्डविशुद्धिवृत्ति** by **यशोदेव.** ग्रं. २८०० प. २७३*

२८०. (१) **पार्श्वनाथचरित्र** by **भावदेवसूरि.** प. २७४; १३½"×३"

Pras'asti of the Donor:—

जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान् ।
विमलस्त्रासविरहितस्त्रिलोकचिंतामणि**र्वीरः** ॥ १ ॥
सद्धर्महेतुः सरलस्वभावः सुपर्वरम्यः कलशब्दशाली ।
मुक्ताफलारंभ इह प्रसिद्धः श्रियान्वितो **गूर्जर**वंश एषः ॥ २ ॥
सौम्योजनि प्रवरधीर्विपुलेत्र वंशे यः सोमकांत इव सज्जनदर्शनीयः ।
श्रीम**ज्जिन**प्रभविभोर्भवभित्प्रसादमासाद्य सद्गुणनिधिर्विदधे सुधर्मं ॥ ३ ॥
तस्य मुक्ताफलप्रायौ द्वौ सुतौ सुकृतोज्ज्वलौ ।
आद्यो **वर्ण**कनाम्ना तु द्वितीयोऽभून्**म**दनाभिधः ॥ ४ ॥
वर्णकस्य प्रिया जज्ञे **बील्हण**देवीति नाम्नी ।
तत्कुक्षिसरसिहंसा जाताः षट् सहोदराः ॥ ५ ॥
आद्यः **कामा**भिधानस्तु द्वितीयः **शो**भनधीरधीः ।
पेथडस्तृतीयोभूच्च चतुर्थः **कृष्ण**नामतः ॥ ६ ॥

* १५४-१७१ पत्राणि न सन्ति ।

अर्जुनः पंचमो जातः षष्ठोऽभयसिंहाभिधः ।
पुत्री हांसीति विख्याता सतीत्वगुणशालिनी ॥ ७ ॥
शोभनदेवस्य प्रेयस्यासीत् सुशीलसंयुता ।
नामतः सुहडादेवी भूरिगुणविभूषणा ॥ ८ ॥
तस्यां च गुणशालिन्यां जाताः सप्त सहोदराः ।
निर्मलेन चरित्रेण राजंते ऋषिवत् सदा ॥ ९ ॥
तेषु मुख्यपदवीसमाश्रितो विश्रुतोऽस्ति विनयादिसद्गुणैः ।
धर्मकर्मणि तथाभिधानतो यः सलक्ष इह सज्जनाग्रणीः ॥ १० ॥
तस्यास्ति दयिता साध्वी देवी भावलनामतः ।
तस्याः कुक्षिमलंचक्रे पुत्ररत्नचतुष्टयी ॥ ११ ॥
सोमः सौम्यगुणोपेतस्ततो जज्ञे नरोत्तमः ।
दानादिकचतुर्भेदधर्माराधनतत्परः ॥ १२ ॥
श्रीदेवी तस्य दयिता भाति सर्वगुणोत्तमा ।
देवताराधने रक्ता शीलालंकारधारिणी ॥ १३ ॥
दानशौंडो रतो धर्मविवेकीति विशारदः ।
सोढलाख्यस्तृतीयस्तु देवी संसारवल्लभा ॥ १४ ॥
तस्याः कुक्षिसरस्यां च राजहंस इवामलः ।
अवतीर्णो वज्रसिंहः कर्माद्रौ वज्रसन्निभः ॥ १५ ॥
तस्यानुजो विजयते जगति प्रतीतः सौभाग्य-भाग्य-सुविवेकविराजमानः ।
यस्याख्यया नरपतिर्नृपमाननीयः सत्त्वोपकारकरणैकरसात्मकस्य ॥ १६ ॥
नरपतेः प्रिया चास्ति नलदेवीति शुद्धधीः ।
प्रसूता सा सुतं भव्यं नरसिंहाभिधोऽस्ति यः ॥ १७ ॥
नरपतेरनुजोऽस्ति धरणः साधुधीरधीः ।
अभिधानायकिदेवी प्रिया प्रियगुणान्विता ॥ १८ ॥
श्रद्धाजलेन विमलेन सुशीतलेन संपूरिते सुकृतनीरजराजमाने ।
सन्मानसे लसति यस्य विवेकहंसः सोयं जयी महणसिंह इति प्रतीतः ॥१९॥
मीणलाख्या प्रिया तस्य प्रभूतगुणशालिनी ।
मान्या स्वजनवर्गेषु सदौचित्यपरायणा ॥ २० ॥
अन्यच्च–'नित्यां प्रपां ज्ञानसुधारसाढ्यां तत्त्वोपदेशासमसत्रगेहं ।
मोहांधकारेषु समीपदीपं सत्पुस्तकं लेखयतीह धन्यः ॥ २१ ॥'

इत्यादि देशनां श्रुत्वा सुपुत्रः कुलदीपकः ।
साधुमहणसिंहाख्यो गुणग्रामपवित्रितः ॥ २२ ॥
श्रीवामेयजिनेशस्य स्वपितुः श्रेयसे मुदा ।
पवित्रस्य चरित्रस्य पुस्तकोयमलीलिखत् ॥ २३ ॥

नंद-शैल-शिखि-चंद्रवत्सरे **रत्न**पूर्व**तिलका**ख्यसद्गुरोः ।
ज्ञानकीर्त्यभिधशिष्यसन्मुनेः पुस्तकं च विधिना प्रदत्तवान् ॥ २४ ॥

संवत् १३७९ वर्षे आश्विनसुदि १४ बुधे **गूर्जर**ज्ञातीयसाधु**शोभनदेव**सुत-**महणसिंहे**न श्री**पार्श्वनाथचरित्रं** पुस्तकं लेखयित्वा पं० **ज्ञानकीर्तेः** प्रदत्तं ॥

(२) **नल–दमयन्तीकथा.** श्लो० ९६३ प. २७५–३२७

Beginning:—

इहैव **भरते** भूमिभामिनीभालसन्निभे ।
देशः **को**शलनामास्ति दधानस्तिलकश्रियं ॥ १ ॥

End:—

ततो भवंतोपि भवंतु सज्जाः सदैव तीर्थेश्वरपूजनेषु ।
यन्मुष्टिमध्ये भवतामपीह स्यादैहिकामुष्मिकसौख्ययोगः ॥ ९६३ ॥

चतुर्थव्रते **नल-दमयंती**कथा समाप्ता ॥

(३) **ब्रह्मदत्तचक्रवर्तिचरित्र** (त्रि. श. पु. च. पर्व ९, सर्ग १).
by **हेमचन्द्र.** श्लो० ६०० प. ३२७–३५९

(४) **ऋषिदत्ताकथा.** श्लो० ४५१ प. २३८–२६१

Beginning:—

अस्तीह **भरत**[क्षेत्रे] देशो नाभिनिवेशभूः ।
मध्यदेश इति ख्यातो मध्यदेश इवावनेः ॥ १ ॥

End:—

गतवति विततायुःकर्मणि शांतमंतःकरणशरणवैरिध्वंसनादात्तकीर्ति ।
अथ...मुमद्वितापत् केवलिद्वंद्वमेतत् परमपदमुदारानंदसंदोहमूहे ॥ ४५१ ॥

ऋषिदत्ताकथा समाप्ता ।

(५) **चारुदत्तादिकथा** (त्रुटितपत्र).

२८१. (१) **सङ्ग्रहणी.** गा. ५२७ प. ४६–८१

(२) **भक्तपरिज्ञा** (अपूर्ण). प. ११७–

(३) **आगमिकवस्तुविचारसार** by **जिनवल्लभ.**
प. १२०–१२४

(४) महादण्डकप्रकरणादि (त्रुटित). प. १२५–१४८
(५) उपदेशमाला (त्रुटित अपूर्ण). प. १५०–१८१
(६) ऋषिमण्डल–चतुःशरण (त्रुटित). प. १८८–२०३
(७) आतुरप्रत्याख्यान (त्रुटित). प. २०३–२१९
(८) पिण्डविशुद्धि (त्रुटित) by जिनवल्लभ. प. १९१–१९६
(९) आगमिकवस्तुविचारसार by जिनवल्लभ.
प. १८२–१८८
(१०) कर्मस्तव. गा. ५७ प. १८८–१९१
(११) कर्मस्तवभाष्य by महेन्द्रसूरि. गा. ७० प. १९१–१९६
(१२) ,, गा. ३३ प. १९६–१९७
(१३) कर्मविपाकादि–भक्तपरिज्ञापर्यन्त (त्रुटित अपूर्ण).
प. १९७–२२७
(१४) भावनाप्रकरण (अपूर्ण). प. १–१२
(१५) स्थविरावली (अपूर्ण). प. २

२८२. **वराहमिहिरसंहिता** (अ. ७५ अपूर्ण). प. २–३००; १३½"×२¼"

End:—

इति वराहमिहिरकृतायां संहितायां कांदर्पिकनामाध्यायश्चतुःसप्तति[त]मः ॥

Colophon:—

संवत् १३१३ वर्षे भाद्रपद व. १५ रवौ ।

२८३. (१) **षडावश्यकवृत्ति** (वन्दारु०) by **देवेन्द्रसूरि.**
ग्रं. २७७० प. १८४; १४"×२"
(२) **प्रवचनसारोद्धार** by **नेमिचन्द्रसूरि.** ग्रं. १६०६
प. १८४–२६६

२८४. **कल्पसूत्रादि** (त्रुटितग्रन्थ).

२८५. **ऋषभदेवचरित्र** (प्रा.) by **वर्धमानसूरि.** प. २२५; १५"×२¼"

केवलज्ञानादनन्तरम्—

भरहो वि भगवंतं पूइऊण कयचक्कपूयापणिहाणो ।
विणीयनयरीं पइट्ठो भगवं पि अन्नत्थ विहरिओ ॥

End:—

श्रीवर्धमानाचार्यविरचिते श्रीऋषभदेवचरित्रे पंचमोवसरः समाप्तः ॥

वंककलंकविमुक्का जडत्तणदोससंग–खयरहिया ।
जत्थुप्पन्ना पुरिसा तमपुव्वं चंदकुलमत्थि ॥
अनिययविहाररहिओ गुरुतरसंवेगभावियमईओ ।
सीलंगभरुव्वहणे गुरुथिरधुरधोरिओ धवलो ॥
होंतो तत्थ मुणिंदो जिणिंदसिद्धंतलद्धपरमत्थो ।
तवतेयनिहयपावो सूरी भद्देसरो नाम ॥
निच्चं परिपुन्नकलो निच्चं गच्छोयहिस्स वुड्ढिकरो ।
तस्स विणेओ सूरी अपुव्वचंदो व्व मुणिचंदो ॥
कुंदेंदुसच्छहेणं नियजसपसरेण भरियभुवणयलो ।
सूरी तस्स महत्थो महत्थसत्थत्थनिम्माओ ॥
तस्स य सी........................ ।
पुव्व.............................. ॥
............हो त्ति सूरी वि सीयतेयट्टो ।
अप्पडिरूवी जाओ अवमे...न्नसूरि विक्खाओ ॥
लीलाए जेण दलिओ दप्पो समरस्स...गप्पयडं ।
विबुहाण वंन(द)णिज्जो दक्खिन्नमहोयही...दसेण चंदो ॥
संसारनीरनाहस्स ओव...रयणोवमो जाओ...कवी ।
अमलो विमलसहावो सिद्धिवहूदुल्ललि...भदवचतानिति (?) ॥
दुर्लेखं लेखके शास्त्रं....................

२८६. **रामचरित** (सर्ग १९–३६) by **अभिनन्द.** प. २३८; १४"×२"

२८७. **हैमलघुवृत्ति** (चतुष्क). प. १३७; १४"×२$\frac{1}{4}$"

Colophon:—

हैमचतुष्कवृत्तिपुस्तिका चरणसुंदरगणिना श्रीज्ञानदानधर्मोपदेशादिना संप्राप्य श्रीज्ञानकोशे ज्ञानाराधनार्थं विमुक्ता भट्टारकश्रीदेवसुंदरसूरिशिष्येण ।

२८८. **नैषध**(सर्ग १–११;१२–२२ त्रुटित) by **श्रीहर्ष.** प. १–९५+१–९०

२८९. **हैमलघुवृत्त्यवचूरि** (अ. १–२$\frac{1}{2}$). प. २००; १२"×२$\frac{1}{3}$"

Prasasti of the Donor:—

श्रीवीतरागं प्रणिपत्य भक्त्या हैमावचूरेः शुभपुस्तिकायाः ।
..................................प्रशस्तिं ॥ १ ॥
प्राग्वाटवंशोज्वलमौक्तिकाभः सुश्रावकः पूनडनामधेयः ।
निशम्य शास्त्राणि भुवि द्विधापि......प परीक्षकत्वं ॥ २ ॥

क्षेत्रेषु सप्तस्वथ दुःस्थितेषु न्यायात्तवित्तं वितरन्नजस्रं ।
अचिंत्यदा......................यशांसि लोके ॥ ३ ॥
तद्‌गेहिनी श्रीरिव देहिनीह तेजीति नामास्ति जिनेंद्रभक्ता ।
विनीत..........................गुणावदाता ॥ ४ ॥
तत्सूनुरन्यूनगुणः प्रधानो जिनेश्वरध्यानकृतावधानः ।
दोर्मंडले मांडलिक...............लिषाभिधानः ॥ ५ ॥
यदीयबंधुर्वरसिंहसंज्ञः श्रीसार्व-गुर्वर्चनकृत्यविज्ञः ।
हेमावचूरिर्दशपद......................अत्र तेन ॥ ६ ॥

२९०. (१) **आगमाद्यालापक** (मासकल्पादि). प. १२५; १०½"×२"
(२) **प्रणष्टलाभादि** (प्रा. निमित्तज्ञान). प. १२५–१२९

Beginning:—

सिद्धे सत्ताण हिए सुपइट्ठियसासणे जिणे नमिउं ।
विन्नायसव्वभावे देवासुरपणमिए सिद्धे ॥ १ ॥
वोच्छं पणट्ठलाभं बंधण-मोक्खं च रोगविनिविंत्तिं ।
दिणमाणेण सुहं चिय पभासियं कित्तियाईसु ॥ २ ॥
रिक्खंमि कित्तियाए नट्ठं लब्भइ विमुच्चये बद्धो ।
दिवसेसु नवसु रोगी पंतव्वइ (?) सत्तरत्तेण ॥ ३ ॥

End:—

भरणीए जं पणट्ठं न लब्भए नेय बंधणविमोक्खो ।
पडियस्स होइ मरणं नरस्स रोगेण गहियस्स ॥ २९ ॥

(३) **सामुद्रिक** (? अपूर्ण). श्लो० १–१८ प. १२९–१३०

Beginning:—

अस्थिष्वर्थाः सुखं मांसे त्वचि भोगाः स्त्रियोऽक्षिषु ।
गतौ यानं स्वरे चाज्ञा सर्वं सत्त्वे प्रतिष्ठितम् ॥ १ ॥

२९१. **अध्यात्मतरङ्गिणीटीका.** प. ११७; १४"×२"

Beginning:—

ॐ नमो वीतरागाय ।

गुरुं प्रणम्य लोकेशं शिशूनामल............ ।
.... ॥ १ ॥
......................कारिण्योर्थिजना सर्वे
पुरुषार्थसिद्धिनिमित्तं प्रमाणमनुसरंत............
....

End:—

श्रीसोमदेवमुनिनोदितयोगमार्गो व्याख्यात एव हि मयाऽऽत्ममतेर्बलेन ।
संशोध्य शुद्धधिषणैर्हृदये निधेयो योगीश्वरत्वमचिराय समाप्तुकामैः ॥ १ ॥

श्रीसोमसेनप्रतिबोधनार्थो धर्माभिधानोरुयशःस्थिरात्मा ।
गूढार्थसंदेहहरा प्रशस्ता टीका कृताध्यात्मतरंगिणीयं ॥ २ ॥

जिनेश-सिद्धाः शिवभावभावाः सुसूरयो देशक-साधुनाथाः ।
अनाथनाथा मथितोरुदोषा भवंतु ते शाश्वतशर्मदा नः ॥ ३ ॥

चंचच्चंद्रमरीचिवीचिरुचिरे यच्चारुरोचिश्चये
मग्नांगैः सुरनायकैः सुररुचेर्देवाधिमध्यैरिव ।
शुक्लध्यानसितासिशातितमहाकर्मारिकक्षक्षयो
देयान्नो भवसंभवां शुभतमां चंद्रप्रभः संपदां ॥ १ ॥

त्रिदशवसतितुल्यो गूर्जरात्राभिधानो धन-कनकसमृद्धो देशनाथोस्ति देशः ।
असुर-सुर-सुरामाशोभिभामाभिरामोऽपरदिगवनिनारीवक्त्रभाले ललाम ॥ २ ॥

शश्वच्छ्रीशुभतुंगदेववसतिः संपूर्णपण्यापणा
शौंडीर्योद्भटवीरधीरवितता श्रीमान्यखेटोपमा ।
चंचत्कांचनकुंभकर्णविसरैर्जैनालयैर्भाजिता
लंकेवास्ति विशालसालनिलया मंदोदरीशोभिता ॥ ३ ॥

वरवटवटपल्ली तत्र विख्यातनामा वरविबुधसुधामा देववासोरुधामा ।
शुभसुरभितरंभारामशोभाभिरामा सुरवसतिरिवोच्चैरप्सराभ्यासभामा ॥ ४ ॥

सूरस्थोच्च गणेभवद् यतिपतिर्वाचंयमः संयमी
जज्ञे जन्मवतां सुपोतममलं योजन्मया बोधितः ।
जन्ये यो विजयी मनोजनृपतेर्जिष्णोर्जगज्जन्मिनां
श्रीमत्सागरनंदिनामविदितः सिद्धांतवार्धिविधुः ॥ ५ ॥

............तपो यतिः ललामो
भव्या निशम्य...परिवर्धननीरधौ ।
माक्ष्य सल्ल......कः विकर्तनसत्कुठार-
स्तस्माद्धिलोभवनतोजनि स्वर्णनंदिः ॥ ६ ॥

२९२. (१) कौटलीय अर्थशास्त्र (अधि. १–२ अपूर्ण) प. ६४; १३"×२$\frac{3}{4}$"
*damaged.

* ५५–६३ पत्राणि विनष्टानि ।

End:—

शिरीषपुष्पकं गोमूत्रकं गोमेदकं शुद्धस्फटिकं etc.

(२) **कौटलीयटीका** (अधि. २ अपूर्ण) by **योग्घम.** प. १८

End:—

इति **मुग्धविलासांकयोग्घमविरचितनीतिनिर्णीत्यभिधानायां कौटलीयराजसिद्धां-तटीकायामध्यक्षप्रचारे** प्रथमोध्यायः ॥

२९३. प्रकीर्णत्रुटितपत्र.

२९४. काव्यकल्पलताविवेक. प. ३२५ (?); १६$\frac{1}{4}$"×२$\frac{1}{2}$"

(त्रुटितपत्र ५५; शब्दालङ्कार, अर्थालङ्कार, परिमल ?)

२९५. (१) **विक्रमसेनचरित** (उपदेशकथा) by **पद्मचन्द्रशिष्य.**

प. ७८; ११$\frac{3}{4}$"×१$\frac{1}{2}$"

Beginning:—

तिसलाकुच्छिसरोवरकलहंसं वीरजिणवरं नमिउं ।
दुज्जयअंतररिउविजयपत्तं सिव-रमणी-सोक्खभरं ॥ १ ॥
निच्चं चिय एगमणो नवजुण्हं पिव थुणामि सुयदेविं ।
जा चिंतियमित्ताउ वि णराण हिययाउ हरइ तमं ॥ २ ॥
भारइदेवी वयणे निवसइ हिययंमि जाण सिव-रमणी ।
उवसमसिरी य देहे संजमव(ध)न्नाण तह वि नमो ॥ ३ ॥
गुण-रयण-रोहणाणं मुणिउं को तरइ ताण माहप्पं ? ।
अमरगुरु वि हु खीरोय[हि]ट्ठियस्स किं मुणइ पयमाणं ? ॥ ४ ॥
रयणत्तयजुत्ताणं गुरूणं पउमचंदसूरीण ।
मंदमई वि पसाएण किं पि जंपेमि उवएसं ॥ ५ ॥
गव्वेण नेय नो मच्छरेण लोहेण नेय न जसत्थं ।
अप्प-परबोहणत्थं तु एस किज्जइ कहाबंधो ॥ ६ ॥
ते सद्दा ते अत्था छंदा ते चेय ते अलंकारा ।
अनुलोम-विलोमेहिं एएहिं कई कुणइ कव्वं ॥ ७ ॥
कुणिऊण कव्वबंधं हरिसपरो होइ नियमेण ।
सव्वो संजणइ चमुक्कारं विरलु च्चिय को वि परहियए ॥ ८ ॥
मणहरपयविन्नासं महुरं छंदाणुयं पसत्तिजुयं ।
नवरसकलियं केसिं पि होइ कव्वं कलत्तं च ॥ ९ ॥

अह विक्कमसेणनराहिवस्स पभणेमि चरियमिणं ।
सम्मत्तलाहपुव्वं सव्वट्ठविमाणगमणंतं ॥ २० ॥
इह पुव्वं सम्मत्ते चरियं धणसिट्ठिणो समक्खायं ।
अह दाणे धणदेवो धणदत्तो भाउणो दोन्नि ॥ २१ ॥
नामेण मयणसेणो वेसामयणो त्ति कुंभयारो य ।
चंडो गोयालो चिय किविणो दाणंमि चत्तारि ॥ २२ ॥
सीलंमि य जयलच्छी देवी तह सुंदरी दुवे इत्थ ।
खयरी मयंकरेहा अघडनिवो दोन्नि तवम्मि ॥ २३ ॥
सिट्ठी य धम्मदत्तो बहुबुद्धी णाम मंतिणो पुत्तो ।
एए दुन्नि वि कहिया दिट्ठंता भावणाविसए ॥ २४ ॥
नवकारफले भणिओ निवई सोहग्गसुंदरो नाम ।
कहिओ अणिच्चयाए समुद्ददत्तो वणियपुत्तो ॥ २५ ॥
नियमस्स फले भणिओ कमलो नामेण सिट्ठिणो पुत्तो ।
चउदस कहाणयाइं नेयाइं समासओ कमसो ॥ २६ ॥

Here the Stories are upto अघटकथा

प. ५—उक्तं च निजगाथाकोशे ।

(२) **अष्टक.**
(३) **षोडशक.**
(४) **प्रशमरति.**
(५) **धर्मलक्षण.**
(६) **प्रश्नोत्तररत्नमालिका.**
(७) **पञ्चाणुव्रतकथा.** श्लो० २४+२७+२०+३६+३८

Beginning:—

सिद्धिमार्गोपदेष्टारं तीर्णं संसार-सागरं ।
प्रणम्य शिरसा वीरं सुर-दैत्यनृपार्चितं ॥ १ ॥
वक्ष्ये धर्मकथां पुण्यां गृहाश्रमनिवासिनां ।
सर्वज्ञोक्तां समासेन पंचाणुव्रतसंज्ञितां ॥ २ ॥

End:—

दुंदुभिध्वनिते रम्ये विमाने भास्वरे शुभे ।
स्वर्गे सुखं चिरं प्राप्य क्रमात् सिद्धिं गमिष्यथ ॥ ३८ ॥ इति ॥

(८) **पात्रपरीक्षा.** ग्रं. ३१

Beginning:—

जीवादिपदार्थो यः समभावेन सर्वसत्त्वानां ।
रक्षार्थमुद्यतमतिः स यतिः पात्रं भवति दातुः ॥ १ ॥

(९) **ज्ञानाङ्कुश.** ग्रं. २८

Beginning:—

महात्मनां सत्त्ववतां ह्यवस्थितिर्दृढा परिज्ञा etc.

End:—

सर्वतः परिधावंतं मनोमत्तमतंगजं ।
ज्ञानांकुशवशं कृत्वा पुनः पंथानमानयेत् ॥ २८ ॥
ज्ञानांकुशः समाप्तः ।

२९६. (१) **सामाचारी** (उपधान, मालारोपण, योगादिविधि).
त्रुटित, श्लिष्टपत्र १४"×२$\frac{१}{४}$"

(२) **वीतरागस्तोत्र** (त्रुटित, अपूर्ण).

२९७. (१) **ओघनिर्युक्ति** (?). प. ४५–१७८; १५"×२$\frac{१}{४}$"

(२) **पिण्डनिर्युक्ति.** प. १७९–१८८

(३) **भगवती** (आलापक).

२९८. **धर्मकथा** (? सटीक, कथासहित प्रा. सं.). प. २३४

Beginning:—

तिहुयणमंगलतिलयं कयदुज्जयभाववेरिभवविलयं ।
केवलसिरिकुलनिलयं रिसहं पणमामि मुणिवसभं ॥

व्याख्या–ऋषि गतावित्यनेन ऋषति गच्छति परमपदमिति ऋषभः । कथानकं

(१) **विक्रमसेनकथा** (सम्यक्त्वे). श्लो० २३३
(२) **वज्रकर्णकथा** (सम्यक्त्वे). ,, ९९
(३) **दामन्नककथा** (जीवदया–करुणायाम्). ,, १०४
(४) **धनश्रीकथा** (सत्यव्रते). ,, ९९
(५) **ऋषिदत्ताकथा** (अलीके). ,, ४८५
(६) **नागदत्तकथा** (परद्रव्यापहारे). ,, १२०
(७) **गजसुकुमालकथा** (ब्रह्मचर्ये). ,, २१
(८) **चारुदत्तकथा** (परिग्रहप्रमाणे). ,, ७८

(९) वसुमित्रकथा (रात्रिभोजने). ,, ७९
(१०) कृतपुण्यकथा (दाने). ,, १४५
(११) नर्मदासुन्दरीकथा (शीले). ,, २०५
(१२) विलासवतीकथा (शीले). ,, ५२२
(१३) सीताचरित्रमहाकाव्य (सर्ग ४). ग्रं. ९५+९९+१५३+२०९
(१४) दृढप्रहारिकथा (तपसि). ,, ५१
(१५) इलातीपुत्रकथा (भावनायाम्). ,, ६८

Colophon:—

संवत् १३३९ वर्षे द्वितीयकार्तिक व. भौ०

२९९. **प्रकरणपुस्तिका.** प. २३९; १३"×१½"

(१) **बृहत्सङ्ग्रहणी.**
(२) **शतक.**
(३) **क्षेत्रसमास.**
(४) **प्रवचनसन्दोह.**
(५) **आगमिकवस्तुविचार.**
(६) **कर्मस्तवभाष्य.**

Colophon:—

संवत् १२७२ वर्षे चैत्रवदि ८ शनौ पुस्तिकेयं लिखितेति । श्रीनाणकीयगच्छे हरीराह(हतरोह)वास्तव्य गोसा भग्नी पवइणि श्रीजयदेवोपाध्यायपठनार्थं प्रकरण-पुस्तिका दत्ता ।

३००. (१) **दानादिप्रकरण** by **सुराचार्य.** प. ३८–६७
(सप्तमोऽवसरः त्रुटित अव्यवस्थित)

Beginning of 7th:—

जिनागमं येन विगम्य सम्यक् etc.

(२) **सुकोशलकथा.**
(३) **विपाकसूत्र.**

Colophon:—

संवत् १२०३ पोस सुदि ३ दिने मोहिणीलिखिता पुस्तिका दूलीश्राविकानिर्जरार्थं । मंगलं महाश्रीः । सुकोशलं समाप्तं ।

३०१. **प्रकरणपुस्तिका.** प. २१२ (अव्यवस्थित); १२"×२½"

(१) उपदेशमाला.
(२) प्रतिक्रमण.
(३) दशवैकालिक.
(४) पिण्डविशुद्धि.
(५) अजितशान्ति.
(६) चैत्यवन्दनाभाष्य.
(७) जम्बूद्वीपसमास.
(८) योगशास्त्र (४ प्रकाश).
(९) भयहरस्तोत्र.
(१०) शीलकुलक.
(११) शाश्वताशाश्वतचैत्यस्तवन by सिद्धसेन.
(१२) वीतरागस्तोत्र (त्रुटित).
(१३) बृहच्चतुःशरण.
(१४) भक्तपरिज्ञा.
(१५) संस्तारकप्रकीर्णक.
(१६) ऋषिमण्डल (भत्तिब्भर०).
(१७) ओघनिर्युक्ति.
(१८) दिनकृत्य.
(१९) समवसरणस्तव (प्रा.). गा. २४
(२०) ऋषभपञ्चाशिका.
(२१) पार्श्वजिनस्तवन (प्रा. दशभवसम्बद्ध). गा. १५
(२२) ऋषभस्तवन (प्रा.) by धर्मकीर्ति. गा. ९
(२३) शत्रुञ्जयकल्प (प्रा.). गा. ३९
(२४) शाश्वतचैत्यस्तवन (प्रा.). गा. २४
(२५) विज्ञप्तिका by जिनवल्लभ. गा. ३७
(२६) शान्तिनाथस्तुति (लोयालोय०). गा. ४
(२७) चतुर्विंशतितीर्थङ्करस्तुति (प्रा.) by सोमप्रभ. गा. २७
(२८) संसारदावा० गा. ४
(२९) नेमि-स्तवन (प्रा. राजीमतीनवभवसम्बद्ध). गा. ७

३०२. हेतुबिन्दु (सटीक). प. २१५; १२″×१$\frac{1}{2}$″

Beginning:—

ओं नमः सर्वज्ञाय ।

यः संजातमहाकृपो व्यसनिनं त्रातुं समग्रं जनं
पुण्यज्ञानमयं प्रचित्य विपुलं हेतुं विपूतस्तमः ।
कृत्स्नज्ञेयविसर्पि...............याद्रिं श्रितो
लोके हार्दतमोपहो जिनरविर्मूर्ध्ना नमस्यामि तं ॥ १ ॥
वरं हि धर्मकार्येषु चर्वितस्यापि चर्वणं ।
निष्पीडितापि मृद्वीका............ति किं ॥
न्यायमार्गतुलारूढं जगदेकत्र यन्मतिः ।
जये[यं] तस्य गंभीरा गिरोहं जडधीः क्व च ॥
तथापि मंदमतयः संति मत्तोपि...
मयाप्येष हेतुबिंदुर्विरच्यते ॥

परोक्षेत्यादिना प्रकरणारंभे प्रयोजनमाह । तच्च श्रोतृजनप्रवृत्त्यर्थमिति केचित् । तद्वृद्धी............स्तस्य कर्मणो वापि कस्यचित् ।

यावत् प्रयोजनं नोक्तं तावत् केन गृह्यतामिति ।

तदयुक्तम् । यतोस्य प्रकरणस्येदं प्रयोजनमिति प्रयोजनविशेषं प्रत्युपाद(दे)यतां । प्रकरणस्य निश्चित्यानुपाये प्रवृत्त्यसंभवात् प्रेक्षावतां तदर्थितया............

[हेतु]बिंदुटीका समाप्ता ।

Colophon:—

[११ ?] ७५ वर्षे मार्गसिर...
ब्रह्माणगच्छे पंडितअभयकुमारस्य हेतुबिंदुतर्कः ।

३०३. छन्दोवृत्ति (**अमृतसञ्जीवनी**) by **हलायुध.** प. १९१; ९"×१½"

३०४. पर्युषणाकल्पचूर्णिटिप्पन (त्रुटित; अव्यवस्थित).

३०५. सप्तशतीछाया by **जल्हणदेव.** प. ३०४; १२"×२"

First folio is missing.

Beginning:—

......री हरिदश्ववंशे ।
अशेषभूमीवलयं सुखेन भुजे निजे यः कलयांबभूव ॥ ४ ॥
कल्पद्रुमस्येव फलानि यानि शाखामशेषस्य समाश्रितानि ।
जातानि भूपालकुलानि तानि......................
तस्यात्मजो धंधटनामधेयः......................
राज्यं चिरं लोहपुरे चकार पुरे नु तस्मिन् किल देधनाख्ये ॥ ६ ॥

ततोभवद् गोह्ल(ल्ह)णभूमिपालः प्रत्यर्थिभूपालकुलैककालः ।
तच्च द्वय........सत्यतापः स्वरूपशोभाजितपुष्पचापः ॥ ७ ॥

तस्मादभूज्जगति विस्तृतसान्वयाख्यः
संख्योत्सवो विजितवैरिगुणो गुणाब्धिः ।
धीमान् परं विजयपाल इति प्रसिद्धिं
यः सूरवंशमनयन्नयनाभिरामः ॥ ८ ॥

तस्माद् विक्रमपालभूपतिरभूद् यस्य प्रतापानलः
प्रत्यर्थिक्षितिपाललालविगलद्रक्तोर्मिजालच्छलात् ।
चक्रे ते क्रमणं यशश्च गगने यः खड्गघाताच्छलाद्
वैरिक्षोणिपकुंभिकुंभविगलन्मुक्ताफलच्छद्मना ॥ ९ ॥

खड्गाभिघातोद्गतपुष्करा दलत्कपोला वलयाचलायिता ।
कर्णाटराजश्च(स्य) रणस्तु(णे तु) दंतिपटीयसा येन घटा विघट्टिताः ॥

शक्रो विक्रमपालभूपतिरयं प्रत्यर्थिनां भूभृतां
पक्षा येन निपातिता निपततां संख्ये निजेनौजसा ।
संत्यक्तानकदुंदुभिः परिहितस्फूर्जत्कपींद्रध्वज-
श्चक्रे संगरभंगुरोवनिपतिर्वृत्रोपि पि(प)क्षोज्झितः ॥

चकार केषां विदुषां न गेहे द्विपां च केषां न जहार गेहान् ।
ससंपदो विक्रमपालभूपश्चंडांशुवंशस्य लसत्प्रदीपः ॥

तं स्तोतुं प्रभवो भवंति कवयो यद्विक्रमप्रक्रमात्
भीतानामभवत् रणेषु शरणं तद्भूभृतां भूभृतः ।
यद्भीतेरभियो बभूव शतधा वज्रस्य तन्मानसं
व्यालालीकरमंडलैककदलीकांडेषु यत्खेलनं ॥

गुणो गणानां गणनादरिद्रस्त्यक्तो जयो यस्य पराजयेन ।
न दुर्यशःसंगमभंगशंकि यशो दिशां लंघनजांघिकं च ॥

त्यागं भोगं विवेकं कुल-बल-विनयान् शील-कीर्ति-प्रतापान्
गांभीर्य-स्थैर्य-धैर्याण्यवितथवचनं भाग्य-सौभाग्य-मानान् ।
भक्तिं संभा(शांभो)रन(ग)म्यां गुणगणनिलयस्यास्य भूपस्य वक्तुं
शक्तो नक्तंचराणामपि भवति गुरुर्नो किमन्यो वराकः ? ॥

बभूव तस्मादथ रूद्रपालः प्रत्यर्थिभूपालदवाग्निलीलः ।
यस्मात् पतद्धेतिकुलाकुलानां रणे रिपूणां तृणता बतासीत् ॥

न कामधेनोर्न सुरद्रुमस्य चिंतामणेर्नो च न रोहणस्य ।
सस्मार तस्मिन् सति भूमिपाले श्रीरुद्रपाले सकलोर्थिसार्थः ॥
जज्वाल यस्याकलितप्रतापः प्रत्यर्थिभूभृत्कुल[बा]लिकानां ।
मनस्सु वेषाद् विरहानलस्य न निर्ववौ तंनयनांबुनापि ॥
नृपेण तेनाजनि म्हाइंदेवः सदादृताद्रंह्रि(दिंद्र ?)सुते ससेवः ।
अनेकसंग्रामजितारिभूपः............प्रवर्धितप्रौढप्रतापः ॥

न स लोको न[गो वा]स्ते न स देशो न तत् पुरं ।
म्हाइंदेवयशो यत्र जायते न श्रवोतिथिः ॥
दक्षोपि मार्गणत्यागे स न त्यजति मार्गणं ।
रतोपि भवपूजायां स निंदति भवं विभुः ॥
आज्ञा प्रज्ञापि तस्यास्ते लंघनीयावनीपते ।
न जा(या) रिपुसिंहस्य विद्विषां विदुषामपि ॥
कुर्वता वि[दु]षां गेहे संपदो विपदोज्झिताः ।
अन्योन्यं श्री-सरस्वत्योर्येन वैरं निराकृतं ॥
दृष्टपि(पृ)ष्टं न तस्यास्ति जातु प्रत्यर्थिनार्थिना ।
न श्रुतं कापि वचनं सरुषः परुषं मुखात् ॥
कवि-चारण-बंदिभ्यो येन मानपुरस्कृताः ।
स्वयशोबीजपुंजाभाः कर्पूरांजलयोर्पिताः ॥
कलधौतं दुकूलानि मौक्तिकालंकृतीस्कृती ।
स भूपो याचते कस्मै न दत्ते हेलया हयान् ॥

स जल्हणः क्षोणितले चकास्ति क्षोणींद्रभालैकतमालपत्रं ।
पुत्रेण येनाभवदत्र पुत्री श्रीम्हाइंदेवः प्रियभूमिदेवः ॥
यस्य प्रतापज्वलकीयकीलाकुलो हिमाद्रिं त्रि(द्रि स्त्रि)दशाचलत्वं
उद्यद्यशोराशिभिरेव देवशैलोपि धत्ते तुहिनाचलत्वं ।
बालप्रबोधार्थमिहार्थिसार्थकल्पद्रुमोलंकृतिमादधानां
छायामिमां दिव्यगिरा स समशल्याः स्वमत्याः सदृशीं करोति ॥

पसुवइणो० पशुपते० मुखचंद्रमिति रूपकं गृहीतार्घपंकजमिवेत्युत्प्रेक्षा । रूपकोत्प्रेक्षयोः संकरो नामालंकारः ॥

अमियं पाउअकव्वं पढिउं सोउं च जे ण याणंति ।
कामस्स तत्ततत्तिं कुणंति ते कह ण लज्जंति ? ॥ २ ॥

अमृतं प्राकृतकाव्यं पठितुं श्रोतुं च ये न जानंति ।
कामस्य तत्त्वचिंतां कुर्वंति ते कथं न लज्जंते ? ॥

अनेन ग्रंथस्य प्रयोजनमुक्तं । आक्षेपोलंकारः ॥

ससत्तसयाइं कईवच्छलेण कोडीय मज्झयाराओ ।
हालेण विरइआइं सालंकाराण गाहाण ॥ ३ ॥

सप्त शतानि कविवच्छ(त्स)लेन कोट्या मध्यात् । मज्झार इति देशीयं । हालेन शालिवाहनेन । संस्कृतेप्येवं यथा–हा हा हाल ! नितांतकांतकवितालंकारेति विरचितानि सालंकाराणां गाथानां । प्रतिज्ञागाथेयं ॥

End:—

इति श्रीजल्हणदेवविरचितायां सालंकारायां सप्तशतीच्छायायां सप्तमशतं समाप्तं ॥

३०६. (१) द्व्याश्रयमहाकाव्य (१–२० सर्ग) by आचार्य**हेमचन्द्र.**
प. २७८; १४½"×२¼"

End:—

इत्याचार्यश्रीहेमचंद्रकृतौ चौलुक्यवंशे द्व्याश्रयमहाकाव्ये विंशः सर्गः । मंगलमस्तु मे ते च । ग्रंथसंख्यायां श्लोकशत २८२८ । मंगलं महाश्रीः ।

Colophon:—

श्रीश्रीमालवंशीयव्यव० कपर्दिश्रावकेण श्रीजयसिंहसूरिभ्यः पुस्तिकेयं प्रदत्ता ।

(२) प्रश्नपद्धति by **हरिचन्द्रगणि.** प. ४९; १८"×१½"

This contains ग्रंथाग्रं about 125.

End:—

इति हरिचंद्रगणिग्रथितप्रश्नपद्धतिग्रंथे गीतार्थचूडामण्यभयदेवसूरिगुरुमुखादवधारितानि प्रश्नानि लिखितानि ।

Second Palmleaf Ins. of अदुवशीपाडा has:–

इति हरिचंद्रगणिग्रथितप्रश्नपद्धत्यामुत्तरार्धः । समाप्ता प्रश्नपद्धतिः श्रीमदभयदेवगुरुप्रसादात् लिखितमात्मार्थं स्वहस्तेन आचारकल्पाध्ययन-उपासकप्रतिमावत्सरेऽणहिल्लपत्तने अन्नपाटके चातुर्मास्यां । यदाप्तवचनविपर्यस्तं लिखितं विमोहात् तत् संशोध्यं बुधैर्मय्यनुग्रहं कृत्वेति ॥

Written with a very bold hand in a recent Script contains 2 lines per side and 36 letters per line.

३०७. (१) पुष्पवतीकथा (प्रा.). प. १–४३

Beginning:—

मुत्तममुत्तं सुद्धं संतमसंतं च सुगमगइयं च ।
कंतमकंतं च कहा **पढमजिणं** वंदिमो पढमं ॥
सुहव ण सुपयपूरं अत्थो..................
भत्तीए वंदिमो पच्छा ।
नमिऊण **अभयसूरी** भत्तीए सुयगुरुं जुगपहाणं ।
सेयंवरकुलतिलयं तवलच्छी-सरस्सईनिलयं ॥
सज्जणगुरुस्स सीसे......**पुष्प(प्फ)वईयं कहं** कहइ ।

End:—

अरहंता मंगलं देंतु ॥ ६४३ ॥
पुष्प(प्फ)वई नाम कहा समत्ता ।

(२) **सुलसाचरित्र** (अपभ्रंश). गा. १७ प. ४३(२)

Beginning:—

नमः सर्वज्ञाय ।
पणमवि तित्थेसरु **वीर**जिणेसरु भणमि **सुलस**सावि-**चरिउ** ।
समत्तसमन्निउ विबुहहि वन्निउ दंसण-नाणगुणावरिउ ॥

End:—

एह संतिपुरिसत्थपसत्थिय **देवचंदसूरि**हिं समत्थिय ।
इय बहुगुणभूसिउ **जिण**सुपसंसिउ **सुल**सचरि धम्मत्थियहं ।
निसुणंत-पढंतह भत्तीए सत्त णंदउ मोक्खु मोक्खत्थियहं ॥ १७ ॥
सुलसाख्यानकं सम्मत्तं ।

Folio. 12 a—13 b **एकक्खरस्तुति.**

Beginning:—

जय अमरनय चरणमय धरणकयचरण गयमरण गयकलह

End:—

देवचंदपयकमल । एकक्खररतुति ॥

(३) **सगरचक्रवर्तिचरित्र** (प्रा.).

Beginning:—

सुरवरकयमाणं नट्ठनीसेसमाणं
भव-जलहि-सुजाणं सत्तहत्थप्पमाणं ।
वियरियवरदाणं छिन्नकम्मारिताणं
प[य]डियवरनाणं वंदिउं **वद्धमाणं** ॥ १ ॥

सग[र]रायचक्कवइ चउसट्ठिसहस्सजय(जुव)इकयविहवो ।
भुंजई य एकछत्तं सयलसमत्थं इमं भरहं ॥

End:—

तं तय विणा न होही तेण कुवियं पसाएमि ।
सुहवतु भुयंतरिहि महु नियवल्लह पाण
तेण न तविउं होसु कयडा थुति करिसि अ पीति ॥

Colophon:—

संवत् ११९१ वर्षे भाद्रपदशुदि ८ भौमे अद्येह धवल्लक(ल्क)के समस्तराजावलीविराजित-महाराजाधिराज-परमेश्वर-श्रीत्रिभुवनगण्डसिद्धचक्रवार्त्तिश्रीजयसिंहदेव-कल्याणविजयराज्ये एवं काले वर्तमाने तत्पादप्रसादात् महं श्रीगांगिल श्रीकरणादौ व्यापारान् करोति । अद्येह श्रीखेटकाधारमंडले राज० सोभनदेवप्रतिप[त्तौ] श्री-खेटकास्थानात् विनिर्गतवास्तव्यपंडितवामुकेन गणिणिदेवसिरियोग्यपुष्पवतीकथा लिखितमिति । शुभं भवतु लेखक-पाठकयोः । यादृशं etc. यदक्षरपरिभ्रष्टं etc.

(४) **पउमसिरिचरिय** (अपभ्रंश) by **धाहिल.** प. १–५३

Beginning:—

नमः सु(श्रु)तदेवताया(यै) ।

वा(धा)हिल दिव्वदिहि **कवि** जंपई अदु(हु) जण ! रोलु मुएविणु संपई ।
निसुणह सामि कंनरसायणु धम्मकहाणउं प (? जं) सुगुण-भायणु ॥
कवडतणुभाविं विसमसहाविं थेवेण वि तारु न हवि
धणसिरि गुणसारहु नियभत्तारहु हुय अणिट्ठ जिह अन्नभवि ।
तिह कह वि विसेसीं सुणहु धंमु **पउमसिरि-चरिउ** निसेणु(सुण)हु रंमु
ललियक्खरपयडियअत्थसारु तरुणीयणु नावइ बहुवियारु
पणमेपु(वि)णु चंदप्पहजिणिंदु निम्मूलमूलियदुक्खकंदु
महासेणरायकरकमलसिरि-लक्खणदुन्नयरयसमीरु
सारयमियंककरधवलदित्ति हर-हारविमलच्छि(वि)त्थरियकित्ति ।
कंदप्पदंतिकेसरिकिसोरि पंचेंदियदुट्ठभुयंगमोरि
उप्पाडियदारुणमायसयलु मसि(मुसु)मोरियमोहमहारिमलु
उल्लंघियदुत्तरु भव-समुद्दु तियसिंदनमीयचलणारविंदु
तियलोकहु निदलियमाणु परमेसरु सासयसुहनिहाणु
चउतीसमहाअइसयसमग्गु गुणसायरु पयडियमोक्खमग्गु
पणमिवि जयसामिणि नयसुरकामिणि वागेसरिसियकमलकर
पणयहंस भाविं जीए य भाविं कविहिं पयट्टइ वाणि वर

End:—

सुयदेवय व जासु पसत्थ पंकयकरपोत्थयकमलहत्थ ।
करकयकहं जसु प्पसन्न सुलक्खण-सुनय-विणय-वन्न
हिमगिरिसुय व जा भव-विरत्त न(त)व-चरणसमुज्जय-नियम्ममत्त
अब्भत्थिएण **दूलज्ञियाए** विणएण साहुजणरज्ञियाइ
पउमसिरिचरिउ मइं रइउ एउ जो पढइ सुणइ तसु होइ सेउ
सुयदेव[या] मणि ताण बुद्धि देउ अवाइ दुक्खइ अवहरेउ
अणुगय पंकयदलच्छी घरणी व तासु घरि वसइ लच्छि
सो जाणइ धम्माहम्म-भेउ अचिरेण होइ तसु दुक्ख-च्छेउ
ससिपालकवुकय आसि नाहु जसु विमलु कित्ति जगु भमइ साहु ।
सुनिम्मलि वंसि समुब्भवेण **पउमसिरिचरिउ** किउ **धाहिलेण** ।
कवि**पा**सह नंदणु दोसविमद्दणु सूराईहिं महासईहिं
जिण-चलणहं भत्तउ तायह पोत्तउ दिवदिट्ठि निम्मलमइहिं ॥ १६ ॥
जावइयं सज्झाए काले[ा] वट्टइ सुहेण भावेण ।
ताव खवेइ पुराणं नवयं पावं न बंधेइ ॥

मंगलं महाश्रीः ।

(५) **अञ्जनासुन्दरीकथा** (अपभ्रंश). प. ५४–५५ (अपूर्ण)

Beginning:—

कुल-भय-विहवंसंपुंनिमहि अन्नुहि जंमि उ यत्ताइं ।
जण ! निसुणहु **अंजणसुंदरि**हि जगे सुह-दुक्खाइं पत्ताइं ॥
पणमवि **मु**णिसुव्वयसामियहु नेव्वाणसिद्धिसुहगामियहो
जिणसासणभत्तिय एकमण **कह** पुन्नपवित्त सुणेहु जण !
उत्तुंग विउल विसत्थि वसिय विय दाहिणदिसिहिं **म**हिंदपुरे
धण-कणग-समिद्धजि(ज)णालएहिं **जि**णभवणेहिं रयणविसालएहिं
सोहंति जिण-चित्तालये..............................

(६) **जन्माभिषेक** (अपभ्रंश). प. १–८

Beginning:—

कंपिउ रयणासणु तवनिन्नासणु मिलियछप्पन्नदिसाकुमारीए ।
तिसलाए सुइकम्मं विहियं जम्मंमि जस्स सो जयउ ॥ १ ॥
सो जयउ जस्स समकालचलियासिंहासणेहिं सक्केहिं ।
विहिओ **जम्मणमहो** सुमेरुसिहरम्मि मिलिएहिं ॥ २ ॥

End:—

चूडामणिचूंबी(बि)उ महि नमेइ अट्ठुत्तरसइं चि(वि)त्तिहिं थुणेइ
जय जय रयणायर ! भुवणदिवायर ! चलणकोडिचाली(लि)यचलण !
जय जय परमेसर ! परममुणीसर ! भवीयविहियसिवसुक्खफल !

जन्माभिषेकः समाप्तः । शुभं भवतात् ।

(७) **दाना**दिप्रकरण by **सुराचार्य.**

(१ प्रथम अवसर श्लो० ४६)

End:—

जरा-मरणवर्जितं शिवपदं यदत्यूर्जितं
निरंतरसुखांचितं निरुपमं रुजा वंचितं ।
अनंतमतिदुर्लभं गुरुविवेकिनां वल्लभं
समस्तहृतकर्मतस्तदधिगम्यते धर्मतः ॥ ४६ ॥

प्रथमोवसरोवसितः ।

(२ अवसर, श्लो० ५४)

Beginning:—

धर्मस्य निर्मलधिया etc.

(३ अवसर, श्लो० ५३)

Beginning:—

दानं द्वितीयमभयस्य etc.

(४ अवसर, श्लो० ५३)

Beginning:—

अन्नादिदानमिदमस्तनिदानबंधं etc.

(५ अवसर, श्लो० ९७)

Beginning:—

आगमो वीतरागस्य वचनं स्यादवंचनं ।

(६ अवसर, श्लो० १०९)

Beginning:—

संघोनघः स्फुरदनर्घगुणौघरत्नरत्नाकरो हितकरश्च शरीरभाजां ।

(७ अवसर, श्लो० ११४)

Beginning:—

जिनागमं येन विगम्य etc.

End:—

जिनपतिमतस्यावदातस्य गुर्वी
सुराचार्यैरिति वितरणं साधितं सानुयुक्तया।
सप्तमोवसरोवसितः ।

३०८. उपमितिभवप्रपञ्चोद्धार(गद्य) by **देवसूरि.** प. १८४; १३½″×२″.

Beginning:—

ओं नमो वीतरागाय ।
नत्वा श्रीमन्महावीरं मोह-कंदर्पदर्पहं ।
केवलालोकभास्वंतं सद्भूतार्थप्रवेदकं ॥ १ ॥
स्वस्य स्मरणनिमित्तं सुश्रावकवीरधवलभणनाच्च ।
उपमितिभवप्रपंचां संक्षेपेणोद्धरिष्यामि ॥ २ ॥
पंच हिंसादयो दोषा इंद्रियाणां च पंचकं ।
चतुष्टयं कषायाणां महामोहसमन्वितं ॥ ३ ॥
एतावानेव पिंडार्थः शास्त्रस्यास्य निगद्यते ।
प्रस्तावाष्टकविस्तीर्णः स चैत्रमिह वर्ण्यते ॥ ४ ॥

तत्र प्रथमप्रस्तावे येन हेतुना ग्रंथकारेण कथेयं कृता स हेतुः प्रतिपाद्यते ।

End:—

इत्युपमितभवप्रपंचोद्धारेऽष्टमः प्रस्तावः समाप्तः ।
श्री**देवसूरि**भिरियं संक्षेपाद् **विमलचंद्रगणि**युक्तैः ।
उपमितिभवप्रपंचा समुद्धृता स्व-परबोधार्थं ॥
यावच्छशधर–तरणी बोधयतः कुमुद-पंकजवनानि ।
तावन्नंद्यादियमपि विचार्यमाणा सदा विबुधैः ॥
ग्रंथाग्रं २३२८

३०९. (१) सूक्त[रत्नाकर?]. प. १–२०; १४″×२½″

Beginning:—

नमस्कारपद्धतिः—
ध्यानाग्नेर्धूमवल्लिः प्रशमरससरःशैवलं केवलश्री–etc.

(२) योगकल्पद्रुम. श्लो० ६४ प. २०–२६*

Beginning:—

अर्हन्मुनींदुर्लोकेशः केशवः शिव इत्यमी ।
पर्यायाः पर्यवस्यंति यत्र तद् भ(?)वनं स्तुमः ॥ १ ॥

---

* पञ्चविंशतितमं पत्रं न दृश्यते ।

जीयासुर्योगिनां योगरहस्यस्नानचेतसां ।
परानंदामृतस्यंदसुंदराः सुखसंपदः ॥ २ ॥

End:—

यस्मिन् मूलममी यमाः सनियमा ध्यानं प्रकांडस्थितिः
स्कंधः श्रीसमताणिमस(?)प्रभृतयः संपल्लवाः पल्लवाः ।
ज्योत्स्नाभांसि यशांसि पुष्पपटलान्यानंदलक्ष्मीः फल—
स्फातिः सैष निषेव्यतामविरतं श्री**योगकल्पद्रुमः** ॥ ६४ ॥
योगकल्पद्रुमः समाप्तः ॥

(३) **सूक्त[सङ्ग्रह?].** प. १–९७ (त्रुटित).

(४) **सूक्तसमुच्चय** by **विबुधचन्द्र.** प. ९८–१३७ (त्रुटित) श्लो० ४२१

Beginning:—

ओं नमः सर्वज्ञाय ।
छायाविश्रांतसंसारसंतप्तानंतजंतवे ।
श्रेयःफलश्रिये स्वस्ति **वि**वेकजगतीरुहे ॥ १ ॥

End:—

श्री**दे**वप्रभसूरिनैगममणेरादाय सारस्वतं
बीजं किंचन निःसपत्नमहिमप्राग्भारगर्भांकुरं ।
मेधावी **विबुधः** कविर्नवनवामुन्मीलयंतं मुदं
विश्वस्यापि **विवेकपादप**ममुं सच्छायमारोपयत ॥ ४२० ॥
यस्मै प्रसादविवशो दिशति स्म शास्त्र-
तत्त्वामृतं स भगवान् **न**रचंद्रसूरिः ।
सोयं कृती **विबुधचंद्रकविः** स्वहेतोः
सूक्तानि कानिचिदमूनि समुज्जगार ॥ ४२१ ॥
समाप्तोयं **म**लधारिश्री**न**रेंद्रप्रभसूरीणां **वि**वेकपादपो नाम **सू**क्तसमुच्चयः ॥

(५) **विवेककलिका** by **नरेन्द्रप्रभ.** प. १३८–१६०*

End:—

श्री**दे**वप्रभसूरिपादकमलद्वंद्वद्विरेफोपमा-
धन्यः श्री**न**रचंद्रसूरिजलदोपास्तिक्रियाचातकः ।
आचार्यो **म**लधारिगच्छसरसीराजीवमूर्तिर्व्यधा-
देतामात्मकृते **विवेककलिकां** श्रीमन्न**रेंद्रप्रभः** ॥ ११० ॥

* १३८–१३९ एतत् पत्रद्वयं नास्ति ।

(६) **सूक्तमाला.** प. १६१–१६२

Beginning:—

प्रणिपत्य परं ज्योतिर्नानाभणितिचं(भं)गिभिः ।
श्लोकैरेव यथाशक्ति **सूक्तमालां** वितन्महे ॥ १ ॥

(७) **सामाचारी** (त्रुटित).

३१०. (१) **पञ्चसङ्ग्रह** by **चन्द्रर्षि.** प. १–४९; १४½"×२"

(२) **पञ्चसङ्ग्रहवृत्ति** [by **मलयगिरि**]. प. १–३५०*

End:—

चंद्रऋषिणा चंद्रऋष्यभिधानेन साधुना

३११. (१) **आवश्यकनिर्युक्ति** (त्रुटित). †प. १६५; १३½"×१¾"

(२) **योगशास्त्र.** प. १–२८

(३) **बृहत्संग्रहणी** (निट्ठवियअट्ठकम्मं). गा. ५३० प. २९–६१

(४) **कुशलानुबन्धि**(चउसरण) by **वीरभद्र.** गा. ६२ प. ६१–६४

(५) **पर्यन्ताराधना** by **सोमसूरि.** गा. ६८ प. ६४–६८

(६) **वीतरागस्तोत्र.** प. ६८–८१

(७) **आत्मानुशासन.** प. ८१–८७

(८) **भक्तामर.** प. ८७–९१

(९) **जम्बूद्वीपक्षेत्रसमास**(नमिऊण सजल०).गा. ११९ प. ९१–९९

(१०) **नर्मदासुन्दरीसन्धि** (अपभ्रंश) by **जिनप्रभ.** प. ९९–१०६

Beginning:—

अज्ज वि जस्स पहावो वियलियपावो य अखलियपयावो ।
तं वद्धमाणतित्थं नंदउ भव-जलहि-बोहित्थं ॥ १ ॥
पणमवि पणइंदह **वीर**जिणिंदह चरणकमलु सिवलच्छिकुलु ।
सिरि**नमयासुंदरि**गुणजलसुरसरि किं पि थुणिवि लिउं जंमफलु ॥ २ ॥
सिरि**वद्ध**माणु पुरु अत्थि नयरु तहिं संपइ नरवइ धम्मपवरु ।
तहिं वसइ सुसावगु **उसहसेणु** अणुदिणु जसु मणि **जिणनाह**वयणु ॥ ३ ॥
तब्भज्ज**वीर**मइकुक्खि जाय दो पवर पुत्त तह इक्क धूअ ।
सहदेव-वीरदासाभिहाण **रिसिदत्त** पुत्ति **गुणगणपहाण** ॥ ४ ॥

End:—

* षोडश पत्राणि विनष्टानि । † १, १२, १५३ इत्येतानि पत्राणि गतानि ।

तेरस सय अडवीसे वरिसे सिरिजिणपहुप्पसाएण ।
एसा **संधी** विहिया **जिणिंद**वयणाणुसारेणं ॥ ७१ ॥
श्रीनर्मदासुंदरीमहासतीसंधि समाप्ता ।

(११) **जिनागमवचन** by **जिनप्रभ.** प. १०६--१०८

Beginning:—

बपु रि ! कंदप्प-सप्पिहिं जगु डसियउ
हा हा ! विसय-पिसायहिं गसियउ ।
जइ **जिण-आ**गममंत न हु हुंतू
ता जिउ गयजिउ भवि भमडंतू ॥ जइ **जिण**
अरि रि ! मिच्छत्त-महाविसिं घारिउ
हा हा ! मोह-रक्खसि तिजगु संहारिउ । जइ **जिण** ॥ २ ॥
मंत तहिं बाहिरु गहु विसु नासइ
अंतरु पुण **जिण** विणु कोइ न विणासइ । जइ जिण ॥ ३ ॥

End:—

आगमिकसूरि जिणइंदपह-वयणू
जो सुणइ एहु सो लहइ सुहरयणू ॥ ४ ॥
वयणानि समाप्तानि ।

(१२) **जिनमहिमा** by **जिनप्रभ.** प. ९९–१०६

Beginning:—

जावह **जिणवर** नाणु ऊपन्नं तक्खणि समवसरणु नीपन्नं ।
चउविहदेव-निकाय सुरम्मा कारइं **जिण**वर-केवलिमहिमा ॥ १ ॥

End:—

जो सुरु-कोडिहिं सेवियचलणू भवि भवि तसु **जिण**-पायह सरणू ।
जिणवर-रिद्धि कु वन्निउ सक्कू जइ वि पच्चक्खउ होइ य सक्कू ॥ ११ ॥
बपु रि ! अतिरसउ अरि रि ! झाणू
कटरि ! रिद्धि वपु निरुवमु नाणू ।
जिणप्रभु जग-गुरु देवहि देवू
चउवीह संघह मंगल देउ ॥ १२ ॥

(१३) **भावनाकुलक**(जम्म-जरा०). गा. २२ प. १०८–११०

(१४) **दूहामाई.** प. १११–११४

Beginning:—

अर्हं

भले भणेविणु पणमियइ जग-गुरु जगह पया(हा)णु ।
जासु पसाइं मुद्ध जिय पावइं निम्मलु नाणु ॥ १ ॥
ॐकारिहिं उच्चरओ परमिट्ठिहि नवकारु ।
सिव मंगलु कल्लाणकरु जाणसु नामुच्चारु ॥ २ ॥

End:—

मंगल महासिरि-सरिसु सिवफल-दायगु रम्मु ।
दूहामाई अक्खियइ पुहवीहिं जिणवर-धम्मु ॥ ५८ ॥

दूहामात्रिका समाप्ता ।

(१५) **सालिभद्दकक्क** by **पउम.** प. ११४-११९

Beginning:—

भलि भंजण कम्मारिकुल **वीर**नाहु पणमेवि ।
पउमु कहइ **कक्क**क्खरह **सा**लिभद्द-गुण के वि ॥ १ ॥
कत्थ वच्छ ! कुवलयनयण ! **सा**लिभद्द ! सुकमाल ! ।
भद्दा पभणइ देव ! तउं थक्कउ इत्तीय वार ? ॥ २ ॥

End:—

क्षामेविणु **जिण**-मुणिसहिउ अणसणु गहिउ रवन्नु ।
सब्बट्ठह सिद्धिहि गयउ **सा**लिभद्दु तहिं धन्नु ॥ ६९ ॥

सालिभद्दकाक समाप्त ।

(१६) **संवेगमाई.** प. ११९+१२४

Beginning:—

भले भणउ जाणउ परमत्थु, दुलहउ चउविहसंघह सत्थु ।
एउ जाणेविणु लाहउ लिअउ, निय विढत्थु धणु धम्मि दिउ ॥ १ ॥
मीडउं भणीउ किम कवि कहइ, मीडा विणु संसारु जु भमइ ।
मीडा तणीअ ज एवड सक्ति, मीडउं ध्यातां हुअइ ज मुक्ति ॥ २ ॥

End:—

मंगलु महासिरि सउं संघ, जासु आण देवहं अलंघ ।
उवसमि सउं **सं**वेगिहि रची, बहूयाली सावय मुणि रसी ॥ ६१ ॥

शुभं भवतु श्रीसंघस्य ।

(१७) **वयरसामिचरिअ** (अपभ्रंश) by **जिनप्रभ.** प. १२४-१२९

Beginning:—

नम(मि)वि जिणवर निज्जियाणंग

छत्तीस गुणगणपवर सुगुरु पणमवि सुभाविहिं ।

धम्मु जु जीवह दयसहिउ सयलसुक्खदायगु सहाविहि

चउविह संघ वि सुरमहिउ मुत्ति-निअंविणि-हारु

वयरसामि-सुचरिउ भणिसु भवियण-मंगलकारु

End:—

झाअउ अणुदिणु चंदगच्छि देवभद्दसूरि दक्ख

फुरइ जिणप्रभसूरि समण-गुण लक्ख ।

नाणि चरणि गुणि कित्ति समद्द

देउ वयरसामि-चरिउ आणंदु ॥ ५८ ॥

झाअउ अणुदिणु सोहग्गमहानिहिणो गुरुणो सिरिवयरसामिणो चरियं ।

तेरह सोलुत्तरए रइयं सुहकारणं जयउ ॥ ५९ ॥

जिम जिणेसरि थुणिइं म(ज)ह पु(वु)त्तु सुअकेवलि

गणहरि पवरि नाणलिद्ध(लद्धि)संपुन्नगुणहरि

जह समत्ति चरित्ति थिरि दाणि सीलि तवि पुन्नु महाहरिं

तह भवियण तं वि(थि)रु हवउ वयरसामि-सुचरित्त

पढंत गुणंत सुणंतह संवेगु धरंत ॥ ६० ॥

(१८) **उपदेशकन्दली.** प. १३०–१३७

(१९) **ज्ञानप्रकाशकुलक** by **जिनप्रभ.** प. १३७–१४३

End:—

ज्ञानप्रकाशकुलकं रचितमिदं श्री**जिनप्रभाचार्यैः** ।

श्री**शत्रुंजय**सत्तीर्थसेविभिर्मोहनाशाय ॥ ११४ ॥

(२०) **विचारगाथा (?).** प. १४३–१५३+१

Beginning:—

जयइ जयइ जिणधम्मो विवेयरम्मो पणासीयकुहम्मो ।

उवसमपुरपायारो पयडियनाणाइपायारो ॥ १ ॥

त जयइ जगि सिरिजिणवरविंद जसु पय पणमइ सयलसुरिंद ।

परिवज्जिय सावज्जारंभ नर[य]कूव निवडंतह खंभ ॥ २ ॥

त दुलहु लहिउ सुमाणुसजम्मु कहवि कहवि सिरिजिणवरधम्मु ।

तत्थ वि बोहिबीउ पुण रम्मु जं निहणइ दुट्ठ ट्ठ वि कम्मु ॥ ३ ॥

End:—

सिरिजिणपहणीयसयलवसग्ग, ते लहु लहिसइ सग्ग पवग्ग ॥ २४ ॥

मंगलं महाश्रीः । शुभं भवतु लेखक-पाठकयोः ।

(२१) **माईचउपई.** प. १–१०

Beginning:—

त्रिभुवन-सरणु सुमरि जगनाहु, जिम फिट्टइ भव-दव-दुह-दाहु ।

जिणि अरि आठ करम निद्दलिय, नमो जिन जिम भवि नावउ वलि ॥ आंचली ।

सवि अरिहंत नमिवि सिद्धे उवज्झाय साहू गुण भूरि ।

माईय बावन अक्षर सार चउपईबंधि पढउं सुविचार ॥

भले भणेविणु भणीयइ भलउं, तिहूयणमाहि सारु एतलउं ।

जिनु जिनवचनु जगह आधारु, इतीउ मूकिउ अवरु अस्सारु ॥

End:—

जा ससि सूरु भूयणु व्याप्पंति, जा ग्गह नक्षत्र तारा हुंति ।

जा वरतइ वसहु व्यापारु, ता सिवलच्छि करउ मंगलचारु ॥ ६३ ॥

(२२) **जिनगणधरनमस्कार** (अपभ्रंश). गा. ९ प. ११–१२

Beginning:—

चुलसीय गणहर पढमजिणिंदह पंचनउई सिरिअजियजिण ।

दुरुतरु सिउरि संभवदेवह सोलसउ जिण अभिनंदहो ॥

नमउं सु(सू)रोगमणि ।

मुणिचूडामणि गुणगणगामिणि भवियकमलवण-दिणमणिहो ।

नमउं नमउं सूरोगमणि ॥ १ ॥

End:—

पन्नरस कम्मभूमिगय मुणिवर अन्ने वि हु चरित्तधर ।

भाविहिं वंदउ बहु आणंदउं आणंदियतियलोय जिणहो ।

नमउं नमउं सूरोगमणि ॥ ९ ॥

(२३) **न्यायप्रवेश.** प. ७

३१२. (१) **कल्पसूत्र.** प. १–१४३; १४″×१½″

(२) **कालकाचार्यकथा** (अपूर्ण). प. १४३–१६९

Beginning:—

अत्थि इहेव जंबुद्दीवे भारहे धारावासं नाम नयरं etc.

३१३. **रघुविलास** (अपूर्ण; श्लिष्टपत्र) by **रामचन्द्र.** प. १८३; १३″×१½″

३१४. **तर्कभाषा** by **मोक्षाकरगुप्त.** *प. ७५; १४″×२″

* आद्यानि त्रीणि पत्राणि लुप्तानि ।

३१५. (१) **अवंतिसुकुमालसंधि** (अपभ्रंश). प. १६—२४
(२) **गिरनाररास.** प. १—१२
(३) **संयममञ्जरी** (अपभ्रंश). प. १२—१६ अपूर्ण
(४) **उपदेशरसायन** by **जिनदत्त.** प. १—१७ त्रुटित
(५) **योगशास्त्र** (अन्तिमप्रकाश). प. १८—३८ त्रुटित
(६) **वयर(वज्र)स्वामिचरित्र** (अपभ्रंश प्रथमसन्धि). प. १६

३१६. **लीलावतीकथा** (प्रा.). प. १३१; १४″×२″

First 5 leaves damaged on one side with occasional marginal notes.

Beginning:— ।६०। ॐ नमो विघ्नराजाय ।

नमह सरोससुअरिसणसव(च)वियं कररुहावलीजुयलं ।
हरिणक्कसवियडोरत्थलछिदो [.........] हरिणो ॥ १ ॥
तं नमह जस्स तइया तइयवयं तिहुयणं तुलंतस्स ।
सायारमणायारे अप्पणमप्पच्छि(च्छि)य निसन्नं ॥ २ ॥
तस्स [य...पुणो पणम]ह निहुयं हलिणा हसिज्जमाणस्स ।
अपहुत्तदेहलीलंघणद्धवहसंठियं चलणं ॥ ३ ॥
सो जयउ जस्स पत्तो कंठे रिट्ठासुर[स्स घणकस]एण(णो) ।
उप्पायपवड्डियकालवासकरणी भुयफलिहो ॥ ४ ॥
रक्खंतु वो महोयहिसयाण(यणे) सेसस्स फणिमणिमऊहा ।
आसि तिवेय-तिहोमग्गिसंगसंजणियतियसपरिओसो ।
संपत्ततिव[ग्गफलो बहुला]इच्चो त्ति नामेण ॥ १८ ॥
अज्ज वि महग्गिपसरियधूमसिहाकवलि(लुसि)यं व वच्छयलं ।
उवव(ठ्व)हइ मयकलंकच्छले[ण मयलंछणो जस्स] ॥ १९ ॥
तस्स य गुणरयणमहोयहीए एक्को सुओ समुप्पन्नो ।
भूसणभट्टो नामेण नियकुलन(ण)हयलमयंको ॥ २० ॥
[जस्स पियबंध]वेहि व चउवयणविसंघ(णिग्ग)एहिं वेएहिं ।
एक्कवयणारविंदट्ठिएहिं बहु मन्निओ अप्पा ॥ २१ ॥
तस्स तणएण एयं असारमइणा वि......रइयं सुणह ।
कोऊहलेण लीलावइ त्ति नामं कहारयणं ॥ २२ ॥

End:—

एत्थ समप्पइ एयं संखेवुप्फालियं कहावत्थुं ।
अइवित्थरेण कहियं मयच्छि ! को भाविउं तरइ ? ॥

भणियं च पिययमाए रइयं **मरहट्ठदेसिभासाए** ।
अंगाइं इमी कहाए सज्जणासंगजोगाइं ॥
एयं जं अम्हं पिययमाए हियएण किं पि पडिवन्नं ।
तं न तहा जं संतं सुयणा! गेण्हह पयत्तेण ॥
सुयण-खलेहि अलं चिय गुणदोसे जे नियंति किं तेहिं ? ।
गुण-दोसरया जाणंति मज्झिमा कव्वपरमत्थं ॥ १३३० ॥
अट्ठारहसयसंखा अण(णु)ट्ठुसंखाए विरइयपमाणा ।
एस समप्पइ इण्हिं **कह** त्ति **लीलावई** नाम ॥ १३३१ ॥
दीहच्छि ! कहा एसा अणुदियहं जे पढंति निसुणंति ।
ताय(ण) पियविरहदुक्खं न होइ कइया वि तणुयं पि (अंगि!) ॥१३३२॥
लीलावतीकथानकं समाप्तं । मंगलं महाश्रीः ॥

३१७. (१) सिद्धसेनचरित (प्रा.). *प. १–११

Beginning:—

सिरि**सि**द्धसेण–**पा**लित्त–**म**ल्ल–सिरिबप्पहट्टिसारिच्छा ।
नीहार–हारधवलो जाण ज्ज वि फुरइ जसपसरो ॥

प्रथमं **सि**द्धसेनचरितं भण्यते ।

उज्जेणी नाम पुरी **अ**वंतीदेसस्स मंडणुब्भूया ।
अच्छेरयाइं जीए दट्ठूणं विबुहलोयाणं ॥
अन्ना न का वि नयरी रंजइ मणयं पि माणसं तीए ।
आसि जहट्ठियनामा सूरी सिरिवुड्ढवाइ त्ति ॥
तस्स पसिद्धी(द्धिं) सोउं एगो धिज्जाइओ अहम्माणी ।
नामेण **सि**द्धसेणो वायत्थमुवागओ देसा ॥
सो वि य तंमि दिणंमि केणइ कज्जेण नाइदूरंमि ।
गाममेगंमि गओ पुच्छिय विप्पो वि जा जाइ ॥
गामंमि तंमि सूरी ताव पंथस्स मज्झयारंमि ।
आगच्छंतो दिट्ठो कयकज्जो तेण इमं पुट्ठो ॥

End:—

सिद्धसेनदिवाकरकथानकं कथितं ।

(२) **पादलिप्ताचार्यकथा** (प्रा.). †प. ११–४३

---

* ४, ६, १० इत्येतानि पत्राण्यत्र न सन्ति । † १२, १३, १५, १६, २५, ३९ इत्येतानि पत्राण्यत्र गतानि ।

Beginning:—

अत्थि इह भरहवासे नामेणं कोसला पुरी रम्मा ।
जीए पडिरूवमन्ना वि न पावई का वि नयरी त्ति ॥
तीए समिद्धो लोयाण माणणिज्जो य सावओ सेट्ठी ।
फुल्लो नामेणं तस्स समगुणा भारिया पडिमा ॥

(३) **मल्लवादिकथा**(प्रा.). प. ४४–४९

(४) **बप्पभट्टिकथा**(प्रा.). *प. ४९–१०५ गा. ६८५ ले. सं. १२९१

(५) **कलावतीचरित्र**(प्रा.). प. ८४; १२"×१$\frac{1}{2}$"

Beginning:—

ॐ नमो वीतरागाय ।

अत्थि कलाविकुलड्ढं कइनिसरविरायमाणघणसालं ।
साएयपुरं गिरिकाणणं व सच्छंदरायसुयं ॥
तत्थ य हय–गयणाहो उन्नामियकेसरो अइकरालो ।
विप्फुरियपोरुसो केसरि व्व नरकेसरी राया ॥
कमला इव कमलकरा तस्स पिया कमलसुंदरी देवी ।
रइसुंदरी य दुहिया रइ व्व रूवेण सुपसिद्धा ॥
अह बुद्धि–रिद्धि–सुयसंपयाहिं निच्चोवलद्धमाहप्पा ।
मंति–महिब्भ–पुरोहा संति पसिद्धा तइं नयरे ॥

End:—

एवं कलावई वि य समणी तक्कालजोगमणुचरइ ।
सामं[ण्णंमि अणण्ण]मणा पसमाइसयं परिवहंतीति ॥

Colophon:—

सुविहितशिरोमणिश्रीमुनिचंद्रसूरिप्रभ(भु)देवसूरि–तच्छिष्यचारित्रचूडामणिश्रीविजयचंद्रसूरिशिष्यमाणिक्यचंद्रसूरिसाधु......जोग्या पुस्तिका श्रीविमलचंद्रोपाध्यायानां विमलसूरिपादान्

११८. स्तोत्रसङ्ग्रह (अपभ्रंश अस्तव्यस्त श्लिष्ट त्रुटित).
प. प्राय: २००; ५$\frac{1}{2}$"×१$\frac{1}{2}$"

११९. (१) शीलवतीकथा(प्रा. भोगोपभोगे). Paper MS. प. १–४६

Beginning:—

अत्थि इह जंबुदीवे भारहखित्तस्स मज्झखंडंमि ।
नामेण वसंतपुरं सुपसिद्धं पुरवरं पवरं ॥ १ ॥

* ५१, ७०, ७५–७८ इत्येतानि पत्राण्यत्र नावलोक्यन्ते ।

(२) **दामनककथा** (जीवदयायाम्). प. ४७–९९ (त्रुटित)

(३) **तन्त्रटीकानिबन्ध** (अजिता) by **परितोषमिश्र**. प. २४२

Three Adhyāyas complete; damaged.

End:—

अजिताख्ये तंत्रटीकानिबंधे कृतावजितायां प्रथमस्य द्वितीयः पादः ।
महोपाध्यायश्री**परितोषमिश्र**विरचिते **तंत्रटीकानिबंधनेऽजिताख्यायां** द्वितीयस्य प्रथमः पादः ।

अ. ३, पा. ६—

सर्वार्थमप्रकरणात् । यत्प्रसंगेनायं विरच्यते.......विचारं दर्शयति । इदानीं अनारभ्याधीतानामिति ।

This seems to be a Commentary on तन्त्रवार्त्तिक.

(४) **चतुर्विंशतिजिनस्तुतिवृत्ति [मू. बप्पभट्टि].** प. ३५

Beginning:—

[नम्रेन्द्रमौलिगलितोत्तम]पारिजातमालार्चितक्रम! भवंतमपारिजात! ।
नाभेय! नौमि भुवनत्रिकपापवर्गदायिन्! जिनास्तमदनादिकपापवर्ग !॥ १ ॥

Colophon:—

२४ चतुर्विंशतिकावृत्तिः समाप्ता ।

श्वेतांबरमहागच्छमहावीरप्रणीतदेवानंदितगच्छद्योतकरवाचनाचार्यपंडित**गुणाकरगणिना** चतुर्विंशतिजिनानां स्तुतिवृत्तिर्लिखापिता ॥ छ ॥ छ ॥

श्रीवैद्यनाथेन जिनेश्वरैश्च तपोधनैर्दर्भवादी(?)पदिशत (?)
स्वयं पंडितराणकेन हेमंतकाले लिखिता समग्र्या(ग्रा) ॥ १ ॥ छ ॥
विक्रमसंवत् १२११ पोषवदि ८ बुधे ॥ १ ॥ शिवमस्तु । मंगलमस्तु ॥

(५) **स्तुतिचतुर्विंशतिकावृत्ति [मू. शोभन].**

End:—

चतुर्विंशतिका समाप्ता ।

जैनसिद्धांततत्त्वशतपत्रमकरंदास्वादमधुपेन देवानंदितगच्छस्वच्छहृदयमुनिमुखमंडनेन श्वेतांबरप्रतिव्राततारारश्वेतरुचिना वाचनाचार्यपंडितगुणाकरेण इयं संसारार्णवनिमज्जमानजनपारनयनमंगिनी साहित्यविचारवैदग्धहृदयोल्लासपंकजप्रबोधचंद्रिका चतुर्विंशतिजिनानां स्तुतिवृत्तिर्लिखापितेति ॥ छ ॥

श्रीवैद्यनाथामकृतांतकस्य स्नानेन कस्मी(श्मी)रजकर्दमेन ।
स्वर्गाग्रते दर्भवती सदा या तस्यां लिलेख स्तिरा[ण]केन ॥
शुभं भवतु । मंगलमस्तु । लेखक–पाठकयोश्च ॥ छ ॥

(६) **शत्रुञ्जयमाहात्म्य** by **धनेश्वरसूरि.** त्रुटित

(७) **भक्तामर.**

३२०. प्रकीर्णत्रुटितपत्र.

३२१. योगशास्त्र(सविवरण). त्रुटित प. ३६५

Colophon:—

संवत् १२७४ वर्षे मार्ग. वदि ८ गुरावद्येह श्रीप्रह्लादनपुरे मंगलं महाश्रीः । शुभं भवतु लेखक-पाठकयोः । शिवमस्तु ।

३२२. प्रकीर्णत्रुटितपत्र(आवश्यकनिर्युक्ति, तत्त्वार्थ, प्रशमरति, अलंकार, अवचूरि).

३२३. प्रकीर्णत्रुटितपत्र (प्रा. सं. विक्रमकथा, सामाचारी इत्यादि).

३२४. सूक्तसङ्ग्रह (?) प. ७६; १३"×२"

Beginning:—

जयति सरोरुहवसतिर्निगमगिरां प्रथमनिर्गमो द्रुहिणः ।
प्रभवो न तस्य दुस्तरभवजलधिर्विलंघनारहितः ॥ १ ॥
वरछ सवनः (वरदो भवतु) स शार्ङ्गी रक्षा भुजगेंद्रभीषणा यस्य ।
भांति भुजाश्चत्वारः पातारो भुवनकोशस्य ॥ २ ॥
तं नमत नीललोहितमिंधनतां याति यस्य युगनिधने ।
प्रकटितललाटलोचनचपलार्चिषि शिखिनि भुवनानि ॥ ३ ॥
स जयति सहस्ररश्मिर्विगलितकलधौतशैलरसधौताः ।
भांति सततसमुदये यस्य दिशो लोहितच्छायाः ॥ ४ ॥
त्वां पालयतु भवान्याः कुपिताशनिपातभीषणारंभः ।
महिषासुर-नीलगिरेः शृंगांतरगोव...च ॥ ५ ॥
सुरगिरिपरिणतशीलो भवतामशुभानि हरतु हेरंबः ।
यस्य दशनोपशोभा रक्तोज्वलकनकशकलानि ॥ ६ ॥* * *
अनवहितः किमशक्तो विबुधैरभ्यर्थितः किमप्यरसिकः ।
सर्वंकषोपि कालस्तिरयति सूक्तानि न कवीनां ॥ १० ॥

३२५. सुपार्श्वनाथचरित्र (प्रा.) by **लक्ष्मणगणि.** प. ३४१; ३१"×२"

३२६. (१) नन्दीसूत्र. प. १-२३; ३१"×२¼"

(२) **नन्दीसूत्रटीका** by **मलयगिरि.** प. १-२४९

३२७. कल्पभाष्य (अपूर्ण). प. १३९-२२२; ३०½"×२⅓"

Pras'asti of the donor:—

श्रीसर्वज्ञाय नमः ।

पुरंदरपुरस्फाति भाति श्रीपत्तनं पुरं ।
धर्म-न्यायमये यत्र नित्यं लोकः सुखायते ॥ १ ॥
विभाति गांभीर्यगुणेन नानाराजप्रवृद्धिर्जडभावमुक्तः ।
राजन्ननेकैः पुरुषोत्तमैः श्रीश्रीमालवंशांबुनिधिर्नवीनः ॥ २ ॥
तस्मिन् समग्रव्यवहारिरत्नमप्रत्नधामानुपमानकीर्तिः ।
निर्दूषणः सद्गुणधाम धर्ममयैककर्माऽजनि कर्मसिंहः ॥ ३ ॥
श्रियाऽस्य गोईत्यभिधा सुधासदृग्वचःप्रपंचा समजायताद्भुता ।
विशुद्धशीलादिगुणैरनुत्तरैर्या सीतया स्वं तुलयांबभूवुषी ॥ ४ ॥
तदंगभूर्भूरिसमृद्धिधाम महेभ्यसीमाऽजनि मालदेवः ।
बुधा अबुध्यंत भवांबुधौ यं धनेश्वरस्य प्रतिबिंबमेव ॥ ५ ॥
श्रीगूर्जरेश्वरनियोगिनि रत्नपाले तद् ग्राहयत्यपि बलेन जनं समग्रं ।
नैकादशीव्रतमधा(त्यजद्) बहुधा प्रकारैस्तद्भापितोपि दृढदर्शनधीस्सुधीर्यः ॥६॥
अहो ! अनेकैः सुकृतोत्सवैर्जनं सदैकधर्मात्मकतां नयन्नपि ।
अनंतधर्मात्मकवस्तुदेशिनो जिनेशितुः शासनमत्यजन्न यः ॥ ७ ॥
जगदंतगतो विमुक्तवत् ध्रुवमानंत्यजुषोऽपि यद्गुणाः ।
ग्रहचक्रमिवास्थिरा अपि क्रममाणाश्च जगत्सु कौतुकं ॥ ८ ॥
श्रीदेवसुंदरयुगोत्तमसेवयाप्तश्रीमज्जिनागमविचारमहारहस्यः ।
नंदीश्वरस्तवन-मुग्धतरान्नवातीचारांश्च यो निरुपमानमतिश्चकार ॥ ९ ॥
षड्विधान्यहरहः कुरुते स्मावश्यकानि कलिकालविजेता ।
यो यथोचितमथो धनदानैर्दीनलोकमुददीधरदेव ॥ १० ॥
श्रीतीर्थयात्रा-जिनबिंब-साधुपूजा-प्रतिष्ठादिविधानधीरः ।
सदापि साधर्मिकवत्सलत्व-दानादिधर्मैरजयत् कलिं यः ॥ ११ ॥
अथ च । संघभारधरणैकधुरीणा धर्मकर्मसु सदापि न रीणाः ।
नित्यदेव-गुरुभक्तिकचित्ताः क्षेत्रसप्तकनियोजितवित्ताः ॥ १२ ॥
भूतलप्रथितकीर्तिसमूहाः पूरितार्थिजनसर्वसमीहाः ।
भूरिभूतिपरिभूतधनेशास्तेजसाऽवजितबालदिनेशाः ॥ १३ ॥
मर्त्यलोकहितहेतुकमिंद्रप्रेषिता इव दिवः सुरवृक्षाः ।
पंच तस्य तनया विनयाढ्या भूरिभाग्यविभवा विजयंते ॥ १४ ॥

आसीज्जनाह्लादकमूर्तिराद्यः केल्हाभिधस्तेषु धियां निधानं ।
प्रभावकालंकरणस्य यस्य दशाप्यशोभंत दिशो यशोभिः ॥ १५ ॥
आस्ते जगत्ख्यातयशा द्वितीयो हीराभिधानो व्यवहारिहीरः ।
रमांबुधेर्यस्य गुणास्तरंगा इवास्तसंख्या जगतीं स्पृशंति ॥ १६ ॥
निखिलव्यवहारिवर्गमौलिर्वीराकः सुकृती सुतस्तृतीयः ।
कलयत्यधुना प्रपन्नशीलः श्रेष्ठींदोरुपमां सुदर्शनस्य ॥ १७ ॥
भक्तः श्रीगुरुपदयोः सदापि धर्माधारः श्रीजिनपतिशासनप्रभाकृत् ।
त्रैलोक्यप्रथितयशा विशां प्रधानं पाताकः समजनि तत्सुतश्चतुर्थः ॥ १८ ॥
सन्नंदकः स्फुटविराजिसुदर्शनश्रीः । लक्ष्मीविलासवसतिः पुरुषोत्तमोऽत्र ।
तस्यांगभूर्जयति पंचमकः क्षमायां गोविंद इत्यभिधया विदितो गुणैश्च ॥१९॥
यौवनेऽपि दधता किल शीलं येन धीरपुरुषाचरितेन ।
स्मारितः स्मररिपुः परिभूय स्थूलभद्रमुनिवृत्तमिदानीं ॥ २० ॥
केल्हाभिधानस्य जनी विनीता ख्याताऽस्ति हर्पूरिति यद्हृदुर्व्यां ।
धर्मद्रुमः श्रीगुरु–देवभक्तिरसैः प्रसिद्धः फलतीप्सितौघैः ॥ २१ ॥
चतुरंबुधिचारिकीर्तयश्चतुराशाजनतामनोमताः ।
तनुजा मनुजालिमंडनं चतुराः संति चतुर्मितास्तयोः ॥ २२ ॥
व्यवहारिवर्गमंडनमखंडदानादिधर्मविधिनिरताः ।
डाहा भोला मंडन माणिक्येति क्रमाद् विदिताः ॥ २३ ॥
जगदद्भुतसौंदर्ये भार्ये हीराभिधस्य जयतो द्वे ।
आद्या शाणीनाम्नी हीरादेवी द्वितीया च ॥ २४ ॥
.... ते क्रमेण तनयावसुवातां ।
आदिमा विजयकर्णसकर्णं भूरिभूतिमपरा च गजाह्वं ॥ २५ ॥
मायादिदोषरहिता दयिता विभाति वीराभिधस्य फदकूरनुकूलचित्ता ।
या यौवनेपि विमलं प्रतिपद्य शीलं योषासुधैर्यविरहापयशः प्रमार्ष्टि ॥ २६ ॥
सुतौ तयोर्भाग्यभृतौ विनीतौ प्रभूतभूती गुणभूरभूतां ।
आद्यः कृती नंदति देवदत्त ....॥ २७ ॥
.........धानव्यवहारिमौलेरुभे अभूतां दयिते विनीते ।
तत्रादिमा सच्चरितैः पवित्रा पत्रापदेवी रतितुल्यरूपा ॥ २८ ॥
अपरा पदमलदेवी नित्यं श्रीवीतरागभक्तिपरा ।
तनुजौ मनुजौघवराविमे क्रमेणासुवातां द्वौ ॥ २९ ॥

श्रीजिनेंद्रपदपंकजभक्तः सर्वदा सुकृतकर्मसु रक्तः ।
आदिमो.............................. ॥ ३० ॥

.....................परस्सकलपौरविभूषणमंगजः ।
जयति देव-गुरूत्तमभक्तिभृन्नरमणी रमणीयगुणालयः ॥ ३१ ॥

गोविंदनाम्नो दयितास्ति गंगादेवी सदा श्रीगुरु-देवभक्ता ।
न जातु धर्मामृतशीतलं यन्मनः कलिस्तापयितुं समर्थः ॥ ३२ ॥

तयोर्जयंत्यब्धिमिताः सुताः श्रीपदं महाभाग्यभृता विनीताः ।
भृताश्चतस्रोपि दिशो यशोभिर्येषामशेषा हिमरुग्महोभिः ॥ ३३ ॥

आद्यो हरिश्चंद्र इति प्रतीतः सूनुर्द्वितीयः किल देवचंद्रः ।
ततस्तृतीयो जिनदासनामा......................॥ ३४ ॥

अथ च । श्रीजैनशासनसमुद्धरणैकधीराः श्रीदेवसुंदरयुगप्रवरा विरेजुः ।
तेषां पदे जनमुदे विहितावताराः श्रीसोमसुंदरगुरुप्रवरा जयंति ॥ ३५ ॥

निःशेषलब्धिभवनं भुवनातिशायि माहात्म्यधामभरतोत्तमसंयमाढ्याः ।
किं चात्र सर्वगुणसुंदरशिल्पसीमभूता जयंत्यधिजिनेश्वरशासने ये ॥ ३६ ॥

चत्वारः श्रीमदाचार्यास्तेषां शिष्या जयंत्यमी ।
एकपादपि यैर्धर्मश्चतुष्पादभवत् कलौ ॥ ३७ ॥

शांतिस्तवेन जनमारिहृतः सहस्रनामावधानिविरुदा महिमैकधाम ।
तेष्वादिमा विविधशास्त्रविधानधातृतुल्या जयंति मुनिसुंदरसूरिराजाः ॥ ३८ ॥

षट्त्रिंशता सूरिगुणैरलंकृतास्तथा द्वितीया विजयं वितन्वते ।
जगच्चु(त्तु)ता कृष्णसरस्वतीति सद्यशःश्रियः श्रीजयचंद्रसूरयः ॥३९॥

व्यजयंत महाविद्याविडंबनप्रभृतिशास्त्रविवृतिकृतः ।
श्रीभुवनसुंदरगुरूत्तमास्तृतीया यशोनिधयः ॥ ४० ॥

तुर्या जयंति जगति विदिता निखिलांगपाठपारगताः ।
श्रीजिनसुंदरगुरवः प्रज्ञावज्ञातसुरगुरवः ॥ ४१ ॥

अ(इ)तश्च । गणाधिपश्रीगुरुसोमसुंदरप्रभूपदेशं विनिशम्य सुंदरं ।
श्रुतस्य भक्तेरधुना जिनाधिपप्रवर्तमानागमलेखनेच्छया ॥ ४२ ॥

गोविंद-नगराजाभ्यां नंदेभ-मनुवत्सरे ।
लेखितः पुस्तको जीयादाचंद्रार्कं प्रमोददः ॥ ४३ ॥

इति प्रशस्तिः ।

Colophon written on a blank folio:—

सं० १४८९ ज्येे० व० ४ दिने कृत: ॥ वर्य पृथुल मलबारीय ३३४ पत्राणां संचयः ॥ श्रीः । श्रीः । श्रीः । श्रीः ॥

३२८. (१) **चन्द्रप्रज्ञप्ति.** ग्रं. २०५४ प. १–५४; ३२″×२″

Colophon:—

संवत् १४७९ वर्षे ज्येष्ट वदि दशम्यां गुरौ चंद्रप्रज्ञप्तिटीका (?)।

(२) **चन्द्रप्रज्ञप्तिटीका** by **मलयगिरि.** प. २६५

Colophon:—

ग्रंथाग्रं ९५०० श्लोकमानेन यथा । संवत् १४८० वर्षे पौष शुदि १३ बुधे लिखितं ।

३२९. स्थानाङ्गटीका by **अभयदेवसूरि.** प. ४५२; ३१″×२$\frac{1}{4}$″

End:—

ग्रंथाग्रं श्लोक १७१४ ॥ छ ॥ छ ॥

अणहिल्लपाटकनगरे वसतावच्छुप्रधनपतेर्गणिना ।
जिनदेवाख्येनादौ लिखिता स्थानांगटीकेयं ॥
प्रत्यक्षरं निरूप्यास्य ग्रंथमानं विनिश्चितं ।
अनुष्टुभां सपादानि सहस्राणि चतुर्दश ॥

ग्रंथाग्रं श्लोकाः १४२५० ॥ छ ॥ छ ॥ छ ॥

Colophon:—

संवत् १३४६ वर्षे ॥ ज्येष्ठसुदि १५ गुरौ । अद्येह वीजापुरे महाराजाधिराज-श्रीसारंगदेवप्रतिबद्धमहंश्रीमूंजालदेवनियुक्तमहंश्रीसांगाप्रतिपत्तौ पुस्तकमिदं लिखितं ॥ छ ॥ छ ॥ यादृशमित्यादि । मंगलं महाश्रीः ॥ छ ॥

......वास्तव्य सो(मो)ढज्ञातीयव्य० जसराज......नाल्हा तत्सुतश्रे० ऊदा-श्रेयोर्थं ठाणांगवृत्तिपुस्तकं लिखापितं श्रे० छाडउ भ्रातृ देपाल जयतल वील्हण...

३३०. जिनधर्मप्रतिबोध (अपूर्ण) by **सोमप्रभाचार्य.** *प. ५१–३०५

३३१. स्याद्वादरत्नाकर (प्रथमखण्ड). प. ३११; ३३″×२″

End:—

एवं च स्वलक्षणगोचरांगीकारे चेत्यादि प्रत्यादिष्टं । किं चान्यदेवेंद्रियग्राह्य......

Colophon:—

* ५१, ५४, ५९, १६१, १६२ पत्राणि न सन्ति ।

स्वस्ति संवत् ॥ १४७६ वर्षे वैशाषशुदि ५ गुरौ लिखितं श्रीमदणहिल्लपत्तने । शुभं भूयात् शुभं भूयात् । देवगिरिवास्तव्यप्राग्वाटज्ञातीयसा० सलषणभार्याधनू-पुत्रीभाऊनाम्न्या तपागच्छनायकश्रीसोमसुंदरसूरीणामुपदेशेन स्याद्वादरत्नाकरप्र॰ थमखंडं लेखितं शिवमस्तु श्रीश्रमणसंघस्य ॥

३३२. (१) **कर्मग्रन्थपञ्चक** by **देवेन्द्रसूरि** } प. ३५१; ३४"×२"
(२) **सित्तरि(सप्तति)वृत्ति** by **मलयगिरि** }

Colophon:—

संवत् १४६२ वर्षे माघशुदि ६ भौमे अद्येह श्रीपत्तने लिखितं शुभमस्तु ।

Pras'asti of the donor:—

ऊकेशवंशसंभूतः प्रभूतसुकृतादरः । वासी सांडउसीग्रामे सुश्रेष्ठी महुणाभिधः ॥१॥
मोघीकृताघसंघाता मेघीरप्रतिघोदया। नानापुण्यक्रियानिष्ठा जाता तस्य सधर्मिणी ॥२
तयोः पुत्री पवित्राशा प्रशस्या गुणसंपदा । हादूर्दूरीकृता दोषैर्धर्मकर्मैककर्मठा ॥३॥
शुद्धसम्यक्त्वमाणिक्यालंकृतः सुकृतोद्यतः ।
एतस्या भागिनेयोभूदोकाकः श्रावकोत्तमः ॥ ४ ॥
श्रीजैनशासननभोंगणभास्कराणां श्रीमत्तपागणपयोधिसुभास्कराणां ।
विश्वाद्भुतातिशयराशियुगोत्तमानां श्रीदेवसुंदरगुरुप्रथिताभिधानां ॥ ५ ॥
पुण्योपदेशमथ पेशलसंनिवेशं तत्त्वप्रकाशविशदं विनिशम्य सम्यक् ।
एतं सुपुस्तकमलेखयदुत्तमाशा सा श्राविका विपुलबोधसमृद्धिहेतोः ॥ ६ ॥
बाणांग–वेदेंदुमिते १४६५ प्रवृत्ते संवत्सरे विक्रमभूपतीये ।
श्रीपत्तनाह्वानपुरे वरेण्ये श्रीज्ञानकोशे निहितं तयेदं ॥ ७ ॥
यावद् व्योमारविंदे कनकगिरिमहाकर्णिकाकीर्णमध्ये
विस्तीर्णोदीर्णकाष्ठातुलदलकलिते सर्वदा जृंभमाणे ।
पक्षद्वंद्वावदातौ वरतरगतितः खेलतो राजहंसौ
तावज्जीयादजस्रं कृतियतिभिरिदं पुस्तकं वाच्यमानं ॥ ८ ॥
श्रीः । शुभं भवतु ।

On the board:—

श्रीकर्मग्रंथषट्वृत्तिः सिद्धपुरीयश्रा० हादूसत्का ।

३३३. (१) **उत्तराध्ययननिर्युक्ति.** गा. ६०७ प. १–१७; ३३½"×२"
(२) **उत्तराध्ययनवृत्ति** by **शान्तिसूरि.** प. १–४६२

Colophon:—

ग्रंथाग्रं १८००० शुभं भवतु । सर्वकल्याणमस्तु । यादृशं etc भग्न etc तैलाद् etc

स्वस्ति संवत् १४८९ वर्षे श्रावणमासे शुक्लपक्षे द्वितीयायां तिथौ रविदिने अद्येह श्रीडूंगरपुरनगरे राउलश्रीगइपालदेवराज्ये लिखितं श्रीपार्श्वजिनालये पचाकेन ।

३३४. निशीथचूर्णि (द्वितीयखंड उ. ११–२०). प. ३१८; २७″×२″

Colophon:—

निसीहचुण्णी समत्ता । मंगलं महाश्रीः ।

सं. ११५७ आखाढवदि पष्ठयां शुक्रदिने श्रीजयसिंहदेवविजयराज्ये श्रीभृगुकच्छनिवासिना जिनचरणाराधनतत्परेण देवप्रसादेन निशीथचूर्णिपुस्तकं लिखितमिति ॥

३३५. प्रज्ञापनाटीका by **मलयगिरि** (त्रुटित, खण्डित).

३३६. दशवैकालिकवृत्ति by **हरिभद्र.** प. २८६; २७″×२″

Colophon:—

ग्रंथाग्रं भाष्यसहित ७५५० शुभं भवतु । सर्वकल्याणमस्तु ।

संवत् १४८९ वर्षे ज्येष्टमासे शुक्लपक्षे द्वितीयायां तिथौ गुरुदिने लिखितं डुंगरपुरे पचाकेन ॥

३३७. उपदेशमालाविवरण. प. २९६; २६″×२″

End:—

उपदेशमालाविवरणं समाप्तं । कृतिरियं जिन–जैमिनि–कणभुक्–सौगतादिदर्शनवेदिनः सकलग्रंथार्थविन्निपुणस्य श्रीसिद्धर्षेर्महावर्धमानाचार्यस्येति ।

सिद्धर्षिकृता वृत्तिः कथानकैर्योजिता स्वबोधार्थं ।
प्राक्तनमुनींद्ररचितैश्चारुभिरुपदेशमालाभिः(याः) ॥
विधिना सूत्रोक्तं यथाप्रोक्तं न सम्यगिह लिखितं ।
जैनेंद्रमताभिज्ञैस्तच्छोध्यं मर्षणीयं च ॥
एकैकाक्षरगणनया ग्रंथमानं विनिश्चितं । ९५००

३३८. शान्तिनाथचरित्र by **माणिक्यचन्द्र.** प. ३१६; २४″×१½″

Beginning:—

तेपि ब्रह्मादयो यस्यानुग्रहा[त्] ज्ञानविग्रहाः ।
तस्मै कस्मैचन मः(मे) परमब्रह्मणे नमः ॥
परमेष्ठी जिनः शंभुः स्वामी भास्वानु(न्) कलानिधिः ।
शुचिर्विश्वत्रयीशास्ता परमात्मा पुनातु वः ॥
श्रेयः प्रथयतु श्रेयः पुरुपोत्तमनाभिभूः ।
परमेष्ठी त्रिलोकीष्टसृष्टिकर्मणि कर्मठः ॥ ३ ॥

कांचनद्युतिमान् तत्त्वसुमनोमार्गमंडनः ।
द्वादशात्मावतारश्रीः श्री**शांति**ः पातु वो जिनः ॥ ४ ॥ * *
योभूत् क्षमाभृतां प्रष्ठः पुष्पः(? ष्णः) पूर्वगिरिश्रियं ।
स शश्वदुदयं देयाद् **गौ**तमो[पि] तमोपहः ॥ ९ ॥
यः पदत्रितयेनापि व्यानशे वाङ्मयं महत् ।
पश्य व्यापि त्रिपद्यापि विष्णुना विष्टपत्रयी ॥ १० ॥
रसोर्मिरम्यं बहुसत्कथं यः **सपादलक्षं वसुदेववृत्तं ।**
चकार संसारविकारभेदि स **भद्रबाहु**र्भवतु श्रिये वः ॥ ११ ॥
सारस्वताह्वयकलामयमंत्रमित्रं यन्नामवर्णवलयं कलयंति संतः ।
तस्मै नमः प्रवचनप्रवराय वेदविद्यावराय **ह**रिभद्रमुनीश्वराय ॥ १२ ॥
याः पेठिरे गृहस्थत्वे पूर्वं विद्याश्चतुर्दश ।
प्रत्येकं श[त]संख्याता येन **प्रकरणैः** कृताः ॥ १३ ॥
किं न सामानसश्रीकास्ते **दाक्षि**ण्यांध(क)सूरयः ।
कुवलयमाला येभ्यः कथाभूदद्भुतस्थितिः ॥ १४ ॥
श्रियेस्तु **सिद्ध**व्याख्याता विख्यातासिद्धसाध[कः] ।
बहिःस्थामपि देहांतर्दर्शयंती भवस्थितिं ॥ १५ ॥
निर्दूषणपदन्यासध्वनिन्या(व्या)सविराजिनः ।
काव्याध्वनि कविहंसाः संत्वन्येप्यमृतश्रिये ॥ १६ ॥
स **राम**ः कविरुद्दामः **प्र**बंधाब्धिं प्रबध्य यः ।
प्रियां चमत्कृतिं प्रत्याहरति प्रीणि(णा ? णय)ति क्षमां ॥ १७ ॥
कलाकलापसदनं विश्वेश्वरशिरोमणिः ।
मुनींद्रश्री**ने**मिचंद्रस्तमस्तमायत (?) क्षितेः ॥ १८ ॥
यस्य प्रशस्यवचनामृतसंगमेपि
दुर्वादिनामिह यदुच्छलति स्म तापः ।
यत् कालिमाजनि यदश्वि(स्वि)ददंगयष्टि–
रोष्ठद्वयी यदशुषच्च तदद्भुतं नः ॥ १९ ॥
श्री**राज**गच्छमंडनवादिखंडननामना ।
ज्योति[रा]त्मजये यस्य **कुमारनृपति**र्ददौ ॥ २० ॥
श्री**जगद्देव**संज्ञेन प्रतीहारेण यः
प्रत्यलप्रतिवादी obliterated. See also Sangh's Bhandar.

End:—

इत्याचार्यश्री**माणिक्यचंद्र**विरचिते **शांतिनाथचरिते** महाकाव्ये तपो-भा-वनाकथा-श्री**शां**तिनाथ-चक्रायुध-गणभृन्निर्वाणवर्णनो नाम अष्टमः सर्गः समाप्तः ।

पापक्षयपुरस्कृत्या वर्धिष्णुमहिमोदये ।
अतिसोमकले **रा**जगच्छे स्वच्छे दिवानिशं ॥
तृष्णाभिदः सुमनसां मिथ्यात्वविषविच्छिदः ।
सुधामय(या) इवाभूवन् श्री**भ**रतेश्वरसूरयः ॥
तत्पट्टपूर्णकल्पाः श्री**वे**रस्वामिसूरयो गुरवः ।
विकिरंतु दुरितनिकरं वितरंतु समीहितां सिद्धिं ॥
येषां हस्तप्रभावादि(ति)शयमभिदधुर्ग[र्दैव]हर्म्याणि नृत्यत्-
पण्यस्त्रीपाणिचंचन्मणिवलयझणत्कारवाचालितानि ।
सूरीणां वक्त्रपद्मान्युदधिकलकलस्पर्द्धिगद्योद्धुराणि
श्र[ा]द्धानां धामधात्री तुरगखरखुरोद्भूतत्रात्कारसारा ॥
ये निःसंगविहार[चारु]चरिता ये शुद्धसद्देशना-
मुक्तास्वातिघना मनोभवतरोर्ये भंजने कुंजराः ।
ये विद्याललनाविलासमुकुराः किं वा बहु ब्रूमहे ?
सर्वेषामपि संप्रति व्रतभृतां दृष्टांततां ये ययुः ॥
श्रीवर्धमान............one folio torn and obliterated.
सुधीभिः शोधनीयं यत् प्रांजलिः प्रार्थयेस्मि तान् ।
दीपोत्सवे शशिदिने श्रीम**न्माणिक्य**सूरिभिः ।
कर्णावत्यां महापुर्यां श्रीग्रंथोयं विनिर्मितः ॥ १८ ॥
नितांतसंशयध्वांतरक्षा[दक्षा] गिरां पतिः ।
श्री**शांतिनाथचरित्रे** देवी साहाय्यकं व्यधात् ॥ १९ ॥

श्री**माणिक्यचंद्रसूरीणां** कृतिः । संपूर्णमिदं श्री**शां**तिनाथचरितमिति ॥ छ ॥

चतुःसप्ततिसंयुक्तैः पंचपंचाशता शतैः ।
प्रत्यक्षरं गणनया ग्रंथमानं [विनिश्चितम्] ॥

Colophon:—

संवत् १४७० वर्षे मार्गसिरवदि १२ बुधे श्री**शां**तिनाथचरित्र(त्रं) लषि-(लिखि)तं संपूर्णं श्री**त**पागच्छे लघुपौ[पध]शालायां पुस्तकं लषि(लिखि)तं । **सहजसमुद्र**गणिना लिखापितमस्ति । शुभमस्तु । Full of mistakes.

३३९. महावीरचरित्र (त्रि. श. पर्व १०) by **हेमाचार्य.** प. २२०

Colophon:—

संवत् १२९४ वर्षे चैत्रवदि ६ सोमे लिखितमिदं श्रीमहावीरचरितपुस्तकं लेख० महिलणेनेति भद्रं। मंगलं महाश्रीः।

परमगरिमसारः प्रोल्लसत्पत्रपात्रं स्फुरितधनसुपर्वा श्रेष्ठमूलप्रतिष्ठः।
लसितविशदवर्णो वर्यशाखाभिरामः समभवदिह दीशापा(वा)लवंशः प्रसिद्धः॥

आम्रदत्तोभवत् तत्र मुक्तामणिरिवामलः।
तच्चित्रमेव यद्सावच्छिद्रः .... ॥
श्रीदेवीनामतः ख्याता शील–सत्यादिसद्गुणैः।
प्रेमपात्रं प्रिया जज्ञे तस्येंदोरिव रोहिणी॥

The remaining portion lost in folio 221 which is missing from the Ms. Illustrated. Contains pictures of Hemā-chārya and Kumārpāla.

३४०. उपदेशमालावृत्ति by **रत्नप्रभ.** Illustrated.

प. ३४६; ३०″×२½″

Beginning:—

ए ६० ॐ नमः श्रीदेवसूरिगुरुपादुकाभ्यः।
यस्यारघट्टस्य घनोपदेशमालार्पितध्यानघटाघटीभिः।
संसारकूपाद् भवभृज्जलानामूर्ध्वं गतिः स्यात् स जिनोवताद् वः॥
रागादिक्षपणपटुः सकेवलश्रीर्जंभारिव्रजमहितो यथार्थवाक्यः।
नाभेयः स भवतु भूतये सदानतार्थस्याधिपतिरयं च वर्द्धमानः॥
पायं पायं प्रवचनसुधां प्रीयते या प्रकामं
स्वैरं स्वैरं चरति कृतिनां कीर्तिवल्लीवनेषु।
दोग्ध्री कामान् नवनवरसैः सा भृशं प्रीणयंती
मादृग्वत्सान् जयति जगति श्रीगवी देवसूरेः॥
विशुद्धसिद्धांतधुरां दधानां संसारनिःसारकृतावधानां।
श्राद्धः सुधासिंधुमिमां विशालां प्राप्नोति पुण्यैरुपदेशमालां॥
सत्यामपि सद्वृत्तौ वृत्तिममुष्याः करोम्यहृदयेपि।
त्वरयति यस्मान्मामिह सविशेषकथार्थिनां यत्नः॥

End:—

इति श्रीरत्नप्रभसूरिविरचितायामुपदेशमालाया विशेषवृत्तौ चतुर्थो विश्रामः॥

नानारूपनरोत्तमैकवसतिर्नीरागतासंगतः
पातालं परितः स्फुरन्निह बृहद्गच्छोस्ति रत्नाकरः।

स श्रीमन्मुनिचंद्रसूरिसुगुरुस्तत्राभवद् भूरिभिः
शाखाभिर्भुवि यः प्रयागवटवद् विस्तारमुद्रामगात् ॥
साहित्य–तर्कागम–लक्षणेषु यद्ग्रंथवीथी कविकामधेनुः ।
कस्योपकारं न चकार सम्यक् निःशेषदेशेषु च यद्विहारः ॥
शिष्यः श्रीमुनिचंद्रसूरिगुरुभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिप्रभुः ।
आस्थाने जयसिंहदेवनृपतेर्येनास्तदिग्वाससा
स्त्रीनिर्वाणसमर्थनेन विजयस्तंभः समुत्तंभितः ॥
तत्पट्टप्रभवोभवन्नथ गुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरयः शुचिधियस्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि संमदकृते वृत्तिर्विशेषार्थिनां ॥
श्रीदेवसूरिशिष्यभ्रातॄणां विजयसेनसूरीणां ।
आदेशस्यानृणभावमगममेतावताहमिह ॥
यदियमुपदेशमाला श्रावकलोकस्य मूलसिद्धांतः ।
प्रायेण पठति चायं तदिहास्माभिः कृतो यत्नः ॥
व्याख्यातृचूडामणिसिद्धनाम्नः प्रायेण गाथार्थ इहाभ्यधायि ।
क्वचित् क्वचिद् या तु विशेषरेखा सद्भिः स्वयं सा परिभावनीया ॥
यदिह किंचिदनागमिकं क्वचिद् विरचितं मतिमन्दतया [मया] ।
तदखिलं सुधियः ! क्षमयामि वः कृतकृपाः परिशोधयतादरात् ॥
स्वस्य परस्य च सूक्तैर्वृत्तिर्विस्तारिता चकास्तीयं ।
मणिखंडमंडलैरिव सुवर्णपूजा जिनेंद्राणां ॥
प्रकृता समर्थिता च श्रीवीरजिनाग्रतो भृगुपुरेसौ ।
अश्वावबोधतीर्थे श्रीसुव्रतपर्युपास्तिवशात् ॥
संशोधिता च सन्निहितकतिपयैः सहृदयैरियं प्रायः ।
पुनरपि कंटकशुद्धिः कार्या वः प्रार्थये सर्वान् ॥
भास्वद्भास्वरकांतिकांततिलकं प्रक्षिप्तवज्राक्षतं
निर्यन्नीलशिलातलांशुपटलैर्दुर्वारदूर्वांकुरं ।
यावन्मेरुमहीभृतं प्रति करोत्यारात्रिकोत्तारणं
ताराभिर्द्युविलासिनी विजयतां तावत् तवै(थै)षा कृतिः ॥

विक्रमाद् **वसु–लोकार्क**वर्षे माघे समर्थिता ।
एकादश सहस्राणि मानं सार्द्धशतं तथा ॥
अंकतोपि ग्रंथाग्रं ११९५० तथा सूत्रसमं ग्रंथाग्रं ११७६४ ॥

Colophon:—

संवत् १२९३ वर्षे पोषसु(ब)दि ५ गुरावद्येह **चंद्रावत्यां** लिखितं पं० **मलय-चंद्रेण** ॥ ७ ॥ शुभं भवतु ॥

३४१. सुदर्शनाचरित्र (प्रा. त्रुटित) by **देवेन्द्रसूरि.** प. २०४; २६"×१½"

One additional page contains Pras'asti.

Beginning:—

नमः श्री**सुव्रत**जिनेंद्राय ।

वंदित्तु **सु**व्वयजिणं **सु**दरिसणाए पुरंमि **भरुयच्छे** ।
जह **स**वलियाविहारो कराविओ किं पि तह.... ॥

End:—

चित्तावालयगच्छिक्कमंडणं जयइ **भु**वणचंदगुरू ।
तस्स विणेओ जाओ गुणभवणं **दे**वभद्दमुणी ॥
तप्पयभत्ता **जगचंदसूरिणो** तेसिं दुन्नि वरसीसा ।
सिरि**दे**विंदमुणींदो तह्य **वि**जयचंदसूरिवरो ॥ ४०५० ॥
इय **सुदरिसणाइ कहा** नाण–तवचरणकारणं परमं ।
मूलकहाउ फुडत्थाभिहिया **देविंदसूरी**हिं ॥ ४०५१ ॥
परमत्था बहुरयणा दोगच्चहरा सुवन्नलंकारा ।
सुनिहि व्व कहा एसा नंदउ विबुहस्सिया सुइरं ॥ ४०५२ ॥

Colophon:—

अक्षर–मात्रा–पद–स्वरहीनं व्यंजन–संधि–विवर्जितरेफं ।
साधुभिरेव मम क्षमितव्यं को न वि[मु]ह्यति शास्त्र-समुद्रे ? ॥

संवत् १४५१ वर्षे श्रावणशुदि ५ गुरौ अद्येह श्री**स्तं**भतीर्थे श्री**सु**दरिसणाचरित्रं लिखापितमस्ति ॥

प्राग्वाटान्वयभूः प्रशस्तविभवोभूद् **वज्र**सिंहाभिधः
श्राद्धः श्री**जि**ननाथपूजनपरः पुण्यक्रियातत्परः ।
भार्या तस्य **कडूदे**यैकरसिका सद्धर्मबद्धादरा
गंगावारिविशुद्धशीलसुभगा संवेगचंगाशया ॥ १ ॥

चत्वारस्तनयास्तयोः समभवन्नेते युताः सद्गुणैः
धांगाख्यः प्रथमः पृथूज्ज्वलयशा **बांबाभि**धानोपरः ।
पुण्योपार्जनलालसो **लषमसीत्याख्याप्रतीतस्तत-**
स्तुर्यो रावणनामधेयविदितः सुश्राद्धवर्गाग्रणीः ॥ २ ॥
ग्रामे **फी**लणिनामके निवसतामेषां सवित्री **कडू-**
रेषालीलिखदात्मनिर्मलचितवित्तेन बंहीयसा ।
विष्वग्व्यापिविशुद्धकीर्तिविततश्रीम**त्त**पागच्छपा-
चार्यश्रीगुरु**देवसुंदर**महापुण्योपदेशादिदं ॥
क्षोणी-बाण-पयोनिधि-क्षितिमिते संवत्सरे वैक्रमे
रम्ये श्री**अ**णहिल्लनामनगरे श्री**ज्ञानकोशे**नघे ।
अस्थाप्यत्र **सुदर्शना**भिधमहासत्या**श्चरित्रं** त[या]
नित्यं नंदतु वाच्यमानमनिशं मेधाविभिः साधुभिः ॥
मंगलं भवतु श्रीसंघभट्टारकस्य ॥

३४२. उपदेशमालावृत्ति by **सिद्धर्षि.** प. १८७; २७ $\frac{3}{4}$"×२"

Pages torn. Seems to be written in the beginning of the 13th century of Vikram.

३४३. (१) दशवैकालिक. प. १–१६; ३३"×२ $\frac{1}{4}$"

(२) ,, **निर्युक्ति.** प. १७–२८

(३) ,, **टीका** by **हरिभद्र.** प. २९–१९०

Pras'asti same as No 367 अनुयोगद्वार

३४४. (१) महानिशीथ. प. १–१११

Colophon:—

संवत् १४५४ वर्षे आसाढ वदि १० शनौ **म**हानिशीथपुस्तकं लिखितं ।

(२) **दशाश्रुतस्कन्धनिर्युक्ति(?).** प. ११२–११५; ३३"×१ $\frac{3}{4}$"

Beginning:—

वंदामि **भद्दबाहुं** पाईणं चरिमसयलसुयनाणिं ।
सुत्तस्स कारगमिसिं **दसासु कप्पे** अ **ववहारे** ॥ १ ॥
आउविवागज्झयणाणि भावओ दव्वओ उवत्थदसा ।
दस आउविवागदसा वाससयाउं दसह भत्ता ॥ २ ॥

(३) दशाश्रुतस्कन्धचूर्णि. ग्रं. २२२५ **प. ११६–१६१**

(४) दशाश्रुतस्कन्ध. **प. १६१–२०४**

(५) **पञ्चकल्पभाष्य.** प. २०५–२५८

End:—

महत् पंचकल्पभाष्यं संघदासक्षमाश्रमणविरचितं समाप्तमिति । गाहग्गेणं पंचवीससयाइं चउहत्तराइं २५७४ । सिलोगमाणं एगतीससयाइं ३१३५ ।

(६) **पञ्चकल्पचूर्णि.** प. २५९–३१५

(७) **बृहत्कल्प.** प. ३१६–३२३

(८) **जीतकल्पसूत्र-वृत्ति** by **तिलकाचार्य.** प. ३२४–३६१

Colophon:—

एवं जीतकल्पवृत्ति-सूत्रं समाप्तं ॥ छ ॥

संवत् १४५६ वर्षे कार्तिक वदि १२ सोमवारे श्रीस्तंभतीर्थे पंचकल्पपुस्तकं लिखापितमस्ति ।

३४५. कर्मग्रन्थ (सटीक) by **देवेन्द्रसूरि.** *प. २–३०६; २२"×२¼"

३४६. पद्मप्रभचरित्र by **देवसूरि.** प. १८०; ३२"×१¼"

Beginning:—

मंगलमाइजिणेसरभुअदंडलुलंतकुंतला दिंतु ।
जिणमोहहरियसामलमिलंतभमरु व्व विलसंता ॥ १ ॥
निच्चं निच्चलचित्ता जं पत्ता सह निवासपउमेणं ।
लंछणछलेण पउमा पउमंकं नमह तं देवं ॥ २ ॥
सो जयउ संतिनाहो अप्पडिचक्केहिं दोहिं चक्केहिं ।
जस्स नवकुंडलेहि वि महिमहिला गव्विरी भुवणे ॥ ३ ॥
जयउ नवमेहसामलतणुणो नेमिस्स दित्तिपब्भारो ।
आजम्मदद्द(ड्ढ)वम्महधूमसमूहु व्व विलसंतो ॥ ४ ॥ * * * *
जेण विहिया उ दसदिसिकलिमलसंहरणसरसरिच्छाओ ।
दस वरनिज्जुत्तीओ तस्स नमो भद्दबाहुस्स ॥ १२ ॥
जणमणवणमंकुरियं झत्ति सुहासारणीइ वाणीए ।
जेसिं निच्चं तेसिं भद्दं सिरिहरिभद्दसूरीणं ॥ १३ ॥
जस्स गभीरिमजु(जि)त्तो न ज्ज वि जलही चएइ खारत्तं ।
तं विविहगंथकारयमहिवंदे हेमचंदपहुं ॥ १४ ॥
रयणायर व्व कइणो अन्ने वि जयंति जे ते रयणोहं ।
गिहिय सुवन्नायारा घडंति नवनवमलंकारं ॥ १५ ॥

---

* अपूर्णं २४४ तमं पत्रं नास्ति ।

End:—

सिरिवद्धमाणतित्थे जंबू-पभवाइमुणिगणिंदेसु ।
सुट्ठिय-सुप्पडिबद्धा गएसु सूरी समुप्पन्ना ॥ ३० ॥
तत्तो कोडियगच्छो गुच्छो विव विविहदीहसाहालो ।
आबालपयडमहिमा खमाइ सुपरिट्ठिओ जाओ ॥ ३१ ॥
गच्छंमि तंमि चउरो दीहरवित्थारफुरियसाहाओ ।
साहाउ अगाहाओ चउदिसिपसरंतमहिमाओ ॥ ३२ ॥
उच्चानागरि–विज्जाहरा य वइरा य मज्झिमल्ला य ।
एयासिए(प)साहाणं को जाणइ सव्वनामाणि ? ॥ ३३ ॥
विज्जाहरसाहाए गुच्छा गुच्छ व्व सुमणमणहरणा ।
जालिहर–कासहरया मुणिमहुअरपरि[गया] दुन्नि ॥ ३४ ॥
सिरिजालिहरो गच्छो विजयओ(उ) गयणं व जत्थ मुणिनाहो ।
अहमहमगाइ वहवे पियंति सिद्धंतसरिनाहं ॥ ३५ ॥
जाओ तारयराइरेहिरतले गच्छंमि वोमंगणे
धम्मज्झाणमणीनिहाणकलसो सो बालचंदो मुणी ।
अप्पं कम्ममलीमसं पडिदिणं सोहंतओ जो सया
उद्धट्टेहि उवासएहिं अमले तेवे तवं दुत्तवं ॥ ३६ ॥
सीसा तस्स जयंतु सक्कसरिसा मोहं महापव्वयं
तिक्खेणं चरणेण घोरपविणा चुन्नं कुणंता सया ।
लोयाणं गुणभद्दसूरिगुरुणो सारस्सयं सव्वया
जच्छंता अमयं सुहम्मनिरया चित्तं खमाए विया ॥ ३७ ॥
तेसिं पट्टपओनिहिम्मि कमलाबंधू मणी निम्मलो
सव्वाणंदगुरू असेसजुगई जंघालकित्तीभरो ।
जं काउं हियइक्कवद्धवसहिं संतो समंता सिरी-
पब्भारं पुरिसुत्तमत्तमहुणा के के न पत्ता मया ? ॥ ३८ ॥
वयणाउ जस्स निग्गयमणेयविबुहाण विहियमणहरिसं ।
अमयं व सायराओ चरियं सिरिपाससामिस्स ॥ ३९ ॥
सिरिधम्मघोसपहुणो अकलंकससंकसरिसमाहप्पा ।
सीसा तस्स अदोसा कोसा नाणे(णा)इरयणाणं ॥ ४० ॥
रेणुक्करेणुन्हाया जलिं(लं)जलिं जत्थ दिंति दुक्खाणं ।
तं ताण चरणकमलं अउव्वतित्थं सया सरिमो ॥ ४१ ॥

तप्पयपइट्ठिएहिं कईहिं स(सि)रि**देवसूरि**नामेहिं ।
पउमप्पहस्स पहुणो **चरियं** रइयं कयच्छरियं ॥ ४२ ॥
वेय-सर-सूर-पर((रि)मिय १२५४ वरिसे निवविक्कमस्स वरिसाओ ।
मग्गसिरसुद्धदसमी तिही य वारंमि तह रविणो ॥ ४३ ॥
रेवइनक्खत्तगए हिमकिरणोवरि भीम**भीम**स्स ।
चालुक्कवंसमणिणो नवरज्जे रज्जसमयंमि ॥ ४४ ॥
सिरिवद्धमाणनयरे ठिएण **पज्जुन्न**सिट्ठिवसहीए ।
सिरिपउमप्पहचरियं पडिपुन्नमिमं मए विहियं ॥ ४५ ॥
समणोवासग[वि]द्धय(?)**लक्खण**अज्झ(ब्भ)त्थणा इहं पढमं ।
जाया मज्झ पवित्ती **प**उमप्पहचरियनिम्माणे ॥ ४६ ॥
जं सिद्धंतविरुद्धं लक्खणहीणं च जंपियं इत्थ ।
तं खमउ मज्झ सव्वं सुयं च सुयधारिणो चेव ॥ ४७ ॥
जइ वि नवकव्वविसया सत्ती मह नेव समयजलनिहिणो ।
परमं पारीणत्तं छेव(य)त्तं नेव उत्तीसु ॥ ४८ ॥
तह वि मए असमाए **प**उमप्पहतित्थनाहमहिमाए ।
पारद्धमियं चरियं निव्विग्घं तह य सम्मत्तं ॥ ४९ ॥
कर्तुं न प्रकटां स्फुरन्नवनवप्रौढार्थदृष्टिं मया
नो तत्त्वानि निवेष्टमं(ष्टुम)त्र भगवन् सि(त्सि)द्धांतसिद्धानिव(च) ।
नैव ख्यापयितुं विधाय चरितं रीतिं **विद**र्भोद्भवां
भक्ति किंतु पुनः पुनर्निगदितुं श्री**पद्म**लक्ष्मप्रभोः ॥ ५० ॥
उम्मीलंति निरंतरा स(अ)त्था सद्दा य जं नवा मज्झ ।
तं **दे**विंदगुरूणं पसायमहिमाइ महमहियं ॥ ५१ ॥
तर्कानधीत्य **दे**वेंद्रगुरोः सिद्धांतमादितः ।
श्री**ह**रिभद्रसूरिभ्यश्चरित्रं निर्ममे मया ॥ ५२ ॥
अंचइ सासयतित्थे नहलच्छी जाव रिक्ख-कुसुमेहिं ।
ससि-रविवरताडंका नंदउ चरियं इमं ताव ॥ ५३ ॥
जालिहरगच्छनहयलमयंकसिरि**देवसूरि**रइयंमि ।
सिरिपउमप्पहचरिए संमत्तो तुरियपत्थावो ॥ ५४ ॥
इति श्री**पद्म**प्रभस्वामिचरित्रं संपूर्णं जातमिति ॥ छ ॥

Pras'asti of the Donor:—

संवत् १४७९ वर्षे वैशाषवदि ४ गुरौ । इष्टदेवताभ्यो नमः ।

॥ ६० ओं नमः । श्रीमज्जिनेश्वरविहारविराजमानं
सद्धर्मकर्मठजनव्रजलब्धमानं ।
सौवश्रिया प्रतिहतान्यपुराभिमानं
ख्यातं हडाग्रनगरं जयति प्रधानं ॥
तत्रौन्नत्यविशेषशालिनि गिरिप्राप्तप्रतिष्ठे शुभ–
च्छायापर्वशतप्रशस्तविभवे प्राग्वाटवंशे ध्रुवं ।
लाषाह्वः प्रबभूव मौक्तिकमणिः सद्वृत्तभावं श्रितः
श्रीमान् सज्जनमंडनं शुचिरुचिश्वासादिदोषोज्झितः ॥
तमोविजेतुः पुरुषोत्तमस्य सुदर्शनश्रीकलितस्य तस्य ।
पद्मासना भोगविलासदक्षा प्रिया गुणाढ्याऽजनि लक्ष्मीदेवी ॥
तत्तन्निर्मलधर्मकर्मनिरतो धर्माभिधानस्तयोः
संजातस्तनयः प्रशस्यविनयः श्रीमान् निरस्तानयः ।
आश्चर्यं प्रतिपद्य विप्रतिकलं साकल्यनैर्मल्यभाग्
यस्य स्पष्टमदीप्यतामृतरुचिर्निःशेषनश्यत्तमाः ॥ ४ ॥
षष्ठाष्टमादिकविचित्रतपोविधानव्यावर्णनास्य ननु पुष्यति कामभिख्यां ? ।
संसारसागरतरंडमखंडभावः संसारतारणकृतं कृतवान् तृतीयः ॥
श्रीमान् वयस्थो दयितान्वितोपि ब्रह्मव्रतं वत्सरपंचविंशतिं ।
स एष यावन्व(?)धिकं प्रपालयन् न विस्मयं कस्य मनस्यवीविशत् ? ॥
श्रीशाक्रस्तवपंचकादिविधिना वारां चतुर्विंशतिं
नत्वा नो जिनवंदनं प्रतिदिनं यावद्भवाभिग्रहात् ।
सम्यक् तस्य सुधीः शतत्रयमिति यो राजतैष्टंककै–
रंतर्मोदकमाहितैर्विहितवानुद्यापनं पुण्यवान् ॥ ७ ॥
इमं सतीचक्रशतक्रतू रतू रतूतुपन्निस्तुपशीलभृत्प्रिया ।
गुणा यदीया हृदयंगमाः सतां श्रयंत्यजस्रं श्रवणावतंसतां ॥ ८ ॥
इतश्च । श्रीमत्तपोगणनभोंगणभास्कराणां सिद्धांतवारिधिविगाहनभास्कराणां ।
श्रीदेवसुंदरगुरूत्तमपट्टभाजां श्रीसोमसुंदरसूरीश्वरसूरिराजां ॥ ९ ॥
पीयूषदेश्यामुपदेशभारतीं निशम्य सम्यक्श्रुतभक्तिभावितः ।
ग्रंथं स लक्षद्वयमानमात्मनः पुण्याय धन्यः स्वधनेन लेखयन् ॥ १० ॥
सोम-वसु-मनु १४८१ मितेब्दे श्रीचित्कोशे व्यलीलिखन्मोदात् ॥ ११ ॥
त्रिभिर्विशेषकं ।

यावद् व्योमातपत्रे ग्रहमणिखचिते मेरुसौवर्णदंडे
श्रीधर्मस्याधिभर्तुर्भ्रमति वरनभोरत्ननीराजनेयं ।
तावत् तत्त्वार्थसार्थामृतरसजलधिर्नंदतात् स्वस्तिशाली
ग्रंथोयं वाच्यमानः सहृदयहृदयानंदकंदांबुदश्रीः ॥ १२ ॥

श्रीः शुभं भवतु ।

३४७. क्रियारत्नसमुच्चय by **गुणरत्नसूरि.** प. २१२ ग्रंथाग्रं ५७७८

Colophon:—

संवत् १४९२ वर्षे श्रीपत्तननगरवास्तव्य सं० **साडा**भार्या**का**मलदेसुत सं० **कर्मणे**न भार्या**मां**ईयुतेन स्वश्रेयसे स्वधनव्ययेन **त**पाश्री**सोमसुंदरसूरि**गुरूणामुपदेशेन **श्रीताडे क्रिया**रत्नसमुच्चयो लेखितो विबुधैर्वाच्यमानं चिरं नंद्यात् ॥ **ज**यानंदसूरीणां सत्कं ।

३४८. (१) **औपपातिक** (सूत्र). प. १–३०; ३२¾″×२½″

(२) **औपपातिकवृत्ति** by **अभयदेव.** प. ३१–११७

End:—

चंद्रकुलविपुलभूतलमुनिपुंगव**व**र्धमानकल्पतरोः ।
कुसुमोपमस्य सूरेर्गुणसौरभभरितभुवनस्य ॥
निःसंबंधविहारस्य सर्वदा श्री**जि**नेश्वराह्वस्य ।
शिष्ये**णाभयदेवा**ख्य**सूरि**णेयं कृता वृत्तिः ॥
अणहिलपाटकनगरे श्रीमद्**द्रो**णाख्यसूरिमुख्येन ।
पंडितगणेन गुणवत्प्रियेण संशोधिता चेयमिति ॥

ग्रंथाग्रं ३१२५ । शुभं भवतु ।

Colophon:—

संवत् १४७३ वर्षे फागणवदि ४ बुधे अद्येह श्री**प**त्तने लिखितं ।
प्राग्वाटज्ञातीयश्रेष्ठि**ला**पाभार्या **झ**बकू तयोः ।
तनुजः श्रेष्ठि**ध**र्माको धर्मकर्मपरायणः ॥
तद्भार्या **र**तू धर्मकर्मनिरता ।

स्वद्रव्यं सप्तक्षेत्र्यां वपन् **त**पागच्छनायकश्री**दे**वसुंदरसूरिशिष्यश्री**सोमसुंदरसूरी**णामुपदेशेन श्रीजैनागमं लक्ष्मप्यलीलिखत् ॥

(३) **रायपसेणी.** प. १–५४

(४) **रायपसेणीटीका** by **मलयगिरि.** प. १–९८ ग्रंथाग्रं ३६५०

Pras'asti is left, some portion is gone and hence incomplete.

३४९. उपदेशकन्दलीवृत्ति by **बालचन्द्र.** प. २३६; ३२½"×२½"

३५०. पार्श्वनाथचरित्र by **भावदेवसूरि.** प. २–२५१; २२½"×२¼"

Colophon:—

संवत् १४३६ वर्षे पौषशुदि ६ गुरौ श्रीपार्श्वनाथचरितं लिखापितमस्ति ।

Pras'asti of the donor:—

श्रीअर्बुदाभिधमहीधरपार्श्ववर्ती ग्रामोस्ति नांदियवराभिधया प्रसिद्धः ।
श्रीवर्धमानजिननायकतुंगशृंगप्रासादराजपरिपावितभूमिभागः ॥

तत्रास्ते रणसिंहः सुश्राद्धः श्राद्धधर्मधौरेयः ।
धार्मिकमतल्लिका सोन्यदैवमशृणोत् सुगुरुवाक्यं ॥

न ते नरा दुर्गतिमाप्नुवंति न मूकतां नैव जडस्वभावं ।
नवांधतां बुद्धिविहीनतां च ये लेखयंतीह जिनस्य वाक्यं ॥

निजवित्तस्य साफल्यकृते ज्ञानावृतेर्भिदे ।
स ततो लेखयामास श्रीपार्श्वचरितं मुदा ॥ छ ॥ छ ॥

The following is further added:—श्रे० वीरा–आल्हसुतेन धार्मिकरणसिंहेन श्रीतपागच्छगगनभास्करश्रीदेवेंद्रसूरि-तत्पट्टालंकरणश्रीविद्यानंदसूरि-तत्पट्ट-श्रीधर्मघोष-तत्पट्टश्रीसोमप्रभसूरि-तत्प०श्रीविमलप्रभसूरि-श्रीपरमाणंदसूरि-श्रीपद्मतिलकसूरि–३जगद्विख्यातश्रीसोमतिलकसूरि-तत्प० श्रीचंद्रशेखरसूरि-श्रीजयानंदसूरि-चरणकमलचंचरीकाणां सांप्रतं गच्छनायक–भट्टारकप्रभुश्रीदेवसुंदरसूरिवराणां श्रीज्ञानसागरसूरि-श्रीकुलमंडनसूरि-श्रीगुणरत्नसूरि-महोपाध्यायश्रीदेवशेखरगणि-पं० देवप्रभगणि-पं० देवमंगलगणिप्रमुखपरिवारसहितानां श्रीसंघसभासमक्षं व्याख्यानार्थं श्रीपत्तनीयसं० सोमसिंह-सं० प्रथमादिश्रीसंघस्य लेखयित्वा समर्पितम् ॥

३५१. त्रिषष्टिशलाकापुरुषचरित्र (प्रथमपर्व सर्ग ६ अपूर्ण).
प. २२१; ३०"×१¾"

३५२. निशीथविशेषचूर्णि(उद्देश १–१० अपूर्ण). प. ३६०; २७"×२"

३५३. पिण्डनिर्युक्तिवृत्ति by **मलयगिरि.** प. १८७; ३४"×२½"

३५४. (१) **सूत्रकृताङ्गवृत्ति** by **शीलाङ्काचार्य.** प. २८०; ३३"×२"

(२) **सूत्रकृताङ्गनिर्युक्ति.** प. २८१–३०४

(३) **सूत्रकृताङ्ग** (मूल). अपूर्ण प. ३०४–३३२

३५५. ओघनिर्युक्तिवृत्ति by **द्रोणाचार्य.** प. २१३; ३४"×२"

३५६. (१) **आचाराङ्गनिर्युक्ति.** प. १–१४; ३२½″×१¾″

(२) ,, (मूल). प. १–७५

(३) ,, **टीका** by **शीलाङ्काचार्य.** प. ३६७

Colophon:—

१४६७ वर्षे आश्विनशुदि १० रवौ पूर्वं लिखितं। संवत् १४८५ वर्षे मार्ग वदि २ बुधे **त्रुटितं समारचितं।** शुभं भवतु।

३५७. (१) **द्व्याश्रयवृत्ति** (सं. सर्ग १२–२०) by **अभयतिलक.** प. १९९; ३४″×२″

(२) **प्राकृतद्व्याश्रयवृत्ति**(सर्ग ८) त्रुटितपत्र २००–३२०

Colophon:—

द्वितीयखंडग्रंथाग्रं ८८५८। सकलग्रंथ १७५७४। **संवत्** १४८६ वर्षे श्रीडूंगरपुरे लिखितं **लीं**बाकेन।

३५८. द्व्याश्रयवृत्ति (प्रथमखण्ड सर्ग १–११). प. २८४; ३३″×२″

Colophon:—

संवत् १४८५ वर्षे श्रीडूंगरपुरे राउलगइयाण(?)विजयराज्ये श्रावणवदि १५ शुक्रदिने **द्व्या**श्रयवृत्तिर्लिखिता **लिं**बाकेन। शुभं भवतु।

३५९. (१) **स्थानाङ्गवृत्ति** by **अभयदेव.** प. ३६८; ३२½″×२″

(२) **स्थानाङ्ग** (मूल). प. ३६९–४६८

३६०. सम्मतिटीका(तत्त्वबोधविधायिनी). अपूर्ण ३–१८७; २१⅓″×२″

प. ६१—इति **त**त्त्वबोधविधायिन्यां **सं**मतिटीकायां प्रथमं कांडं।

३६१. (१) **परिशिष्टपर्व** by **हेमाचार्य.** प. ११९ ग्रंथाग्रं ३५००

Colophon:—

संवत् १३९६ वर्षे आसोजसुदि १५ शुक्रे अश्विनिनक्षत्रेऽद्येह श्री**अ**णहिल्लपुरपत्तने श्री**प**रिशिष्टपर्वपुस्तकं संपूर्णं लिखितं॥ शुभं।

(२) **शान्तिनाथचरित्र.** ग्रंथाग्रं ४९११

Colophon:—

त्रयोदशे अब्दशतेष्वतिक्रांतेषु विक्रमात्।
वर्षे सप्तोत्तरे वैशाषस्य......

३६२. (१) **प्रश्नव्याकरण.** प. १–७६; ३३″×२¼″

(२) **विपाकसूत्र.** प. ७७–१०९

(३) अन्तकृद्दशावृत्ति. ग्रं. १३५६ प. ११०–१४६

(४) अनुत्तरोपपातिकदशावृत्ति.

(५) प्रश्नव्याकरणटीका. ग्रं. ५१०० प. २७२

(६) विपाकव्याख्या. त्रुटित प. २७३–२९६

३६३. उत्तराध्ययनवृत्ति (सुखबोधा) by नेमिचन्द्रसूरि.

प. ३४५; ३३"×२¼"

Beginning:—

आत्मस्मृतये वक्ष्ये जडमति–संक्षेपकवि(रुचि)हितार्थं च ।
एकैकार्थनिबद्धां वृत्तिं सूत्रस्य सुखबोधां ॥ १ ॥
बह्वर्था[द्] वृद्धकृताद् गंभीराद् विवरणात् समुद्धृत्य ।
अध्ययनानामुत्तरपूर्वाणामेकपाठगतां ॥ २ ॥

End:—

इति उत्तराध्ययनटीकायां सुखबोधायां षट्त्रिंशमध्ययनं समाप्तं ॥
अस्ति विस्तारवानुर्व्यां गुरुशाखासमन्वितः ।
आसेव्यो भव्यसार्थानां श्रीकोटिकगणद्रुमः ॥ १ ॥
तदुत्थवैरशाखायामभूदायतिशालिनी ।
विशाला प्रतिशाखेव श्रीचंद्रकुलसंततिः ॥ २ ॥
तस्याश्चोत्पद्यमानच्छदनिचयसदृक्ताव(?)कर्णान्वयोत्थ-
श्रीथारापद्रगच्छप्रसवभरलसद्धर्मकिंजल्कपानात् ।
श्रीशांत्याचार्यभृंगः प्रवरमधुसमामुत्तराध्यायवृत्तिं
विद्वल्लोकस्य दत्तप्र[मद]मुदगिरद् यां गभीरार्थसारां ॥ ३ ॥
तस्याः समुद्धृता चैषा सूत्रमात्रस्य वृत्तिका ।
एकपाठगता मंदबुद्धीनां हितकाम्यया ॥ ४ ॥
आत्मसंस्मरणार्थाय यथा मंदधिया मया ।
अतोऽपराधमेनं मे क्षमंतु श्रुतशालिनः ॥ १ ॥
आसीच्चंद्रकुलोद्भूतो विख्यातो जगतीतले ।
अक्षमारो जितोप्युच्चैर्यः क्षमारोपितः सदा ॥ २ ॥
धर्मोथ मूर्तिमानेव सौम्यमूर्तिः शशांकवत् ।
वर्जितश्चाशुभैर्भावै राग–द्वेष–मदादिभिः ॥ ३ ॥

Further portion is found in the next folio which is not apart of the MS.

सुनिर्मलगुणैर्नित्यं प्रशांतैः श्रुतशालिभिः ।
प्रद्युम्न–मानदेवादिसूरिभिः प्रविराजितः ॥ ४ ॥
विश्रुतस्य महीपीठे बृहद्गच्छस्य मंडनं ।
श्रीमान् विहारुकप्रष्ठः सूरिरूद्योतनाभिधः ॥ ५ ॥
तस्य शिष्योऽम्रदेवोभूदुपाध्यायः सतां मतः ।
यत्रैकांतगुणापूर्णे दोषैर्लेभे पदं न तु ॥ ६ ॥
श्रीनेमिचंद्रसूरिरुद्धृतवान् वृत्तिकां तद्विनेयः ।
गुरुसोदर्यश्रीमन्मुनिचंद्र[ाचार्य]वचनेन ॥ ७ ॥
शोधयतु बृहदनुग्रहबुद्धिं मयि संविधाय विज्ञजनः ।
तत्र च मिथ्या दुष्कृतमस्तु कृतमसंगतं यदिह ॥ ८ ॥

Colophon:—

संवत् १३१० वर्षे माघशुदि १३ रवौ पुष्यार्के महाराजाधिराजश्रीवीसलदेवकल्याणविजयराज्ये महामात्यश्रीनागडमंडलेश्वरमुद्राव्यापारे अद्येह प्रल्हा(ह्ला)दनपुरस्थितेन ठः नाग...यष्टिश्रीकुमारसुतजींदडयोग्यमुत्तराध्ययनवृत्तिपुस्तकं लिखितं ॥छ

अक्षर–मात्र etc.

व्यासतुल्योपि यो वक्ता नानाशास्त्रविशारदः ।
मुह्यति लिखमानस्तु किं पुनः स्वल्पबुद्धयः ? ॥

उदकानल–चौरेभ्यः etc. मंगलं महाश्रीः etc. शुभं भवतु श्रीश्रमणसंघस्य ॥

३६४. चन्द्रप्रज्ञप्तिटीका by **मलयगिरि.** प. ३२$\frac{1}{2}$"×२$\frac{1}{2}$"

Beginning:—

इति श्रीमलयगिरिविरचितायां चंद्रप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य एकादशं प्राभृतप्राभृतं समाप्तं । तदेवमुक्तं दशमस्य एकादशं प्राभृतप्राभृतं । संप्रति द्वादशमारभ्यते । × × × ×

End:—

चंद्रे(वंदे) यथास्थिताशेषपदार्थप्रविसारकं ।
नित्योदितं तमोस्पृष्टं जैनं सिद्धांतभास्करं ॥ १ ॥
विजयंतां गुणगुरवो गुरवो जिनवचनप्रभासनैकपराः ।
यद्वचनवशादहमपि जातो लेशेन पटुबुद्धिः ॥ २ ॥
चंद्रप्रज्ञप्तिमिमामतिगंभीरां विवृण्वता कुशलं ।
यदवापि मलयगिरिणा साधुजनस्तेन भवतु सुकृती ॥ ३ ॥

इति मलयगिरिविरचिता चंद्रप्रज्ञप्तिटीका समाप्ता । मंगलं महाश्रीः । शुभं भवतु श्रीसंघस्य । ग्रंथाग्रं ९५०० श्लोकमानेन यथा । श्रीसीमंधरस्वामिने नमः ।

३६९. **पार्श्वनाथचरित्र** by **देवभद्र.** प. ३११; २९"×२"
See Peterson's 3rd Report

End:—

इति श्रीप्रसन्नचंद्रसूरिपादसेवकश्रीदेवभद्राचार्यविरचितं श्रीपार्श्वनाथचरित्रं समाप्तं।

Colophon:—

संवत् ११९९ अश्विन वदि रवावद्येह्नाशापह्यां गौडान्वयकायस्थकविसेल्हण-सूनुना पुस्तकं वल्लिगेनेदं लिख्यतेथ समाप्यते ।

Pras'asti of the Donor:—

जलधिवलयवेलामेखलायामितायां कलितविपुलशाखः सद्गुणानां निवासः ।
विततविशदपर्वा संश्रितप्रीतिहेतुर्जितधरणिधरर्द्धिः पत्रशाली विशालः ॥
श्रीमान् प्राग्वाटवंशोस्ति तत्र मुक्ताफलप्रभः ।
सद्भूषणं शुचिः श्रेष्ठी बकुलः समजायत ॥
चंचच्चाबिंदुरोचिश्चय–हरहसिताकारकीर्तिच्छटाभिः
सर्प्पंतीभिः समंताद् धवलितवसुधः शुद्धबुद्धेर्निधानं ।
दिक्कांताकर्णपूरप्रतिमगुणगणः सज्जनानंददायी
संतोपापारवारः करणरिपुबलं हेलया यो जिगाय ॥
शीलेन शी(सी)तेव जनौघरंजिका सौभाग्यसंगेन जिगाय पार्वतीं ।
या क्षांतियोगेन निरासकास्य लक्ष्मीति जायाऽस्य बभूव सा शुभा ॥
सूनुस्तस्याः समजनि सच्छायो विबुधजनमनोहारी ।
वेल्लक इति विख्यातो नीरनिधेः पारिजात इव ॥
सुविहितपदांभोजे सेवारतिर्मधुपाधिका
भुजगकमलासंगे बुद्धिर्मरालकुलोज्ज्वला ।
अमृतमधुरा सारा वाणी सतां हृदयंगमा
विमलमनसो यस्यावश्यं बभूव मनोहरा ॥
चरणचंचुरसाधुकृतादरो गुणगृहं दम–दान-दयापरः ।
गुरुपदाम्बुरुहप्रणतिः सुधीस्तदनुजोजनि वा(वी)जलनामकः ॥
सद्धर्माभिरतिर्गुणैकवसतिः संतोपपुष्यद्धृतिः
ज्ञानाभ्यासरतिर्गृहीतविरतिः सौजन्यवारांपतिः ।
साधूपास्तिकृतादृतिर्गजगतिर्धीरः प्रसन्नाकृतिः
कल्याणव्रततिर्निरस्तकुगतिः प्राणिप्रणुन्नक्षतिः ॥
वीरणागाभिधः पुत्रस्तृतीयः सुगुणास्पदं ।
जाउकाथ पितुर्जामिर्भगिन्येषां च वेल्लिका ॥

या शी(सी)तेव कलंकचक्रविकलं शीलं दधाना सती
जाता ख्यातिमती सतीति गुणिनां चेतश्चमत्कारिणी ।
कृत्याकृत्यविवेककारिधिषणा धर्मैकचिंतामतिः
सज्जाया शितदेव्यभून्मतियुता सा वेल्लकस्य प्रिया ॥
चाहिणी वाजकस्याद्या पत्नी जाता द्वितीयका ।
शृंगारमतिराज्ञायां जिनेशस्य व्यवस्थिता ॥
वाजकश्चिंतयामास सारसंवेगसंय(ग)तः ।
अन्यदा स्फटिकाकारे मानसे शुद्धधीर्यथा ॥
कल्पांतप्रलयप्रवृत्तपवनव्यावृत्तदीपांकुरा-
कारा प्रीतिरनंगसंगिललनाभ्रूभंगुराः संगमाः ।
घर्मक्लांतमृगेंद्रवक्त्रकुहरव्यालोलजिह्वाचलं
लावण्यं लवलीदलास्थविलसद्बिंदूपमं जीवितं ॥
शरदभ्रसमाः सर्वे पदार्थाः सुखहेतवः ।
संत्रासोद्भ्रांतसारंगीविलोचनचलं बलं ॥
माद्यत्कुंजरकर्णतालति रतिः प्रोच्चंडसौदामिनी-
दामाडंबरति प्रभुत्वमबलाचेतः शरन्मेघति ।
लक्ष्मीः शक्रशरासनत्यनुकलं संध्याभ्ररागत्यहो !
तारुण्यं विषया वरा वरधुनीवेगंति नृणां यतः ॥
तस्मात् संसारवल्लीवलयविर.........
...क्षाभरंभामलनमदकलः काललीलाविजेता ।
मोक्षस्त्रीसंगदूतीसुगतिपथरथः संपदाह्वानमंत्रो
ध्वस्ताशेषव्यपायो निखिलसुखखनिर्धर्म एवात्र कार्यः ॥
प्रभवति स च धर्मो ज्ञानतस्तच्च शुद्धं......
जिनवचनसरोजाज्जायते सौरभं वा ।
तदपि सततसेवाह्रासभावान्न का......द्भिर्विरच्य ॥
ततश्च । - कामोरुदावे विषयोरुतृष्णाच्छेदाय धन्यैः प्रतितन्यतेसौ ।
संसारसत्रे भविता जिनाज्ञा ज्ञानामृतांभःसरसी विलेख्य ॥
विशेषतो युक्तं ज्ञानदानं । यतः–
समस्तधरणीतले प्रथितकीर्तिकल्लोलिनी
विनिर्गमकुलाचलो विमलकेवलालोक...
......शक्रप्रतो वरां न चरणक्रियां विशदबोधयोगं विना ।

मोहध्वांतांशुमाली भववनगहनोत्सर्पिदावानलाभो
मानामानागशृंगप्रहतिहरिहयोद्दामहेतीयमानः......

३६६. (१) **पञ्चाशक** (मूल). प. १–४४

(२) **पञ्चाशकवृत्ति** by **अभयदेव.** प. ४५–३६६

Colophon:—

संवत् १४४२ वर्षे भाद्रपदसुदि २ सोमे लिखितमिदं पुस्तकं श्री**स्तंभतीर्थनगरे** लिखितं ॥ छ ॥ **आ**भूश्रेष्ठी ।

३६७. (१) **अनुयोगद्वार** (मूल). ग्रं. २००५ प. १–४३; ३२½"×२"

(२) ,, **वृत्ति** by मलधारि**हेमचन्द्र.** प. ४४–२२३

Colophon:—

ग्रंथाग्रं ५८८८ संवत् १४८० वर्षे कार्तिकवदि १२ रवौ महं **भीमासुतहरि-**दासेन लिखितं । शुभं भवतु । कल्याणमस्तु । मंगलमस्तु । श्रीसंघस्य भद्रं भूयात् ।

Pras'asti of the Donor:—

ॐ नमः सर्वविदे ।

पुरंदरपुरस्फाति भाति श्री**पत्तनं** पुरं ।
धर्म्मन्यायमये यत्र नित्यं लोकः सुखायते ॥ १ ॥

विभाति गांभीर्यगुणेन नानाराजाप्तवृत्तिर्जडभावयुक्तः ।
राजन्ननेकैः पुरुषोत्तमैः श्री**श्री**मालवंशांबुनिधिर्नवीनः ॥ २ ॥

तस्मिन् समग्रव्यवहारिरत्नमप्रत्नधामानुपमानकीर्तिः ।
निर्दूषणः सद्गुणधाम धर्ममयैककर्माजनि **कर्म**सिंहः ॥ ३ ॥

प्रियास्य **गो**ईत्यभिधा सुधासदृग्वचःप्रपंचा समजायताद्भुता ।
विशुद्धशीलादिगुणैरनुत्तरैर्या **सी**तया स्वं तुलयांबभूवुषी ॥ ४ ॥

तदंगभूर्भूरिसमृद्धिधामा महेभ्यसीमाजनि **माल**देवः ।
बुधा अबुध्यंत भवांबुधौ यं धनेश्वरस्य प्रतिबिंबमेव ॥ ५ ॥

श्रीगूर्जरेश्वरनियोगिनि **रत्न**पाले
तद्ग्राहयत्यपि बलेन जनं समग्रं ।
नैकादशीव्रतमधा[त्यजद् ?] बहुधा प्रकारै-
स्तद्भापितोपि दृढदर्शनधीः सुधीर्यः ॥ ६ ॥

अहो ! अनेकैः सुकृतोन्मदैर्जनं सदैकधर्मात्ममयं नयन्नपि ।
अनंतधर्मात्मकवस्तुदेशिनो जिनेशितुः शासनमत्यजन्न यः ॥ ७ ॥

जगदंतगता विमुक्तवद् ध्रुवमानंत्यजुषोपि यद्गुणाः ।
ग्रहचक्रमिव स्थिरा अपि क्रममाणाश्च जगत्सु कौतुकं ॥ ८ ॥
श्रीदेवसुंदरयुगोत्तमसेवयाप्तश्रीमज्जिनागमविचारमहारहस्यः ।
नंदीश्वरस्तवनमु[ग्ध]तरान् नवातीचारांश्च यो निरुपमानमतिश्चकार ॥ ९ ॥
षड्विधान्यहरहः कुरुते स्मावश्यकानि कलिकालविजेता ।
यो यथोचितमथो धनदानो(नाद्) दीनलोकमुददीधरदेव ॥ १० ॥
श्रीतीर्थयात्रा–जिनबिंब–साधु–पूजा–प्रतिष्ठादिविधानधीरः ।
सदापि साधर्मिकवत्सलत्व–दानादिधर्मैरजयत् कलिं यः ॥ ११ ॥
अथवा । संघभारधरणैकधुरीणा धर्मकर्मसु कदापि न रीणाः ।
नित्य-देव-गुरुभाक्तिकचित्ताः क्षेत्रसप्तकनियोजितवित्ताः ॥ १२ ॥
भूतलप्रथितकीर्तिसमूहाः पूरितार्थिजनसर्वसमीहाः ।
भूरिभूतिपरिभूतधनेशास्तेजसावजितबालदिनेशाः ॥ १३ ॥
मर्त्यलोकहितहेतुकमिंद्रप्रेपिता इव दिवः सुरवृक्षाः ।
पंच तस्य तनया विनयाढ्या भूरिभाग्यविभवा विजयंते ॥ १४ ॥
आसीज्जनाह्लादकमूर्तिराद्यः केह्लाभिधस्तेषु धियां निधानं ।
प्रभावकालंकरणस्य यस्य दशाप्यशोभंत दिशो यशोभिः ॥ १५ ॥
आस्ते जगत्ख्यातयशा द्वितीयो हीराभिधानो व्यवहारिहीरः ।
रमांबुधेर्यस्य गुणास्तरंगा इवास्तसंख्या जगतीं स्पृशंति ॥ १६ ॥
सकलव्यवहारिवर्गमौलिर्वीराकः सुकृती सुतस्तृतीयः ।
कलयत्यधुना प्रपन्नशीलः श्रेष्ठींदोरुपमां सुदर्शनस्य ॥ १७ ॥
भक्तः श्रीगुरुपदयोः सदापि धर्माधारः श्रीजिनपतिशासनप्रभाकृत् ।
त्रैलोक्यप्रविततयशा विशां प्रधानं पाताकः समजनि तत्सुतश्चतुर्थः ॥ १८ ॥
सन्नंदकः स्फुटविराजिसुदर्शनश्रीर्लक्ष्मीविलासवसतिः पुरुषोत्तमोत्र ।
तस्यांगभूर्जयति पंचमकः क्षमायां गोविंद इत्यभिधया विदितो गुणैश्च ॥ १९ ॥
यौवनेपि दधता किल शीलं येन धीरपुरुषाचरितेन ।
स्मारितः स्मररिपुः परिभूय स्थूलभद्रमुनिवृत्तमिदानीं ॥ २० ॥
केल्हाभिधानस्य जनी विनीता ख्यातास्ति हर्पूरिति यद्गृदुर्व्यां ।
धर्मद्रुमः श्रीगुरु–देवभक्तिरसैः प्रवृद्धः फलतीप्सितार्थैः ॥ २१ ॥
चतुरंबुधिचारुकीर्तयोश्चतुराशाजनतामनोमताः ।
तनुजा मनुजालिमंडनं चतुराः संति चतुर्मितास्तयोः ॥ २२ ॥

व्यवहारिवर्गमंडनमखंडदानादिधर्मविधिनिरताः ।
डाहा **भो**ला **मं**डन **मा**णिक्येति क्रमाद् विदिताः ॥ २३ ॥
जगदद्भुतसौंदर्ये भार्ये **ही**राभिधस्य जयतो द्वे ।
आद्या **शा**णीनाम्नी **ही**रादेवी द्वितीया च ॥ २४ ॥
भाग्य–दाक्ष्य–विनयादिगुणाढ्ये ते क्रमेण तनयात्रसुवातां ।
आदिमा **वि**जयकर्णसकर्णं भूरिभूतिमपरा च **ग**जाह्वं ॥ २५ ॥
मायादिदोषरहिता दयिता विभाति **वी**राभिधस्य **फ**लकूरनुकूलचित्ता ।
या यौवनेपि विमलं प्रतिपद्य शीलं योषासु धैर्यविरहापयशः प्रमार्ष्टि ॥ २६ ॥
सुतौ तयोर्भाग्यभृतौ विनीतौ प्रभूतभूती गुणभूरभूतां ।
आद्यः कृती नंदति **दे**वदत्तस्तथा द्वितीयो **गु**णदत्तनामा ॥ २७ ॥
पाताभिधानव्यवहारिमौलेरुभे अभूतां दयिते विनीते ।
तत्रादिमा सच्चरितैः पवित्रा **प**त्रापदेवी रतितुल्यरूपा ॥ २८ ॥
अपरा **प**द्मलदेवी नित्यं श्रीवीतरागभक्तिपरा ।
तनुजौ मनुजौ च वराविमे क्रमेणासुवातां द्वौ ॥ २९ ॥
श्री**जि**नेंद्रपदपंकजभक्तः सर्वदा सुकृतकर्मसु सक्तः ।
आदिमो विजयते **न**गराजः कीर्तिपूरसितशारदराजः ॥ ३० ॥
उदयराज इति प्रथितोपरस्सकलपौरविभूषणमंगजः ।
जयति देव–गुरूत्तमभक्तिभृन्नरमणी रमणीयगुणालयः ॥ ३१ ॥
गोविंदनाम्नो दयितास्ति **गं**गादेवी सदा श्रीगुरु–देवभक्ता ।
न जातु धर्मामृतशीतलं यन्मनः कलिस्तापयितुं समर्थः ॥ ३२ ॥
तयोर्जयंत्यब्धिमिताः सुताः श्रीपदं महाभाग्यभृतो विनीताः ।
भृताश्चतस्रोपि दिशो यशोभिर्येषामशेषा हिमरुग्महोभिः ॥ ३३ ॥
आद्यो **ह**रिश्चंद्र इति प्रतीतः सूनुर्द्वितीयः किल **दे**वचंद्रः ।
ततस्तृतीयो **जि**नदासनामा प्ररूढनामा गुरु–देवभक्तः ॥ ३४ ॥
अथ च । श्री**जै**नशासनसमुद्धरणैकधीराः श्री**दे**वसुंदरयुगप्रवरा विरेजुः ।
तेषां पदे जनमुदे विहितावताराः श्री**सो**मसुंदरगुरुप्रवरा जयंति ॥ ३५ ॥
निःशेषलब्धिभवनं भुवनातिशायि माहात्म्यधामभरतोत्तमसंयमाद्याः(ढ्याः) ।
किं चात्र सर्वगुणसुंदरशिल्पसीमाभूता जयंत्यधि**जि**नेश्वरशासने ये ॥ ३६ ॥
चत्वारः श्रीमदाचार्यास्तेषां शिष्या जयंत्यमी ।
एकपादपि यैर्धर्मश्चतुःपादभवत् कलौ ॥ ३७ ॥

शांतिस्तवेन जनमारिहृतः **सह**स्रनामावधानिविरुदा महिमैकधाम ।
तेष्वादिमा विविधशास्त्रविधानधातृतुल्या जयंति **मु**निसुंदरसूरिराजाः ॥ ३८ ॥
षट्त्रिंशता सूरिगुणैरलंकृतास्तथा द्वितीया विजयं वितन्वते ।
जगच्छ्रु(त्स्तु)ताः **कृ**ष्णसरस्वतीति सद्यशःश्रियः श्री**ज**यचंद्रसूरयः ॥ ३९ ॥
व्यजयंत **म**हाविद्याविडंबनप्रभृतिशास्त्रविवृतिकृतः ।
श्री**भु**वनसुंदरगुरूत्तमास्तृतीया यशोनिधयः ॥ ४० ॥
तुर्या जयंति जगतीविदिता निखिलांगपाठपारगताः ।
श्री**जि**नसुंदरगुरवः प्रज्ञावज्ञातसुरगुरवः ॥ ४१ ॥
अ(इ)तश्च । गणाधिपश्रीगुरु**सोमसुंदर**प्रभूपदेशं विनिशम्य सुंदरं ।
श्रुतस्य भक्तेरधुना **जि**नाधिपप्रवर्तमानागमलेखनेच्छया ॥ ४२ ॥
गोविंद–नगराजाभ्यां **नंदे**भ–**मनु**वत्सरे ।
लेखितः पुस्तको जीयादाचंद्रार्कं प्रमोददः ॥ ४३ ॥
इति प्रशस्तिः । **अ**नुयोगद्वारवृत्तिः । व्य० **गो**इंद–**न**गराजसत्कः ॥

३६८. शान्तिनाथचरित्र (प्रा.) by **देवचन्द्रसूरि.**

ग्रं. १२१०० त्रुटित प. ३२१; ३३″×२″

Pras'asti of the Donor:—

क्षोणीतलप्रसृतमूल उदीर्णशाखो धर्मैकहेतुरुरुपर्वपरंपराभूः ।
श्रीमाननेकगुणभृद्विहितं प्रकुर्वन् **प्रा**ग्वाटवंश उदितो विदितोस्ति भूमौ ॥ १ ॥
तद्वंशलब्धप्रभवः पुरासीद् विनिर्गतः **स**त्यपुरादुदीर्णात् ।
श्रेष्ठी विशिष्टः किल **सिं**हनागस्तस्याथ भार्याभव**दं**पिनीति ॥ २ ॥
चत्वारोथ तयोः पुत्रा जाताः सर्वत्र विश्रुताः ।
णाढको **वी**रडश्चान्यो **व**र्धनो **द्रो**णकस्तथा ॥ ३ ॥
कनकरुचि पित्तलामयं बिंबं यैः कारितं वरं ।
यत् पूज्यतेधुनापि **द**धिपद्रे श्री**शां**तिजिनभुवने ॥ ४ ॥
णाढकश्रेष्ठिनस्तत्र [ ] वदेवी प्रियाभवत् ।
त्रयः पुत्रास्तयोर्जाताः सद्गुणाढ्याः पटा इव ॥ ५ ॥
तत्राद्य **आम्र**दत्ताख्यो द्वितीय**श्चाम्र**वर्धनः ।
तृतीयः सज्जनानंददायिमूर्तिश्च **स**ज्जनः ॥ ६ ॥
येनाकार्यत निर्मलोपल......करशशांकप्रभ-
पार्श्वे(र्श्वे) **सु**पार्श्वतीर्थकरयोर्मूर्ति यशोवन्निजं ।

प्रायः पूरयदौपयाचितशतान्याराधकप्राणिनां
श्रीमद्वीरजिनेश्वरस्य भवने मड्डाहृ(हृ)ताख्ये(ख्ये) पुरे ॥ ७ ॥
पुत्र्यौ च पो(णा)ढकस्य द्वे आसिषातां महत्तराः(रे) ।
यशःश्रीति गणिन्यन्या शिवादेवीति विश्रुता ॥ ८ ॥
महुलच्छिः सज्जनस्याथ प्रियाभूत् पद्मिनीसमा ।
यया स्वपरि[मल]पद्माभातोपिता मार्गणा म(ल)या ॥ ९ ॥
विश्वप्रसिद्धाः कमनीयरूपाः समीहिताः सर्वजनस्य कामं ।
तयोः सुताः कामसुता इवोच्चैः पंचाभवन् किमु न साधुनिंद्याः ॥ १० ॥
तत्राद्यो धवलो नाम दी(वी)सलो देसलस्तथा ।
तुर्यो राहडनामा तु पंचमो वाहडो मतः ॥ ११ ॥
धवलस्य सलूणीति प्रियासीदथ चैतयोः ।
वीरचंद्रः सुतो जातो देवचंद्रस्तथा परः ॥ १२ ॥
विजयाजयराजापसरणमुख्यास्तत्र वीरचंद्रसुताः ।
जाता हि देवचंद्रस्य देवराजः सुतः प्रवरः ॥ १३ ॥
पुत्रिकैका सिरी जाता धवलस्य कलस्वरा ।
निरपत्यावभूतां च पुत्रौ वीसल-देसलौ ॥ १४ ॥
राहडस्य लघुभ्राता वाहडोभूज्जनप्रियः ।
भार्या जिनमतिश्चास्य पुत्रो जसडुकस्तयोः ॥ १५ ॥
सज्जनस्य तथाभूतां द्वे सुते तत्र शांतिका ।
माता शुकादिपुत्राणां द्वितीया धांविका पुनः ॥ १६ ॥
अथ तत्र राहडो यो विशेषतः सोभवद् गुणी प्राज्ञः ।
सुजनप्रियः सुशीलः प्रियधर्मा सर्वदोदारः ॥ १७ ॥
अपि च । सद्भद्रशाला(लो) भुवि नंदनाद्यः(ढ्यः) ससौमनस्योनघपंडरु.... ।
भव्यस्वभावं च दधदुन्नतात्मा सुवर्णभाग् राजति मेरुवद् यः ॥१८॥
तथा । पूजां करोति विधिना स्तवनं जिनानां साधून् स्तुते तदुदितं समयं शृणोति ।
दानं ददाति च करोति तपोपि शक्त्या शीलं प्रपालयति गेहिजनोचितं यः १९
तस्य प्रिया देगतिनामधेया धर्मार्थिनी देव-मुनींद्रभक्ता ।
.........पात्रवितीर्णवित्ता नित्यं समाराधितभर्तृचित्ता ॥ २० ॥
या नित्यशः सहजभूषणभूषितांगी लज्जानवद्यवसना शुचिशीलचर्या ।
जैनागमश्रवणभाक्सुवर्णालंकारभृच्छुभवचःक्रमुकाढ्यवक्त्रा ॥ २१ ॥

चत्वारस्तनया बभूवुरनयोः संपन्नकोशान्वया
धर्माभ्यासपराः क्षमाभरधराः प्राप्तप्रतिष्ठाः कलौ ।
सत्यागा गुरुविक्रमाः सुयशसः सच्छक्रसाराः प्रजाः
पूज्याः सद्विनयाः सुनीतिसदनं संतो नरेंद्रा इव ॥ २२ ॥
तत्राद्यश्चाहडो नाम **वो**हडिस्तु द्वितीयकः ।
आसडाख्यस्तृतीयश्च तुर्यो **आ**सुधरस्तथा ॥ २३ ॥
पापारिप्रहतिसहाः सुबाणयुक्ताः सद्वंशसंजाताः ।
अन्यारूढगुणा ये धनुर्लता इव विराजंते ॥ २४ ॥
राहडश्रेष्ठिनस्तत्र जाता वध्व इमा वराः ।
अश्वदेवी **व**सुंधी च **च**माइ–**ते**जय–**रा**जुकाः ॥ २५ ॥
तथा । **य**शोधर–**य**शोवीर–**य**शोकर्णादयोभवन् ।
पौत्री पुत्रश्च **ये**ऊ य **जा**सुकाद्या जयंतु का ॥ २६ ॥
एवं कुटुंबयुक्तस्य **रा**हडश्रावकस्य तस्याथ ।
वोहडिनामा पुत्रः पंचत्वमुपागतः सहसा ॥ २७ ॥
अथ तद्वियोगविधुरः स **रा**हडश्रावकः स्म चिंतयति ।
हा ! धिक् संसारस्वरूपमतिनिंदितं विदुषां ॥ २८ ॥
तथाहि–जीवितं यौवनं सद्वपुः सारसीमंतिनी संगमाः सज्जनाः ।
सर्वमित्यादिकं वस्तुजातं महामेघमध्यस्थविद्युल्लताचंचलं ॥ २९ ॥
अतो मनुष्येण विधेय एव चतुःप्रकारोपि **जि**नेंद्रधर्मः ।
उशंति तत्रापि च सुप्रशस्यं सज्ज्ञानदानं मुनिकुंजरेंद्राः ॥ ३० ॥
अतोहं ज्ञानदानं तत् करोमीति विचिंत्य सः ।
चरितं लेखयामास **शांते**र्बिंबं च कारितं ॥ ३१ ॥
स्वभुजोपात्तवित्तेन पूर्वं सत्पित्तलामयं ।
गृहपूजोचितं स्फारं पुण्योपार्जनहेतवे ॥ ३२ ॥
नृपतिगृहमिवोच्चैश्चंचदंतःसुवर्णं निहितरुचिरचित्रं चारुपत्रेण शोभि ।
स्फु..............अंगीकृतप(ब)हु...जमोदं पुस्तकं तच्चकास्ति ॥ ३३ ॥
संवत्सरे **नग-भुजार्क**मिते नभस्ये मासे पुरे**णहिलपाटक**नामधेये ।
सुश्रावके कुमरपालनृपे च राज्यं कुर्वत्यलिख्यत सुपुस्तकमेतदंग ! ॥ ३४
श्रीमत्परमानंदाचार्येभ्यः श्रीधराः प्रभाचा...... ।
....................................शिष्येभ्यः ॥ ३५ ॥

यावन्नभःश्री जननीव तोयं पयोधरक्षीरमथ प्रजानां ।
तनोति तारा-भ-रवी सुपुष्यदन्नांशु तावद् भुवि पुस्तकोयं ॥ ३६ ॥
श्री**चक्रेश्वरसूरेः** श्री**परमाणंदसूरि**भिः शिष्यैः ।
विहिता प्रशस्तिरेषा पदमंते(?) पुस्तकस्यास्य ॥ ३७ ॥

मंगलं महाश्रीः ।

३६९. संमतितर्कटीका (उत्तरार्ध) by **अभयदेव.**

प. ३३५; ३३½″×१¾″

Beginning:—

अथ कथं प्रत्यभिज्ञा प्रमाणमनुभवति ?

Colophon:—

संवत् १४४६ वर्षे फागुणसुदि १४ सोमे भट्टारकश्री**सोमतिलकसूरीणां भंडारे** महं **ठाकुरसीहे**नालेखि ।

प्राग्वाटज्ञातीयसा० **षो**षासुतसा० **महणा**भार्यासा० **गो**नीपुत्र्या विहितयात्रादिबहुपुण्यकृत्यसं० **हरिचंद**पितृसा० **पा**रसभागिनेय्या **वील्ह**श्राविकया भट्टारकश्री**देवसुंदर**गुरूणामुपदेशेन **अभयचूला**प्रवर्तिनीपदस्थापना-श्रीतीर्थयात्राद्यर्थं समागतसं० **हरिचंदे**न सह प्राप्तया श्री**स्तंभतीर्थे** संवत् १४७७ वर्षे **संमति**पुस्तकं लेखितमिति । भद्रं श्रीसंघाय ॥

३७०. त्रिषष्टिश. पु. चरित(पर्व ३-७,९) by **हेमचन्द्र.**

प. ३८०; ३२″×२½″

Colophon:—

महंश्री**अभयसिंह**स्य । × ×

सूर्याचंद्रमसौ यावदुदयेते नभोंगणे ।
पठ्यमानो बुधैस्तावन्नंदतादेप पुस्तकः ॥ मंगलं महाश्रीः ॥

३७१. पउमचरिय (पद्मचरित्र). प. २५६; ३६½″×२″

Colophon:—

इति **पद्म**चरित्रं समाप्तमिति । ग्रंथाग्रं १०५०० .

संवत् १४५८ वर्षे प्रथमभाद्रपदशुदि ८ अष्टम्यां रवौ श्री**पत्तने पद्म**चरित्रं लिखितं । श्रीशिवमस्तु । श्रीः ।

Pras'asti of the Donor:—

प्राग्वाटज्ञातीयः श्रेष्ठी **वीरा**भिधः सुकृतनिष्ठः ।
कीर्तिप्रथाप्रथिष्ठः शिष्टप्रष्ठोजनि गरिष्ठः ॥ १ ॥

प्रभूतपुण्यार्जनसावधानस्तस्यांगजोभूद् **वय**जाभिधानः ।
गुणैरनेकैरिह निःसमानः परोपकारप्रध(थ)नैकतानः ॥ २ ॥

माऊसंज्ञा तस्य भार्या विधिज्ञा जज्ञे धन्यागण्यपुण्यप्रवीणा ।
कीर्तिस्फीता सर्वदोदारचित्ता रेखाप्राप्ता स्त्रीषु शीलोत्तमा च ॥ ३ ॥

चत्वार एते तनयास्तदीया जाता धनाढ्याः सुकृतावदाताः ।
तेजाभिधो भद्रक**भीम**सिंहः स **पूर्ण**सिंहो भुवि **पद्म**सिंहः ॥ ४ ॥

सुता तथा **रूपल**नामधेया गुणैरमेया शुभभागधेया ।
यस्याः पितृव्या त(स्त)नुमात्रकेण श्रीम**ज्जयानंद**मुनींद्रचंद्राः ॥ ५ ॥

आबालकालादपि...पुण्यभरैकताना करुणार्द्रचित्ता ।
देवे गुरौ भक्तिमती सतीद्धा सदा तपःकर्मणि कर्मठा या ॥ ६ ॥

श्रीम**त्त**पागणनभोंगणभानुकल्पश्री**देवसुंदर**गुरुप्रवरोपदेशात् ।
नंदेषु-वारिधि-शशांक[१४५९]मिते प्रतीते संवत्सरे वहति **विक्रमभूपतीये** ७

श्रीमत्**पद्मचरित्रं** बहुना द्रविणेन लेखयित्वेदं ।
श्री**पत्तनीयकोशे** निवेशयामास सा सिद्धै ॥ ८ ॥

मोक्षाध्वनीनसाधूनां ज्ञानसत्रोपमं परं ।
आचंद्रार्कमिदं जीयात् पुस्तकं प्रास्तदूषणं ॥ ९ ॥ श्रीः श्रीः ।

३७२. (१) ज्ञातासूत्र. प. १-१४४; ३२″×२″

(२) ,, **वृत्ति** by **अभयदेव.** प. १-१२३

Pras'asti of the Donor:—

अखंडैर्यः **खंडैर्नव**भिरभितः पिंडितवपुः
सुधाकुंडैः कुंभीनससहकृतैर्मंडित इव ।
सुरैः सेव्यः सर्वैरविजितजरा-मृत्युचकितैः
प्रभुः स श्री**पार्श्वो** जयति नितमां यत्र सततं ॥ १ ॥

उद्दाम**म्ले**च्छकोटिप्रसृमरसमरत्रस्तवृंदारकाणां
विश्रामस्थानतां यत् प्रतिपदमगमत् पुण्यलोकैरशोकैः ।
चंचद्गंगातरंगोज्ज्वलबहलगुणैर्धाम धर्मश्रियां यत्
श्रीमद् **घोघा**भिधानं सुललितनगरं स्वस्तिमन्नित्यमस्ति ॥ २ ॥

तस्मिन् रमायाः सदने दवीयोदेशस्थवस्तुप्रभुभिः प्रपूर्णे ।
वेलाकुले भूमितलप्रसिद्धे **घो**घाभिधाने नगरे समृद्धे ॥ ३ ॥
त्रिभिर्विशेषकं ॥

वेधा वीक्ष्य कलिप्रचंडभुजगग्रस्तं समस्तं जगत्
तत्राणाय ससर्ज तर्जनपरां यां दुर्जनानां ततः ।
ज्ञातिं पूर्णमृगांककांतिविशदां **श्रीमाल**संज्ञामिह
शश्वद्दाम–विवेकवासभवनं विज्ञानवारांनिधिं ॥ ४ ॥
तस्यां ज्ञातौ बृहत्यामतिमतिविभवापास्तवाचस्पतिः श्री-
क्रीडागारं गरीयोनरवरनिवहैर्माननीयः सदापि ।
मंत्री मंत्रप्रबलबलवान् धुर्यधैर्यादिवर्यः
मांडाह्वानः समजनि जनतासेवनीयोऽवनौ वै ॥ ५ ॥
श्रीयादेवीति तस्यासीद् भार्या भूरिगुणैकभूः ।
या मान–दान–शीलादिपुण्यैर्जज्ञे प्रसिद्धिभाक् ॥ ६ ॥
तयोः सुतावजायेतां विख्यातौ क्षोणिमंडले ।
सरवण–धींधाह्वानौ प्रधानौ व्यवहारिषु ॥ ७ ॥
आद्यः **सर्व**णनामतः सुविदितो देवालयैः सुंदरां
सत्साधर्मिकलोकलक्षबहलां गुर्वादिभिर्भासुरां ।
श्री**शत्रुं**जय–**रै**वतादिषु महातीर्थेषु यात्रां सृजन्
श्रीसंघाधिपतेः पदं निजकुले विस्तारयामासिवान् ॥ ८ ॥
पादलिप्तपुरेऽपूर्व**ल**लताह्वसरोवरे ।
उद्धारं यश्चकारोरुद्रविणव्ययपूर्वकः(कं) ॥ ९ ॥
संसारदेवी स्थवि.................................... ।
...............लादिवरेण्यपुण्यैः फलेग्रहिः स्वीयजनुः ससर्ज ॥ १० ॥
द्वितीयोऽद्वैतभाग्याभिरामः श्रीमान् धीमान् **धीं**धनामाजनिष्ट ।
यो दुष्काले भूरिलोकानशोकान् **स**त्रागारे भोजयित्वा वितेने ॥ ११ ॥
पादलिप्तपुरे **प**द्मप्रासादं यः समुद्दधौ ।
अन्यान्यपि बहून्येप धर्म[स्था]नानि चाकरोत् ॥ १२ ॥
सरवणसंघाधिपतेस्तनयो विनयोज्ज्वलो गुणविशालः ।
देवानादि नाम धीं(? संघा)धिपतिर्जयति प्रशममतिः ॥ १३ ॥
सद्भाग्य–सौभाग्य–कला–सुशीला दानादिपुण्येषु च धीधुरीणा ।
अस्यास्ति जाया............**र**मा परा धिं(**पि**)मलदेवीनाम्नी ॥ १४ ॥

अनयोः सुतस्समथ(ध)रो द्वितीयो को हिः मयर...... ।
.........ई हस्तिनाम्नि......च गौरी गुणैरासन् ॥ १५ ॥

इतश्च । श्रीमत्तपागणनभोंगणभासनाक्षी(?)जाग्र...[यु]गोत्तमगुणावलयो जयंति ।
श्री**देवसुंदर**गुरूत्तमनामधेयाः सूरीश्वरा निरुपम[ ]नामधेयाः ॥ १६ ॥
तेषां निरंतरं सम्यक् निशम्य वचनामृतं ।
[सद्]यो **वि**क्रमादित्यः प्रबुद्धहृदयांबुजः ॥ १७ ॥
[एका]दशांगीवरसूत्र–वृत्तीः लिलेखयन् लेखयतुल्यलक्षा (?) ।
अलीलिख...भिमिमां सपु(प)त्रां वस्वांगराह्वीं (?) अयनव्ययेन ॥ १८ ॥
श्री**देवसुंदराचार्य**संतानजव्रतीश्वरै(रैः) ।
वाच्यमानः सदा जीयात् पुस्तकः स्रस्तकल्मषः ॥ १९ ॥

३७३. कुसुममालावृत्ति by **म. हेमचन्द्र.** प. ३८४; ३१"×२½"

Colophon:—

ग्रंथाग्रं १३८६८ संवत् १३१३ वर्षे आश्विनसुदि १० शनौ **कुसुममाला**पुस्तकं समर्थितं । छ

Pras'asti of the Donor:—

॥ ६० । येन विश्वजयी जिग्ये लीलया विषमायुधः ।
स **वीरः** श्रेयसे भूयाद् भवतां भववारणः ॥ १ ॥
यो लक्ष्मीललनाविलासवसतिर्गांभीर्यसत्वाश्रयो
मर्यादासमलंकृतः प्रतिदिनं यो वल्लभानां पदं ।
चित्रं यज्जडसंगतो न हि सदा वैरस्य दाहप्रदः
सोयं **गूर्ज्जर**संज्ञको विजयते **वंशो**ऽतिसिंधुर्भुवि ॥ २ ॥
तस्मिन् वंशे विशदयशसा प्रोतविश्वान्तरालः
सद्भिर्मान्यः..................

३७४. धर्मसङ्ग्रहणीवृत्ति (अपूर्ण). प. १–२५०; ३४"×२"

Beginning:—

यथास्थिताशेषपदार्थसार्थप्रकाशनं शासनमद्वितीयं ।
कुतर्कसंपर्कविमूढचित्तप्रवाद्यधृष्यं जयताज्जिनानां ॥ १ ॥
ज्योतिर्ध्वस्ततमस्कांडं प्रकांडं वस्तुदेशिनां ।
बृहस्पत्यादिखद्योतोद्योतमार्तंडमंडलं ॥ २ ॥
श्री**वर्धमान**मानम्य प्रमाणं तत्त्वनिर्णये ।
धर्मसङ्ग्रहणेष्टीकामहमाधातुमुत्सहे ॥ ३ ॥

Colophon:—

संवत् १४४९.........There are ten verses of Pras'asti, but they are damaged.

धर्मसंग्रहणीवृत्तिर्य...धर्मामृतप्रपा ।

स्व–परांतरंगतृष्णोपशमार्थमलेख्यत ॥ १० ॥

पत्तने पुस्तकं लिखितं ।

३७५. (१) **ज्ञाताधर्मकथा** (मूल). प. ११९; ३५″×२¼″

(२) ,, **वृत्ति** by **अभयदेव.** प. १–१००

Colophon:—

ग्रंथाग्रं ९८३० संवत् १३८६ अश्विनवदि ४ सोमे लिखितमिदं पुस्तकं मंगलं महाश्रीः ॥

३७६. (१) **जम्बूद्वीपप्रज्ञप्ति** (मूल). प. १–९९; ३२″×२″

Colophon:—

जंबुद्दीवपण्णत्ति समाप्ता । शुभं भवतु ।

संवत् १४७८ वर्षे श्रावणसुदि ५ रवौ लिखितं श्रीमदणहिल्लपत्तने ।

(२) **जम्बूद्वीपचूर्णि.** प. १–४४

Colophon:—

जंबुद्दीवकरणाण **चुण्णी** सम्मत्ता । संवत् १४७९ मार्ग. व. ११

(३) **सूर्यप्रज्ञप्ति.** ग्रं. २२०० प. १–५०

(४) ,, **टीका** by **मलयगिरि.** प. १–२३७

Colophon:—

संवत् १४८१ वर्षे वैशाखशुदि ८ बुधे लिखितं श्रीमदणहिल्लपत्तने । शिवमस्तु ॥

३७७. **आवश्यकनिर्युक्तिवृत्ति** (त्रुटित जीर्ण). प. २५०; ३१½″×२″

Beginning:—

.....................मंदशक्तिरपि ।

आवश्यकनिर्युक्तिं **विवृणोमि** यथागमं स्पष्टं ॥

३७८. (१) **नन्दीसूत्र** (मूल). ग्रं. ७०० प. १–१५; ३१½″×२″

(२) ,, **टीका** by **मलयगिरि.** ग्रं. ७७३२ प. १६–२२६

Pras'asti same as No 367 "**अनुयोगद्वारवृत्ति**"

३७९. (१) **कल्पचूर्णि** (अपूर्ण त्रुटित). प. २–८१; ३२″×२½″

(२) **बृहत्कल्पभाष्य.** ग्रं. ६६००; प. २१–२०८

३८०. **सुपार्श्वनाथचरित्र** (प्रा०). by **लक्ष्मणगणि.**

प. २७५; ३२½″×२½″

३८१. धर्मसङ्ग्रहणीटीका by **मलयगिरि.** प. ३३९; ३१"×२"

Colophon:—

संवत् १४३७ वर्षे अश्विनवदि प्रतिपदतिथौ शनिवारे धर्मसंग्रहणी नाम ग्रंथस्य पुस्तकं लिखापितमस्ति ।

Pras'asti of the Donor:—

जैनत्वाव्यभिचारिभावसुभगाः सर्वेपि यस्मिञ्जना-
स्तस्मिन् धर्म-यशः-समृद्धिविशदे वंशे(**शो**)पकेशाह्वये ।
श्राद्धोभून्नरसिंह इत्यभिधया साधुः प्रसिद्धः सुधी-
स्तस्य प्रौढगुणा बभूव **न**यणादेवीति वित्ताप्रिया ॥ १ ॥

तयोरभूवंस्तनयास्त्रयोमी **मूं**जाल–**मा**ला–**म**हिपालसंज्ञाः ।
मालाभिधस्तेषु विशेषधर्मा खर्वीकृतद्रोहकमोहगर्वः ॥ २ ॥
पुण्याय पाणिग्रहे(हणे) निषेधी धीरः सुशीलोत्तमगेहमेधी ।
जिनेश्वरार्चादिविशिष्टनित्यानुष्ठाननिष्ठः सुकृतालिपुष्टः ॥ ३ ॥

साक्षात् तीर्थमिलातले सुविपुले **चां**द्रे कुले श्री**त**पा-
गच्छे व्योमविभूषणं वितमसस्तेजस्विनोर्केंदुवत् ।
श्रीगच्छाधिपपूज्यसद्गुरु**ज**यानंदाह्वयाः सूरयः
श्रीमंतो **गुरुदेवसुंदर** इति ख्याताश्च सूरीश्वराः ॥ ४ ॥

तेषां गुरूणामुपदेशयोगाद् दानं सदानंदरसानिदानं ।
विज्ञाय विज्ञो वपते[स्म] सप्तक्षेत्र्यां नयोपार्जितमात्मवित्तं ॥ ५ ॥
शास्त्रलेखनमिहापि हि सारं ज्ञानसत्रसदृशं यत एतत् ।
इत्यवेत्य विशदाशयवृत्ति**र्धर्मसंग्रहणिवृत्ति**मिमां च ॥ ६ ॥

साधु**मल्ल** इह लेखयति स्म **स्तं**भतीर्थनगरे गरिमाढ्ये ।
भूधराग्नि-जलधींदुमितांके वत्सरेश्वयुजि निर्मलपक्षे ॥ ७ ॥
सुराद्रिदंडस्थितिमिद्धतारामुक्तावलीकं वियदातपत्रं ।
श्रीसंघराजोपरि यावदास्ते सत्पुस्तकं नंदतु तावदेतत् ॥ ८ ॥

३८२. पुष्पमालावृत्ति (त्रुटित) by **म. हेमचन्द्र.**
प. १–३११; ३१"×२"

३८३. (१) जीवाभिगमसूत्र. ग्रं. ४७०० प. १–१२३

Colophon:—

मंगलं महाश्रीः । शुभं भवतु । छ । संवत् १४४४ वर्षे अश्विन वदि ८ बुधे ।

(२) **जीवाभिगमवृत्ति** by **मलयगिरि.**

(upto सप्तविधप्रतिपत्ति in fol. 351) प. १२४–३७१; ३३½"×२"

३८४. (१) **व्यवहारभाष्य.** प. १–१२७

(२) ,, **वृत्ति** (अपूर्ण). प. १–२७१; ३०"×२"

Colophon:—

संवत् १४७० वर्षे चैत्र वदि ३ तृतीयातिथौ वार रवि पुस्तकं लिखितं समाप्तं। सूत्र वृत्ति सर्वग्रंथ सहस्र एकत्र सूत्रांकः ।

३८५. उत्तराध्ययनलघुवृत्ति (सुखबोधा अपूर्ण) by **देवेन्द्र.**

प. ३५०; ३०"×२½"

Beginning:—

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ।
सिद्धांश्च सर्वसाधूंश्च स्तुत्वा च श्रुतदेवताम् ॥
आत्मस्मृतये वक्ष्ये जडमति–संक्षेपरुचिहितार्थं च ।
एकैकार्थनिबद्धां **वृत्तिं** सूत्रस्य **सुखबोधां** ॥
बह्वर्थाद् वृद्धकृताद् गंभीराद् **विवरणात्** समुद्धृत्य ।
अध्ययनानामुत्तरपूर्वाणामेकपाठगतां ॥
अर्थांतराणि पाठांतराणि सूत्रे च **वृद्धटीका**तः ।
बोद्धव्यानि यतोयं प्रारंभो गमनिकामात्रं ॥

३८६. उत्तराध्ययन (निर्युक्ति–चूर्णि–वृत्तिसहित प्रथमखण्ड).

प. ३०२; ३४"×२"

३८७. (१) **उत्तराध्ययन** (सूत्र). ग्रं. २०५६ प. १–४७ ले. सं. १४००

(२) ,, **वृत्ति** (सुखबोधा) by **देवेन्द्र.**

ग्रं. १२००० प. २७६; ३५"×२½"

Pras'asti of the Donor:—

नमः सर्वज्ञाय ।

सन्मर्यादो गभीरो घनरसनिचितः साधुपाठीनहेतु-
र्नित्यं लक्ष्म्या निवासः कुलधरनिलयः सद्वसुस्थानमुख्यैः ।
कुल्याधारो गरीयान् प्रचुरतरलसत्कोटिपात्रोपशोभी
वंशः **प्राग्वाट**पुंसां क्षितितलविदितो वर्तते सिंधुकल्पः ॥ १ ॥
तत्राभवद् देवगजोपमानः सलीलगामी बहुदानवर्षः ।
यो नामतः ख्यातिमितोऽर्थतश्च जने भृशं **शोभित** इत्युदात्तः ॥ २ ॥

पारिग्रहिकतां प्राप्तः स्थाने धान्येरकाह्वये ।
प्रजासु राजवर्गे च मान्यो मन्युविवर्जितः ॥ ३ ॥
सुदंती दंतिनीवाभूद् भार्या तस्येह रूक्मणी ।
सलीलगमना कामं सुवंशोन्नतिशालिनी ॥ ४ ॥
जातास्तयोस्ततनयात(स्त)नया विनयान्विताः ।
जनितानेकलोकार्थाः पुरुषार्था इव त्रयः ॥ ५ ॥
तत्राद्यो वीरचंद्राख्यो विख्यातो निर्मलैर्गुणैः ।
...तगुरु–देवासेवी वीरदेवाभिधोपरः ॥ ६ ॥
तृतीयः पूर्णपालः श्रीश्रेयसां भाजनं परं ।
यथाक्रममथामीषां भार्याः सच्चर्ययान्विताः ।
राजिनीप्रमुखाः सख्यं यासां साध्वीभिरायतं ॥ ७ ॥
पंचाथ पुत्रिका जाताः सुपवित्राश्च...... ।
पित्रोर्विनयकारिण्यो वरेण्यगुणराजिताः ॥ ८ ॥

तत्रादिमा बांधवलोकमान्या पैशुन्यशून्या दितमत्यु(न्यु)दैन्या ।
नाम्ना प्रतीता सरणीति धन्या यशोवता(दा)ता सुतरां वदान्या ॥ ९ ॥

प्रियवाक्यप्रयोगेन प्रीणिताखिलदेहिनः ।
पासडवणिजः पत्नी श्रावकस्य विवेकिनः ॥ १० ॥
द्वितीया मरुदेवीति गणिनी गुणशालिनी ।
ज्ञान–दर्शन–चारित्र[गुणत्र]यविभूषिता ॥ ११ ॥
तृतीया श्रितसंतोषा संतोषेति सुविश्रुता ।
यशोमतीरिति ख्याता तुर्या बहुयशोमतिः ॥ १२ ॥
विनयश्रीरिति ख्याता गणिनी पंचमी जने ।
मरुदेवीगणिन्यास्तु सदांतेवासिनी परा ॥ १३ ॥
यन्नैर्मल्यं निभाल्येवानन्यतुल्यं निशाकरः ।
लज्जितोंकस्थलेनांतः कालुष्यं बिभ्रते भृशं ॥ १४ ॥

अथान्यदा वाचमुवाच कर्ण त्सुश्र...(?) सरणी गुरूणां ।
यथा महार्था जिनभाषिता गीराराध्यमाना विनिहंति मोहं ॥ १५ ॥

निशम्य चैवं संजातबुद्धिर्जिनवरागमं ।
लेखयितुं सुतं पृष्ट्वा विमलचंद्रनामकं ॥ १६ ॥
द्वितीयं देवचंद्रं च धर्मसंबद्धचेतसं ।
तृतीयं च यशश्चंद्रं सुकृतन्यकृतांहसं ॥ १७ ॥

तैरेव कृतसाहाय्या धनदानेन भूयसा ।
भगिनीभिश्च **संतोष**प्रमुखाभिः सुखेच्छया ॥ १८ ॥
पुस्तकमेतदलीलिखदि**होत्तराध्ययन**सत्क**टीका**याः ।
प्रांजलपंक्तिविशिष्टं विविक्तरेखाक्षर**सोमं** ॥ १९ ॥
सूर्याचंद्रमसौ यावद् यावद् दीपः ससिंधवः ।
पठ्यमानो बुधैस्तावन्नंदत्वेष सुपुस्तकः ॥ २० ॥

३८८. उपदेशमालावृत्ति (कर्णिका) by **उदयप्रभ.**

त्रुटिता प. २५७; ३३$\frac{1}{2}$"×२$\frac{1}{2}$"

Beginning:—

अर्हं । **अर्ह**स्तनोतु भुवनाद्भुतकल्पवृक्षः श्रेयःफलं निविडबोधसुमप्रसूतं ।
यस्यांघ्रिमूलमभितः पतितप्रसूनप्रायाः सुरासुरनगाधिपसंपदोपि ॥ १ ॥
देवः स वः शतमुखप्रमुखामरौघकृप्तप्रथः **प्रथमतीर्थपतिः** पुनातु ।
मुक्तिक्रमो न.. ॥ २ ॥

....
.........यस्य कल्पतरवः सर्वेप्युपादानतां ।
नेत्थं चेत् कथमन्यथा वसुमतीमस्मिन्नलंकुर्वति
त्रैलोक्यैकगुरौ न गोचरममी जग्मुर्जगच्चक्षुषां ॥ ३ ॥
तुंगेभभीमममसितीव्रतरेण कर्म्मव्रातं व्रतेन विनिपात्य भवाटवीषु ।
मुक्तावलिश्रियमशिश्रियदात्म............................ ॥ ४ ॥

....
..................तंसेन हंसेन या ।
किंजल्कग्रसनप्रसक्तमन[स]स्तस्यैव हेतोः करे
कुर्वाणा कमलं सतां भवतु सा **ब्राह्मी** परब्रह्मणे ॥ ५ ॥
जीयाद् **विजयसेन**स्य प्रभोः प्रातिभदर्प्पणः ।
प्रतिबिंबितमात्मानं यत्र पश्यति भारती ॥ ६ ॥
संघस्याद्भुतपुण्यपण्यविपणौ सा मा.......................।
..........................पदेशपद्धतिरसौ सा प्रातराशायते ॥ ७ ॥
गाथास्ताः खलु **धर्मदासगणिनः** सज्जातरूपश्रियः
किं चैष स्फुरदर्थरत्ननिकरः **सिद्धर्षि**णैवार्पितः ।
तेनैतामतिवृत्तसंस्कृतमयीमातन्वतः **कर्णिकां**
वृत्तिं मेत्र सुवर्णकारपदवीसीमाश्रमश्रियतां ॥ ८ ॥

यतः.................................. ।
यथाविधिस्तबकघटनादुज्जृंभंते यशांसि तु शिल्पिनः ॥ ९ ॥

End: —

कलश(मठ)घनभृतांभोराशिसंवासिसर्प्पा-
धिपतिकलितमूर्तिर्नीलनालीककांतिः ।
सितरुचि–रविराजल्लोचनः केवलश्री-
परिचयचतुरात्मा श्रीजिनो वः श्रियेस्तु ॥ १ ॥
श्रीवर्धमानः शमिनां मनांसि जिनो धिनोतु त्रिपदी यदीया ।
व्याप्नोति विश्वं बलिघातकर्म्मजयोदिता विश्वमनश्वरश्रीः ॥ २ ॥
श्रीवीरशासनमहामहिमा गरिष्ठः श्रीभद्रबाहुविहिताचरणप्रतिष्ठः ।
काले कलावपि लुप्तघनाघसंघः श्रीमानयं विजयते यतिमूलसंघः ॥ ३ ॥
श्रीनागेंद्रकुले मुनींद्रसवितुः श्रीमन्महेंद्रप्रभोः
पट्टे पारगतागमोपनिषदां पारंगमग्रामणीः ।
देवः संयमदैवतं निरवधित्रैविद्यवागीश्वरः
संजज्ञे कलिकल्मषैरकलुषः श्रीशांतिसूरिर्गुरुः ॥ ४ ॥
शक्तिः कापि न कापिलस्य न नये नैयायिको नायक-
श्चार्वाकः परिपाकमुज्झितमतिर्बौद्धश्च नौद्धत्यभाक् ।
स्याद् वैशेषिकशेमुषी च विमुखी वादाय वेदांतिके
दांतिः केवलमस्य वक्तुरयते सीमां न मीमांसकः ॥ ५ ॥
तत्पट्टे प्रथमः शमिप्रभुरभूदानंदसूरिः परः
संजज्ञेऽमरचंद्रसूरिरखिलानूचानचूडामणिः ।
शश्वद् यस्य सरस्वतीप्रसरणे सिद्धेशितुः संसदि
प्राज्ञैश्चेतसि वेतसीतरुरसावाचार्यकं कार्यते ॥ ६ ॥
सिद्धांतोपनिषन्निषण्णहृदयो धीजन्मभूस्तत्पदे
पूज्यः श्रीहरिभद्रसूरिरभवच्चारित्रिणामग्रणीः ।
भ्रांत्वा शून्यमनाश्रयैरतिचिराद् यस्मिन्नवस्थानतः
संतुष्टैः **कलिकालगौतम** इति ख्यातिर्वितेने गुणैः ॥ ७ ॥
गुरुः श्रीहरिभद्रोयं लेभेधिकवयःस्थितिं ।
मोहद्रोहाय चारित्रनृपनासीरवीरतां ॥ ८ ॥
तत्पट्टे **विजयसेन**सूरयः पूरयंति कृतिनां मनोरथान् ।
तद्गवी वृषमसूत नूतना कामधेनुरिव सर्वकामदं ॥ ९ ॥

गर्वात् पूर्वमनादरैरवहितैः पश्चात् ततो विस्मितैः
प्रस्विन्नैरनु विस्मृतात्मभिरथो वादेनुवादे क्षणात् ।
भाग्यैर्मानिमनीषिणां परिणता पुंस्त्वेन वागेव इ-
त्याक्षिप्तैरथ सेव्यतेथ सहसा यः सादरं वादिभिः ॥ १० ॥

यस्योपदेशममृतोपमितं निपीय श्री**वस्तुपाल**सचिवेश्वर–**तेजपालौ** ।
संघाति(धि)पत्यमसमं **जिन**तीर्थतेजःसंवर्धनाञ्जितशतक्रतुस्तौ (?) ॥ ११ ॥

श्रीमद्**विजयसेन**स्य सौमनस्यं नमस्यत ।
यद्वासिता धृताः कैर्न गुणाः शिष्या सु(श्र ?ः स्व)मूर्धसु ? ॥ १२ ॥

शिष्यस्तस्य च लक्षणक्षणचणः साहित्यसौहित्यवा-
नुद्यत्तर्कवितर्ककर्कशमतिः सिद्धांतशुद्धातुरः ।
श्री**धर्माभ्युदये कविः** प्रविलसद्दुर्वादिगोत्रे पवि-
स्तामेता**मुदयप्रभा**ख्यगणभृद् **वृत्तिं** व्यधात **कर्णिकां** ॥ १३ ॥

तस्याज्ञया **विजयसेन**मुनीश्वरस्य
शिष्येण सेय**मुदयप्रभदेव**नाम्ना ।
योग्या विशेषविदुषा**मुपदेशमाला**–
वृत्तिः कथाप्रथनतोभिनवा वितेने ॥ १४ ॥

प्रथमादर्शे प्रथमानमानसो **देवबोध**विबुध इमां ।
स्थपतिरिव स्थापयिता गुरुपु नतोतनुत साहाय्यं ॥ १५ ॥

चांद्रे कुले कलशतः किल सूरि**देवानंदा**ग्रशिष्य**कनकप्रभ**सूरिनाम्नः ।
प्रद्युम्नसूरिरुदितः कवितासमुद्रमुष्टिंधयोंबुव**दशोधयदेष वृत्तिं** ॥ १६ ॥

उत्सेकतोत्सूत्रनिरूपणाद्यैर्याशातना स्यात् तनुतापि काचित् ।
मिथ्यास्तु मे दुष्कृतमत्र साक्षी श्रीसंघभट्टारक एव तीर्थं ॥ १७ ॥

एकैकेन विमोहशक्यचरणांश्छित्त्वा कषायानिमान्
दीप्ते भानु–कृशानुधामनि मनश्चैकेन हुत्वात्मनः ।
मंत्रस्याष्टशतैरितीह जपितैस्तैः पंचभिः सिद्धये
गाथाभिर्गुरुगुंफिता विजयते **जप्योपदेशावलिः** ॥ १८ ॥

कल्पाविःकिरणादितो **विवरणा**द् विज्ञाय विज्ञात्मना-
म्नायादु**पदेश**पद्धतिमिमामासेवमानो मुदा ।
लोकाग्रोपरिवर्तिनीमभिमुखीं कुर्वीत वीतान्यधी-
वृत्तिर्निर्वृतिदेवतां शिवपुरीसाम्राज्यकामः कृती ॥ १९ ॥

तत्त्वोदित्वरसप्तभूमिकमहाप्रासादराजांगणं
यावद् भाति जगद्गुरोर्भगवतः तीर्थेशितुः शासनं ।
तावच्छ्रावक–साधुधर्मविजयस्तंभद्वयालंबिनी
वृत्तिर्वंदनमालिका विजयतां तत्रोपदेशस्रजः ॥ २० ॥

सेयं पुरे धवलके नृपवीरवीरमंत्रीशपुण्यवसतौ वसतौ वसद्भिः ।
वर्षे ग्रह-ग्रह-रवौ कृतभार्कसंख्यैः श्लोकैर्विशेषविवृतिर्विहिताद्भुतश्रीः ॥२१

इत्याचार्यश्रीउदयप्रभदेवसंघटितायामुपदेशमालायाः कर्णिकायां विशेषवृत्तौ तृतीयः परिवेशः संपूर्णः । ग्रं. ३७१४ एतावता च संपूर्णा उपदेशमालायाः कर्णिकाख्या विशेषवृत्तिरिति ग्रंथ १२२७४ । छ । छ ॥

३८९. (१) चन्द्रप्रज्ञप्ति (मूल). प. १–४६; ३४½"×२½"

Colophon:—

संवत् १४८० वर्षे फागुणवदि ११ शनौ । ॐ श्रीसीमंधरस्वामिने नमः । छ । स्वस्ति श्रीः ॥

(२) चन्द्रप्रज्ञप्तिटीका by **मलयगिरि.** प. १–२७३

Beginning:—

वंदे यथास्थिताशेषपदार्थप्रविशासकं ।
नित्योदितं तमोस्पृष्टजैनं सिद्धांतभास्करं ॥ १ ॥
विजयंतां गुणगुरवो गुरवो जिनवचनभासनैकपराः ।
यद्वचनवशादहमपि जातो लेशेन पटुबुद्धिः ॥ २ ॥

End:—

चंद्रप्रज्ञप्तिमिमामतिगंभीरां विवृण्वता कुशलं ।
यदवापि मलयगिरिणा साधुजनस्तेन भवतु कृती ॥

इति श्रीमलयगिरिविरचिता चंद्रप्रज्ञप्तिटीका समाप्ता । मंगलं महाश्रीः । शुभं भवतु श्रीचतुर्विधसंघस्य ॥ ग्रंथाग्रं ९५००

Colophon:—

संवत् १४ आषाढादि ८१ वर्षे भाद्रपदवदि १ शनौ ।

Pras'asti of the Donor:—

ॐ नमः । श्रीश्रीमालकुले तेजा मंत्री वानूश्च तत्प्रिया ।
आसंस्तत्तनया मेला–मेघा–सेगाह्वयास्त्रयः ॥ १ ॥
तेषां डाही धर्मिणि कांऊनाह्वयः क्रमादिमाः पत्न्यः ।
मेलापुत्रा गोरा–सांईआ–रामदेव–चांगाख्याः ॥ २ ॥

इतश्च **मे**घादयिता धर्मिणिधर्मकर्मठा ।
घोघानगरवास्तव्यमंत्री**सिंघा**तनूद्भवा ॥ ३ ॥
कडुआ-**धां**गाबंधुप्रभृतिकुटुंबान्विता सुधर्मरता ।
श्रीमज्जैनेंद्रागमभक्तिभरोल्लसितचेतस्का ॥ ४ ॥
तपाधिपश्रीगुरु**सोमसुंदरो**पदेशत**स्त्र्यष्ट-दिगिंदु** १४८३ वत्सरे ।
अलीलिखत् स्वस्य हिताय **चंद्रप्रज्ञप्तिवृत्तिं** वरताडपुस्तके ॥ ५ ॥
श्रीरस्तु ।

३९०. आवश्यकनिर्युक्तिचूर्णि (प्रा०). प. ४०३; ३३"×२½"

Colophon:—

आवस्सगनिज्जुत्तिचुण्णी समत्ता । मंगलमस्तु ।

संवत् १३६७ वर्षे पोषशुदि सोमे **जं**घरालायां श्रा । **आ**वडप्रभृतिभिः......
.........श्रेयसे अष्टादशसहस्रप्रमाण**मा**वश्यकचूर्णिपुस्तकं नव्यं गृहीतं ॥

३९१. भगवतीविशेषवृत्ति by **अभयदेव.** प. ४३८; ३२"×२"

Colophon:—

संवत् १३१८ वर्षे पौषशुदि ९ शनौ श्री**म**रुकोटवास्तव्यसा० **ह**रियडसुत सा० **वि**(थि)रपाल तत्तनय......**वीर-ने**पाभ्यां कुटुंबश्रेयसे पितृष्वसा**रा**ल्हीश्रेयोर्थं इह **वामन**स्थले के......**भ**गवतीवृत्तिपुस्तकं लिपापितं ॥

३९२. त्रिषष्टि (दशम पर्व). प. १६८; ३३"×२½"

Colophon:—

संवत् १३७२ वर्षे मार्ग वदि १३ भौमे पुस्तकं लिखितमिदं ॥

३९३. विशेषावश्यकवृत्ति (द्वितीयखण्ड). प. ३१८; ३५"×२"

Beginning:—

उद्देसु निद्दिस्सइ पायं सामण्णओ etc.

Colophon:—

समस्त ग्रंथाग्रं २८००० शुभं भवतु । संवत् १४५३ वर्षे भाद्रपदवदि १४ गुरौ । **प्रा**ग्वाटज्ञातीयव्य० **आ**याभार्यया श्रा० **आ**सलदेव्या व्य० **अ**ाकाधर्मसीह-वाछा-देवादिपुत्रैः **सि**वादिपौत्रैश्च युतया **त**पागच्छनायकश्री**देवसुंदर**सूरिगुरूणामुपदेशेन श्री**पत्तने** सं. १४५३ वर्षे श्री**वि**शेषावश्यकद्वितीयखंडं लेखयति स्मेति भद्रं ॥

३९४. प्रमेयकमलमार्तण्ड (प्रथमखण्ड). प. २७८; ३६"×२"

Colophon:—

प्रमेयकमलमार्तंडः खंडः मं० **हीं**दाभार्याश्रा० **पीं**चूसत्कः ।

१९९. उपासकदशादिपञ्चाङ्गसूत्रवृत्ति by **अभयदेव.**

प. २२६; ३३"×२"

Colophon:—

पंचानामपि वृत्ति–सूत्र–सर्वाग्रं ११५६९

संवत् १४५५ वर्षे ज्येष्ठशुदि ३ गुरू पंचांगीसूत्र–वृत्तिपुस्तकं लेखयांचक्रे ।

श्रीकायस्थविशालवंशगगनानित्योत्र **जाना**भिधः
संजातः सचिवाग्रणीर्गुरुयशाः श्री**स्तंभ**तीर्थे पुरे ।
तत्सूनुर्लिखनक्रियैककुशलो **भीमा**भिधो मंत्रिराट्
तेनायं लिखितो बुधावलिमनःप्रीतिप्रदः पुस्तकः ॥ १ ॥
शुभं भवतु श्रीसंघभट्टारकस्य । छ । छ ॥

Pras'asti of the Donor:—

नमः श्रीसर्वज्ञाय ।

प्राग्वाटवंशमुकुटप्रकटप्रतिष्ठः श्रेष्ठी बभूव भुवि **लाषण** इत्यभिख्यः ।
शीतांशुरश्मिभरभासुरकीर्तिसारैर्यः सर्वतोपि धरणिं धवलीचकार ॥ १ ॥
एतत्पाणिगृहीती **साऊ**रिति विश्रुता विशदशीला ।
जिनवचनबद्धरंगा या गंगामनुकरोति निजचरितैः ॥ २ ॥
आल्हूरित्यभिधाना सकर्णजनवर्णनीयगुणनिवहा ।
अभवत् तयोस्तनूजा **जि**नादिपूजाविधानरता ॥ ३ ॥
तामुपयेमे सुकृती मंत्री वरो **वीर**मो विशदबुद्धिः ।
धीसखशतमखधीदा**चां**पलदेवीप्रसूततनुजन्मा ॥ ४ ॥
सत्पात्रदानसफलीकृतभूरिवित्ता श्रीधर्मकर्मकरणप्रवणैकचित्ता ।
या स्वैर्विशुद्धचरितैर्विदुषामदोषश्लाघास्पदं समजनिष्ट लसत्प्रतिष्ठा ॥ ५ ॥
श्रीम**त्त**पागणनभोंगणसूरसूरिश्री**देवसुंदर**गुरुप्रवरोपदेशं ।
श्रुत्वा सुधासममसीमगुणासमाना सा श्रावकाचरणचारुरताथ **आल्हू** ॥ ६ ॥
मत्वासारतरं धनं धनफलं लिप्सुर्निजश्रद्धया
वेदेषूदधि–शीतदीधिति १४५४ मिते संवत्सरे वैक्रमे ।
लक्ष्मीवैश्रवणातिशायिजनते श्री**स्तं**भतीर्थाभिधे
द्रंगेलीलिखदेतदद्भुततमं **पंचांगिका**पुस्तकं ॥ ७ ॥
आ चंद्रादित्यमेतद् विरचितचतुरानंदसंपद्विशेषं
संख्यावद्भिर्मुनींद्रैरहमहमिकया वाच्यमानं वितंद्रैः ।

भवदुःखातिरेकाकुलनिखिलजगज्जी[वजी]वातुकल्पं
श्रेयःश्रीहेतुभूतं प्रवचनमनघं जैनमेतच्च जीयात् ॥ ८ ॥

३९६. आवश्यकलघुवृत्ति by **तिलकाचार्य.** प. ३५९+१

ग्रंथसंख्या सर्वाग्रं १२३२५

Pras'asti of the Donor:—

उवसमपहाणयाए जेण सुगराण वि मणो हरियं॥ ७४॥
सुरगुरुसरिसमई वि हु जस्स समग्गे वि गुणगणे गहिउं।
नेय समत्थो किं पुण ते वोतुमहं खमो जिम्हो?॥ ७५॥

असरिसगुणाण राएण परवसीहूयमाणसो तह वि ।
तेसिं गुणमाहप्पं मणं पि कित्तेमि सत्तीए ॥ ७६ ॥
गरुयगुणे अणुसरणं कुणमाणे पासिऊण व पवन्नं ।
तुंगत्तणं सरीरेण जस्स अब्भुयं भुवणे ॥ ७७ ॥
रूवेण निज्जिउ व्व मयरद्धओ महासुभडो ।
नियडो न कयाइ वि जस्स संठिओ विट्ठिमविमुक्को ॥ ७८ ॥
निव्वाणत्थगिरिसिरतिरोहिए दिणयरम्मि व जिणिंदे ।
पुव्वमुणि-मयंकमहे लोगंतरपट्ठिए संते ॥ ७९ ॥
कलिकाल-निसापसरियपमाय-बलंधयारपडलेण ।
संजममग्गे पच्छाइयम्मि पाएण इह भरहे ॥ ८० ॥
जेण तव-नियम-संजमसमुज्जएणं महानिरीहेण ।
विप्फुरियं विमलमणिप्पइवकप्पेण...[पहु]त्तो ॥ ८१ ॥
तह कह वि अणुट्ठाणं मुक्ककसायं अणुट्ठियं जेण ।
परपक्ख-सपक्खेसु वि मणं पि जह होइ न विरोहो ॥ ८२ ॥
एगो य चोलपट्टो तह पच्छायणपडी वि एक्का य ।
नियपरिभोगे जस्सासि सव्वया अइनिरीहस्स ॥ ८३ ॥
देहे वत्थे सुयसा वि जस्स मलनिवहमुव्वहंतस्स ।
अब्भिंतरकम्म-मलो स व्भयभीउ व्व नीहरइ ॥ ८४ ॥
घयविगइं मोत्तूण पच्चक्खायाओ सेसविगईओ ।
सव्वाओ जेण जावजीवं रसगिद्धिरहिएणं ॥ ८५ ॥
निज्झरणकए कम्माण जेण दिणतइयजामसमयम्मि ।
गिम्हे भिक्खा भमिया पढमगुणट्ठाणियगिहेसु ॥ ८६ ॥
भिक्खाविणिग्गयं जं सोऊणं सावया निय-नियनिएएसु ।
होंति गिहेसुवउत्ता भिक्खादाणाहिलासेण ॥ ८७ ॥
जं नियगिहम्मि पयडागयमत्ता छउमदिट्ठिया वि नरा ।
आमणसेट्ठिपमुहा पडिलाभंति य सहत्थेण ॥ ८८ ॥
गामे वा नगरे वा सो कत्थइ जत्थ संठिओ जाव ।
ताव तमवंदिऊण न तत्थ पाए जणो भुत्तो ॥ ८९ ॥
सिरिवीरएवतणओ ठक्कुरसिरिजज्जउ सिरि जयपसिद्धो ।
गाउयपंचम(य)मज्झे अवंदिउं जं न भुंजंतो ॥ ९० ॥

अणहिल्लवाडयपुरे जायविऊसवे जिणाययणे ।
हक्कारिऊण नीए एक्कम्मि वि जम्मि तत्थ तओ ॥ ९१ ॥
गरुओ गरुयरो वि कुसेसो सावयजणो सयं चेव ।
जाइ अणाहूओ वि हु जस्स नमंसणकयपइन्नो ॥ ९२ ॥
मुत्ती वि जस्स सयला अमयरसेणेव निम्मिया विहिणा ।
तद्दंसणे वि नासइ जम्हा कसाय–विसं ॥ ९३ ॥
परतित्थीण वि दिट्ठो हिययं पल्हायए सदंसणओ ।
जो तेहिं वि मण्णिज्जइ निय–नियदेवावयारो व ॥ ९४ ॥
तं चिय सया वि वयणं मुह-कुहराओ विणिग्गयं जस्स ।
जम्मि निसुए जणाणं परमा मणनिव्वुई होइ ॥ ९५ ॥
अन्नोन्नगोट्ठिकलहो जेहिं रोसवसा कओ सावएहिं ।
जिणभवणगमणनियमो उवसंता ते वि जस्स गिरा ॥ ९६ ॥
कह वि कसायवसेणं सहोयरा भाउणो वि वट्टंता ।
अन्नोन्नमणालावे विगयकसाया कया जेण ॥ ९७ ॥
लद्धनरिंदपसाया थद्धा जे देवयाण वि पणामं ।
किच्चे(च्छे)ण ऊणं वा तह गुरुणो एगस्स नियगच्छे ॥ ९८ ॥
रायामच्चपमुहा निओगिणो ते वि जस्स वयणेण ।
सामन्नस्स वि मुणिणो मुक्कमया कमनया जाया ॥ ९९ ॥
गोवगिरिसिहरसंठियचरमजिणाययणदारमवरुद्धं ।
पुनिवदिन्नसासणसंसाधणिएहिं चिरकालं ॥ १०० ॥
गंतूण तत्थ भणिऊण भुवणपालाभिहाणभूवालं ।
अइसयपयत्तेणं मुक्कलयं कारियं जेण ॥ १०१ ॥
वरणगसुयं संतूयसचिवं भणिऊण भरुयच्छे ।
सिरिसंवलियाविहारे हेममया रोविया कलसा ॥ १०२ ॥
जेण जयसिंहदेवो राया भणिऊण सयलदेसम्मि ।
काराविओ अमारिं पज्जोसवणाइसु तिहीसु ॥ १०३ ॥ ९०० ॥
पुहईराएण सयंभरीनरिंदेण जस्स लेहेण ।
रणखंभउरजिणहरे चडाविया कणयकलसा ॥ ४ ॥
जेण कुणंतेण तवं चउत्थ-छट्ठं च उभयकाले वि ।
सद्धम्मदेसणा भविभवियणस्स न कया वि परिचत्ता ॥ ५ ॥

सावयलोओ कल्लाणएसु अट्ठाहियासु सविसेसं ।
गामेसु य नयरेसु य बहू पयट्टाविओ जेण ॥ ६ ॥
नियनाणेण केणइ तह वेमाणियसुरोवएसेण ।
परलोयगमणसमयं नियमं नाऊण आसन्नं ॥ ७ ॥
नीरोगम्मि वि देहे कमेण काऊण कवलपरिहारं ।
खविऊण सुहं सयलं जेण पवन्नो अभत्तट्ठो ॥ ८ ॥
जस्सुत्तिमट्ठगहणं सोऊणं गरुयखेयभरियमणा ।
परतित्थिया वि पइदिणमुवेंति पासे सयलनयणा ॥ ९ ॥
गुज्जरनरिंदनयरे सो को वि न अत्थि रायपभिइजणो ।
अणसणठियाण जो तेसिमागओ नेय पासम्मि ॥ १० ॥
सिरिसालिभद्दसूरिप्पमुहेहिं गभयगभयसूरीहिं ।
जस्स समीवे गंतूण सूरियं बहु ससोएहिं ॥ ११ ॥
मासम्मि भद्दवए [वट्टंते] तेरसम्मि उववासे ।
सोहियसावयवरभवणमज्झओ नीहरेऊण ॥ १२ ॥
पायथलेहिं लीलाए डंडहत्थेहिं अखलियगईहिं ।
कस्स वि अन्नस्स करे अविलग्गंतेहिं सयमेव ॥ १३ ॥
नरनाहमाणणिज्जो निवनयरनिवासिनेगमगणाण ।
सव्वेसिं पि पहाणो सगिहट्ठिओ सीयओ सेट्ठी ॥ १४ ॥
जस्स पय-पउमदंसणकयाहिलासो समाहिमलहंतो ।
दक्खिन्नमहोयहिणा परोवयारेक्करसिएण ॥ १५ ॥
गंतूण जेण वंदाविऊण विहिओ समाहिसंपन्नो ।
धम्मवए दंमाणं कराविओ वीससहस्साइं ॥ १६ ॥
गुज्जरदेसम्मि समग्गगाम-नगराइवासिसड्ढजणो ।
जस्सुत्तिमट्ठसवणे पाएण समागओ तत्थ ॥ १७ ॥
अह सग्गचालीसदिणाइं पालिऊणं समाहिणाणसणं ।
धम्मज्झाणपरायणचित्तो जो परभवं पत्तो ॥ १८ ॥
बहुभूमिग-बहुकलसं अणेगसियधयवडेहिं रमणिज्जं ।
वरसिरिखंडविणिम्मियविमाणमारोहिऊण तओ ॥ १९ ॥
निहारियं सरीरं जस्स बहिं सयलमिलियसंघेण ।
एक्केक्कं गिहरक्खगमणुयं मोत्तूण सेसजणो ॥ २० ॥

नीसेसो निवनयरस्स निग्गओ जस्स दंसणनिमित्तं ।
भत्तीए कोउगेण य मग्गेसु अलद्धसंचारो ॥ २१ ॥
सब्वए(प)मयाउलेहिं सव्वाओज्जेहिं बंदिहिं ।
सव्वेहिं वियंभियसद्दबहिरिए अंबराभोए ॥ २२ ॥
पायारपच्छिमट्टालए ठिओ परियणेण सह राया ।
जयसिंहो पेक्खंतो जस्सिड्ढिं नीहरंतस्स ॥ २३ ॥
तं अच्छरियं दट्ठुं नरिंदपुरिसा परोप्परं बेंति ।
मरणमणिट्ठं पि हु इट्ठं मन्नइ एइविभूईए ॥ २४ ॥
रविउदयाउ आरब्भ निग्गयं तं विमाणमवरन्हे ।
पत्तं सक्कारपए समणुपयं लोयकयपूयं ॥ २५ ॥
पूइज्जंते मिउपट्टंसुयपमुहपवरवत्थाणं ।
मिलियाइं कोडियाणं तया सयाइं अणेगाइं ॥ २६ ॥
सिरिखंडविमाणेणं तेणेव समं सरीरसक्कारो ।
जस्स कओ लोएणं तह उवरि पुणो वि खित्ताइं ॥ २७ ॥
कडा(ट्ठा)इं अगर–सिरिखंडसंतियाइं घणो घणसारो ।
निव्वाणाए चियाए जणेण गहिया उ तओ रक्खा ॥ २८ ॥
रक्खाए वि अभावे गहिया तट्ठाणमट्टिया तत्तो ।
ता जाव तत्थ जाया अनुमाणा वियडखड्डा ॥ २९ ॥
तीसे रक्खाए मट्टियाए अणुभावओ सिरोबाहा ।
वेलाजर–एगंतरजराइरोगा पणस्संते ॥ ३० ॥
भत्तिवसेणं न मए मणं पि इह भासियं मुसा किं पि ।
जं पच्चक्खं दिट्ठं तस्स वि लेसो इमो भणिओ ॥ ३१ ॥
नियतेयविसेसेणं पुरिसोत्तिमहिययरंजणो जाओ ।
कोत्थुहमणि व्व तत्तो सूरी सिरिहेमचंदो त्ति ॥ ३२ ॥
जगु(जुग)वट्टमाणपवयणपारगओ वयणसत्तिसंपन्नो ।
नियनामेव भगवई जीहग्गगया कया जेण ॥ ३३ ॥
मूलगंथि–विसेसावस्सय–लक्खण–पमाणपमुहाण ।
सेसाण वि गंथाणं पढियं जेण द्धलक्खं च ॥ ३४ ॥
रायामच्चाईण वि महिड्ढियाणं जणाण आएज्जे ।
जिणसासणप्पभावणपरायणो परमकारुणिओ ॥ ३५ ॥

नवजलहरगहिरसरे धम्मुवएसंति च दिंतए जम्मि ।
जिणभवणाओ बहिम्मि वि ट्ठिओ जणो सुणइ कुडसद्दं ॥ ३६ ॥
वक्खाणलद्धिजुत्ते जम्मि कुणंतम्मि सत्थवक्खाणं ।
पाएण जडमईण वि जणाण बोहो समुप्पन्नो ॥ ३७ ॥
उवमियभवप्पवंचा वेरग्गकरी कहा कप्पा ।
आसि वक्खाणयसिद्धेणं जा पुव्वं सा कठोर त्ति ॥ ३८ ॥
वक्खाणिया सहाए पाएण न केणई चिरं कालं ।
जस्स मुहनिग्गयत्था मुद्धाण वि सा तह कहं चि ॥ ३९ ॥
जाया हियग्गयत्था अब्भत्थेऊण तेहिं जह एसा ।
उवरुवरि तिन्नि वरिसे नियमुया तस्सेव य मुहाउ ॥ ४० ॥
तद्दिणपभिइ पयारो जाओ पाएण तीए सव्वत्थ ।
जे तेण सयं रइया गंथा ते संपइ कहेमि ॥ ४१ ॥
सुत्तमुवएसमाला—भवभावणपगरणाण काऊण ।
गंथसहस्सा चउदस तेरस वित्ती कया जेण ॥ ४२ ॥
अणुओगदाराणं जीवसमासस्स तह य सयगस्स ।
जेण च्छ सत्त चउरो गंथसहस्सा कया वित्ती ॥ ४३ ॥
मूलावस्सयवित्तीए उवरि रइयं च टिप्पणं जेण ।
पंचसहस्सपमाणं विसमट्ठाणावबोधयरं ॥ ४४ ॥
जेण विसेसावस्सयसुत्तस्सुवरिं सवित्थरा वित्ती ।
रइया परिप्फुडत्था अडवीससहस्सपरिमाणा ॥ ४५ ॥
वक्खाणगुणपसिद्धिं सोऊणं जस्स गुज्जरनरिंदो ।
जयसिंहदेवनामो कयगुणिजणमणचमक्कारो ॥ ४६ ॥
आगंतूण जिणमंदिरम्मि सयमेव सुणइ धम्मकहं ।
जस्सुवउत्तचित्तो सुइरं परिवारसंजुत्तो ॥ ४७ ॥
कइया वि जस्स दंसणउक्कंठियमाणसो सयं चेव ।
आगच्छइ वसहीए चिरकालं कुणइ संलावं ॥ ४८ ॥
अन्नम्मि दिणे अब्भत्थिऊण नेउं नियम्मि धवलहरे ।
सम्मुहमुट्ठिऊणं जयसिंहनिवेण जस्स सयं ॥ ४९ ॥
उद्धट्ठियस्स उल्लसियबहलपुलए कंचणमएण ।
विउलेण भायणेणं दुव्वा—फल—कुसुम—जलमइओ ॥ ५० ॥

अग्घो भमाडिऊणं थिरेण आरत्तियं व वारतियं ।
पक्खित्तो पयपुरओ कओ पणामो य पंचंगो ॥ ५१ ॥
थालपरिवेसायाउ आहाराउ सहत्थेण ।
दिन्नो नियइच्छाए चउविहो तेण आहारो ॥ ५२ ॥
भणियं च जोडिऊणं करजुयमज्जेव खलु कयत्थो हं ।
जाओ अज्जेव तहा कल्लाणपरंपराठाणं ॥ ५३ ॥
जस्स मह अज्ज भवणं तुब्भेहिं फरसियं सचरणेहिं ।
ता अज्ज वीरनाहो मज्झ सयं आगउ व्व गिहे ॥ ५४ ॥
जेण जयसिंहरायं भणिऊणं तस्स मंडले सयले ।
जिणमंदिरेसु कलसा चडाविया स(रु)इरकणयमया ॥ ५५ ॥
धंधुक्ष(क्क)य–सच्चउरप्पभिइसु ठाणेसु अन्नतित्थीहिं ।
जिणसासणस्स पीडा कीरंती रक्खिया जेण ॥ ५६ ॥
कारावियं च तह तेसु चेव अण्णे(ठाणे)सु रहपरिब्भमणं ।
निव्विग्घं जयसिंहं भणाविऊण पुहइनाहं ॥ ५७ ॥
कुनिओइएहिं तह जिणहरेसु भज्जंतदेवदायाण ।
काराविया निवारा जयसिंहनरिंदपासाउ ॥ ५८ ॥
भंडारपविट्ठं पि हु केसु वि(चि) ठाणेसु देवदायस्स ।
दव्वं जिणभवणेसुं पुणो वि अप्पावियं जेण ॥ ५९ ॥
किं बहुणा भणिएणं जिणसासणपरिभवम्मि जायंते ।
सव्वप्पणा वि तुलियं जेण उवायंतरसएहिं ॥ ६० ॥
जिणसासणकज्जाइं विसंसाहियाइं इह जेण ।
अन्नस्स मणम्मि वि फुरंति न हु जाइं कइया वि ॥ ६१ ॥
लिंगाविसेसमित्ते वि जइजणे परिभविज्जमाणम्मि ।
नियसत्तीए तत्ती जेण कया सव्वकालं पि ॥ ६२ ॥
अणहिल्लवाडनयराउ तित्थजत्ताए चलियसंघेण ।
अब्भत्थिऊण नीओ सहप्पणा जो महामहिमो ॥ ६३ ॥
सेज्जावलय–लंगडिपमुहाणं जत्थ सगडरूवाणं ।
एक्कारस उ सयाइं संचलियाइं............ ॥ ६४ ॥
हय–करह–वसह–वाहण–पयचराण त्थ व हुइ न संखा ।
वामणथलिनयरीए दिन्नावासम्मि संघेण ॥ ६५ ॥

वाडीविताणएहि गुरुरख(च)उखंडएहिं गुलिणीहिं ।
वियडे विरायमाणे निवखंधावारसारिच्छे ॥ ६६ ॥
कयकुंकुमंगरायं नियत्थ(च्छ)पट्टंसुयाइवरवत्थं ।
कंचण–रयणादिभूसियं अंगवंगेसु ॥ ६७ ॥
दट्ठूण सावयजणं जिणहरपरिहावणं पकुव्वंतं ।
खंगारस्स सुरट्ठापहुणो जायं मणं दुट्ठं ॥ ६८ ॥
अन्नेहिं वि सो भणिओ रायमनहिलवाडयस्स नयरस्स ।
चिट्ठइ लच्छी सव्वा इहागया तुज्झ पुन्नेहिं ॥ ६९ ॥
ता गिण्ह तुमं एयं भंडारो होइ तुह जहा पोढो ।
संभाविज्जइ ठाणं एक्काए दव्वकोडीए ॥ ७० ॥
लोभेण सो वि सव्वं तं गहिउं वंछए पुणो वि परं ।
सव्वयणमज्जायालोवअय[स]भीओ नियत्तेइ ॥ ७१ ॥
इय अकयनिच्छओ सो गहण–मोक्खे य संसइयचित्तो ।
चिंतूणं दिणमाणं संघं धारेइ तत्थेव ॥ ७२ ॥
भाणिज्जंतो वि दिणो वि सो संघो संतियजणस्स ।
नो देइ दंसणं अन्नया य सयणो मओ तस्स ॥ ७३ ॥
तो दिक्खणयमिसेणं जेण मुणिंदेण तत्थ गंतूण ।
पडिबोहिऊण एयं संघो मोयाविओ सद्धि ॥ ७४ ॥
उज्जयंत–सत्तुंजएसु तित्थेसु दोसु वि जिणिंदे ।
सिरिनेमि–उसहनाहे वंदइ संघो विभूईए ॥ ७५ ॥
तत्थुज्जयंततित्थे पारुत्थय अद्धलक्खमुप्पन्नं ।
सत्तुंजयम्मि तित्थे तीस सहस्सा समुप्पन्ना ॥ ७६ ॥
जाण पडिबोहिएणं भवियजणो भाविओ तह ।
धम्मो जिणभणिए पत्ते देसे सव्वे य विरईए ॥ ७७ ॥
पज्जंते सिं पि हु ठाणंतरसंकमाईयया नेय ।
आराहणा गुरूण व सत्त दिणा अणसणं नवरं ॥ ७८ ॥
नीहारणाइमहिम्म(मा) देहस्स तहेव जाव सकुसे ।
किं तु सयमेव राया सम...............यसे ॥ ७९ ॥
.........[विजय]सिंह–सिरिचंद–विबुहचंद त्ति ।
जाया तिन्नि गु(ग)णहरा सिरिसिरिचंदो तओ सूरी ॥ ८० ॥

देसेसु विहरमाणो कमेण धवलकय्यम्मि वरनयरे ।
संपत्तो तत्थ तओ भरुयच्छयनामजिणभवणे ॥ ८१ ॥
उत्तुंगम्मि विसाले रूवगरमणिज्जमंडवसणाहे ।
एसो मुणिसुव्वयजिणवरपडिमसमहिट्ठिए रम्मे ॥ ८२ ॥
सड्ढो अत्थि गुणड्ढो धवलो नामेण पोरुवाडकुले ।
तेण जिणचंदसूरिप्पमुहो संघो समग्गो ॥ ८३ ॥
मेलेउं विन्नत्तो सिरिमुणिसुव्वयजिणिंदचरिअस्स ।
करणत्थं संघेण वि सिरिचंदो पभणिओ सूरी ॥ ८४ ॥
सो तं संघाएसं पडिवज्जिउं विणिग्गओ तत्तो ।
आसावल्लिपुरीए आगंतूणं ठिओ गेहे ॥ ८५ ॥
सिरिमालकुलसमुब्भववरसावयसेट्ठिनागिलसुयाण ।
अवहरि-भंडसालिय-सरणयपमुहाण सगुणाण ॥ ८६ ॥
तत्थ ठिएण सिरिचंदसूरिणा विरइयं इमं चरियं ।
सिरिमुणिसुव्वयतित्थंकरस्स समयाणुसारेण ॥ ८७ ॥
जं किं पि इह अजुत्तं उत्तं मइमोहओ मए अत्थि ।
तं सुयहरा कयकिच्चा मज्झ विसोहंतु सव्वं पि ॥ ८८ ॥
पट्टि(ट्टि)य–पोत्थियलिहणे गणिणा कयमत्थ पासदेवेण ।
बहु साहेज्ज उज्जमपरेण वरमइनिहाणेण ॥ ८९ ॥
अवहरि–सरणयाणं कणिट्ठभाया तहेव जसराओ ।
साहेज्जकरो उच्छाहम्मय जाओ रि(वि)सेसेण ॥ ९० ॥
विक्कमकालाउ एगवाससहस्से सए सावणओ (?) ।
तव्वयणंतर दीवसव्वदिणम्मि एयं परिसमत्तं ॥ ९१ ॥
एत्थ य पढमं पुत्थइमभिलिहियं देवरायकरसिस्से ।
......म्मयवतणएण लेहएण विणीएण ॥ ९२ ॥
गाहाना(मा)णं संखाय जस्स दसहाति नव सयाइं च ।
चउणवइसमहियाइं नेयाइं एत्थ गंथम्मि ॥ ९३ ॥
वासे जाविह भारहम्मि विमले सव्वण्णुणो सासणं
हुज्जा भव्वजणोहमोहसमिसव्वरे समित्ता नाण सवसं ।

......मुणिसुव्वयस्स चरियं साणु नहु(गहा) साहुणो
वक्खाणंतु सुणंतु सव्वनिवहा एकग्गचित्ता सया ॥ १०९९४ ॥

श्रीश्रीचंद्रसूरिविरचितं श्रीमुनिसुव्रतस्वामिचरितं समाप्तम् ॥
शुभं भवतु ॥

[१०५] ८. (१) **पिण्डनिर्युक्तिवृत्ति.** प. १–१५७; ३१½"×२½"
(२) **ओघनिर्युक्तिवृत्ति.** प. १५८–३४६

Added in a later hand:—

श्रीज्ञानसागरसूरिगुरुभ्यो नमः ।

[९६] ९. **उत्तराध्ययनलघुवृत्ति** (सुखबोधा). प. २९२; ३३"×२½"

Colophon:—

संवत् १२२८ वर्षे मार्गसिरसुदि ३ भौमे

[८५] १०. **त्रिषष्टिश. पु. चरित** (अष्टमपर्व). कागद प. ८७; १९"×४"

Colophon:—

स क्षमेंदु-जलधि-क्षितिप्रमे वत्सरे सहजतो विचित्रिते ।
नेमिनाथचरितं ह्यददादसौ श्रीशशी स्वगुरवे विनेयकः ॥

संवत् १४२४ वर्षे मार्ग. सुदि ७ सप्तम्यां तिथौ अद्येह युवराजवाटके पुस्तकं श्रीनेमिनाथस्य अलेषि ॥ शुभं भवतु ॥

[८३] ११. (१) **उपदेशमालावृत्ति** by **रत्नप्रभसूरि.** का. प. २४७

End:—

इति रत्नप्रभसूरिविरचिताया[मुपदेशमालाया विशेषवृत्तौ] चतुर्थो विश्रामः॥६१३॥

नानारूपनरोत्तमैकवसतिर्नीरागतासंततिः(गतः)
पातालं परितः स्फुरन्निह बृहद्गच्छोऽस्ति [रत्नाकरः] ।
स श्रीम...बुधसूरिषु गुरुस्तत्राभवद् भूरिभिः
शाखाभिर्भुवि यः प्रयागवटवद् विस्तारमुद्रामगात् ॥
साहित्य–तर्कागम–लक्षणेषु यद्ग्रंथवीथी कविकामधेनुः ।
कस्योपकारं न चकार सम्यक् निःशेषदेशेषु च यद्विहारः ॥
शिष्यः श्रीमुनिचंद्रसूरिगुरुभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिः प्रभुः ।

[आस्थाने] जयसिंघदेवनृपते[र्येनास्तदिग्वाससा]
श्रीनिर्वाणसमर्थनेन विजयस्तंभः समुत्तंभितः ॥
तत्पट्टप्रभवोऽभवन् नवगुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरयः [शुचिधिय]स्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि संमदकृते वृत्तिर्विशेषार्थिनां ॥
श्रीदेवसूरिशिष्यभ्रातृणां विजयसेनसूरीणां ।
आदेशस्यानृणभावमगममेतावताहमिह ॥
यदियमुपदेशमाला श्रावकलोकस्य मूलसिद्धांतः ।
प्रायेण [पठति चायं] तदिहास्माभिः कृतो यत्नः ॥
व्याख्यातृचूडामणिसिद्धनाम्ना प्रायेण गाथार्थ इहाप्य(भ्य)धायि ।
क्वचित् क्वचिन्नानु विशेषरेखा सद्भिः स्वयं सा परिभावनीया ॥
यदिह किंचिदनागमिकं क्वचिद् विरचितं मतिमंदतया मया ।
तदखिलं सुधियः ! क्षमयामि वः कृतकृपाः परिशोधयतादरात् ॥
प्राप्य परस्य च सूत्राद् वृत्तिर्विस्तारिताथवा स्वीया ।
मणिखंडमंडलैरिव सुवर्णपूजा जिनेंद्राणां ॥
प्रकृता समर्थिता च श्रीवीरजिनाग्रतो भृगुपुरेऽसौ ।
अश्वावबोधतीर्थे श्रीसुव्रतपर्युपास्तिवशात् ॥
संशोधिता तथा श्रीभद्रेश्वरसूरिमुख्यविबुधवरैः ।
पुनरपि कंठकशुद्धिः कार्या वः प्रार्थये सर्वान् ॥
भास्वद्भास्करबिंबकांततिलकं प्रक्षिप्त......कृतं
निर्यन्नीलशिलातलांशुपटलीदुर्वारदूर्वांकुरं ।
यावन्मेरुमहीभृतं प्रति करोत्यारात्रिकोत्तारणं
ताराभिर्द्युविलासिनी विजयतां तावन्नवैषा कृतिः ॥
विक्रमाद् वसु-लोकार्के १२३८ वर्षे माघे समर्थिता ।
एकादश सहस्राणि सार्द्धं पंचशतं तथा ॥ ११५५० ॥

Colophon:—

संवत् १३५४ वर्षे कार्तिकसुदिप्रतिपदायां शुक्रे श्रीयुगादिचैत्यमंडिते मडवाड ग्रामे श्रीउपदेशमालावृत्तिः सुगुरुश्रीसर्वदेवसूरिवाचनक्रियायोग्या पं० अभयकलसे लिषिता ॥ शुभमस्तु ॥

[८४] (२) **शान्तिनाथचरित** by **अजितप्रभ.** प. १६६

Pras'asti of the Donor:—

विश्वसेनकुलोत्तंसोचिरादेवीतनूद्भवः ।
श्रीशांतिनाथो भगवान् दद्यान्मंगलमालिकां ॥ १ ॥

संघाधिपत्यादिपदप्रतिष्ठासमन्वितैर्भव्यजनैर्विशालः ।
दानादिपुण्योदयजन्मभूमिः श्रीमालवंशो विदितो जगत्यां ॥ २ ॥

बभूव तत्रांबुधितुल्यरूपे परोपकारादिगुणैः प्रसिद्धः ।
कल्पद्रुकल्पोर्थिजनस्य धीमान् रत्नाभिधानोपररत्नतुल्यः ॥ ३ ॥

सहजाकः सुतस्तस्य रेजे राजसभोचितः ।
धर्मकृत्यरतो नित्यं निजवंशविभूषणः ॥ ४ ॥

तस्यात्मजो धार्मिकचक्रचूडामणिः सुधाकारगिरां निवासः ।
सतां हि सेव्यः किल नागसिंहः कुलोदयायैव कृतावतारः ॥ ५ ॥

साह्लादना नाम तदंगनाभूत् साह्लादवक्त्रा गुरुदर्शनेन ।
यया चतुष्कं सुषुवे सुतानां स्ववंशभारोद्धरणैकधीरं ॥ ६ ॥

हरिराजो विवेकेन रराज हरिविक्रमः ।
स्थिरपालः स्थिरप्रेमा साधुवर्गे विशेषतः ॥ ७ ॥

प्रतापमल्लः सुभगः सद्दाक्षिण्यमहोदधिः ।
चतुर्भुजश्चतुर्धर्मसमाचारपरायणः ॥ ८ ॥

भगिनी सुगुणा नाम सद्गुणानां निकेतनं ।
लाखाकेन परीनि(णि)न्ये कमलेव मुरारिणा ॥ ९ ॥

तथा सलवणा नाम स्वसा लावण्यशालिनी ।
स्वकीयेन च शीलेन पवित्रितनिजान्वया ॥ १० ॥

श्रीपद्मप्रभसूरीणां स्वगुरूणां मुखांबुजे(जात्) ।
शुश्रावेति महाभक्ता श्राविका सुगुणा गिरं ॥ ११ ॥

जिनेंद्रबिंबं भवनं जिनस्य संघः स पूज्यश्च चतुःप्रकारः ।
सत्पुस्तकं तीर्थकरावदातविभूषितं यः कुरुते सुबुद्धिः ॥ १२ ॥

बोधिबीजं भवेत् तस्य निश्चलं च भवांतरे ।
केवलज्ञानलाभश्च ततो मोक्षसुखं पुनः ॥ १३ ॥

आकर्ण्य वाचं सुकृतैकबुद्धिः श्रीशांतिनाथस्य जिनेश्वरस्य ।
पुण्यावदातेन युतं गुरुभ्यो ददौ शुभं पुस्तकमुत्तमं सा ॥ १४ ॥

जंबूद्वीपांतरे यावच्चतुर्वनविराजितः ।
अर्हच्चैत्ययुतो मेरुस्तावन्नंदतु पुस्तकं ॥ १५ ॥

शुभं भवतु लेखक-पाठकयोः । मंगलं महाश्रीः ।

[१०३] १२. उपदेशमालावृत्ति by हेमचन्द्र. प. ३९८; ३२″×३″

Beginning:—

ओं नमो वीतरागाय ।

येन प्रबोधपरिनिर्मितवाग्वरत्रां क्षिप्त्वोद्धृतानि भवनानि भवांधकूपात् ।
निःशेषनाकिविभुवंदितपादपद्मो भूयान्ममाशुभभिदे स युगादिदेवः ॥ १ ॥
ज्ञेयार्णवं सुरवरैरिव यैः समंतात् सद्बोध-मंदरमथा प्रविमथ्य लब्धः ।
जीवादितत्त्ववररत्नचयो भवंतु ते वः श्रिये विजयिनो जिनवीरपादाः ॥ २ ॥
दर्पोद्धुरस्मरतिरस्करणप्रवीणा विश्वत्रयप्रथितनिर्म्मलकीर्त्तिभाजः ।
शेषा अपि प्रविकिरंतु जिना रजो वः सर्वामरप्रणतपावनपादपद्माः ॥ ३ ॥

वंदे पादद्वितयं भक्त्या श्रीगौतमादिसूरीणां ।
निःशेषशास्त्र-गंगाप्रवाह-हिमवद्गिरिनिभानां ॥ ४ ॥
पारं यस्याः प्रसादेन देहिनः श्रुत-नीरधेः ।
गच्छंति तां जगद्वंद्यां प्रणौमि श्रुतदेवतां ॥ ५ ॥
अस्मादृशोपि संजातः परेषां किल बोधकः ।
यत्प्रभावेन तान् वंदे स्वगुरूंस्तु विशेषतः ॥ ६ ॥
इत्थं कृतनमस्कारो नमस्कार्यं सवस्तुषु ।
प्रवक्ष्याम्यस्तविघ्नोर्थं प्रस्तुतं श्रुतनिश्रया ॥ ७ ॥
अंतरंगार्थगर्भं च यत् किंचिदिह वक्ष्यते ।
तत्रोपमितिग्रंथोक्ता नृणां सर्वापि भावना ॥ ८ ॥

End:—

जाव जिणसासणमिणं जाव य धम्मो जयम्मि विप्फुरइ ।
ताव पढिज्जउ एसा भव्वेहिं सया सुहत्थीहिं ॥

सुगमा । इति श्रीहेमचंद्रसूरिविरचितोपदेशमाला समाप्ता । ग्रंथाग्रं १४००० ।

Colophon:—

संवत् १४२५ वर्षे भाद्रपदवदि ५ भौमे पुष्पमालावृत्तिः संपूर्णा लिखिता । । ७ । स्वस्ति

ऊकेशवंशे श्राद्धधर्म्मधुरीणोरीणदानादिपुण्यकृत्यकरणनिपुणः ठ० पूनाभिधानः श्रावकपुंगवोभूत्। तत्पुत्रः पवित्रः ठ० धणपालस्य तस्य सहचारिणी सदाचारिणी पापप्रवेशवारणी ठ० धुंधलदेवीति जज्ञे। तत्कुक्षिसमुद्भवेनात्यद्भुतसुकृतप्रोद्भूतश्री-श्रीदेवताप्रसादसाधिताधिकतरसकलशुभकृत्यनिवहेन ठ० **मोषा**भिधेन श्राद्धवरेण पूज्यभट्टा० श्री**अभयसिंह**सूरिसद्व्याख्यामृतवृष्टिसमुत्पन्नभावनाकल्पवल्लीप्रभावात् श्रीपुष्पमालावृत्तिपुस्तकं स्वपित्रोः श्रेयोर्थमलेखयत् शुभवृद्धये वृद्धः पुत्रः ठ० **दे**पाल १ लघुर्धनपालनामाभूत्। ठ० **मो**पा। लघुभ्रातृषेताक आसीत्॥

[१२७] १३. (१) उत्तराध्ययन (मूल). प. १-५४; **३१"×२"**

(२) ,, टीका (त्रुटित) by **शान्तिसूरि.** प. ३६८

Colophon:—

संवत् १३४३ वर्षे लौकिककार्त्तिकशुदि २ रवावद्येह श्रीमदणहिल्लपाटके समस्त-राजावलीसमलंकृतमहाराजाधिराजश्रीमत्**सा**रंगदेवकल्याणविजयराज्ये तन्नियुक्तम-हामात्यश्री**म**धुसूदने श्रीश्रीकरणादिसमस्तमुद्राव्यापारान् परिपंथयति सतीत्येवं काले प्रवर्तमाने तेनैव नियुक्तमहंश्री**सो**मप्रतिपत्तौ **वी**जापुरे पुस्तकमिदं लेखक**सी**हाकेन लिखितमिति। यादृशं etc. संगलं महाश्रीः शुभं भवतु।

श्री**श्री**मालवंशे श्रे० **वू**हडिसुतश्रे० **ते**जाश्रेयोर्थं म......

[११२] १४. महावीरचरित(त्रि. श. पु. पर्व १०). प. २३२; २५"×२"

Pras'asti of the Donor:—

.........[सरस्वतीपदमसौ] सद्वृत्तमुक्तालयः।
[प्रौढश्री]कुलमंदिरं विजयते **को**रिंटगच्छांवुधि-
श्चित्रं यन्न जडाशयो न च परं कुग्राहसत्त्वाकुलः॥ १॥
सत्पत्रराजी शुभपर्वरम्यः स्था(छा)यी सुशाखी सरलः सुवर्णः।
सद्धर्मकर्मा क्षितिभृत्प्रतिष्ठवंशोस्ति वंशो भुवि धर्कटानां॥ २॥
श्रीमदूकेशवंशेस्मिन् स्वच्छमुक्ताफलोपमाः।
साधूनां हृदलंकारा बभूवुः पुरुपास्त्रयः॥ ३॥
आद्यो **दे**वधरस्तेपु दाने धाराधरः परः।
प्रीणिताशेषलोकोभून्न तु जातु जडान्वितः॥ ४॥

जिनालययशःसिद्धि-दान-पुण्यादिकर्मणां ।
समुद्धरणधौरेयो द्वितीयोभूत् समुद्धरः ॥ ५ ॥
दानादिगुणगणारामयशःकुसुमसौरभैः ।
वासिताशोऽपरो जात आशाधरस्तृतीयकः ॥ ६ ॥
समुद्धरस्य निर्माया जाया सौभाग्यशोभिनी ।
शोभिनीत्याख्यया जाता शीलालंकारधारिणी ॥ ७ ॥
धर्मद्रुमस्य मूलाभो जज्ञे मूल्लः सुतस्तयोः ।
पुत्री सरस्वती लील्ल् जातौ ब्राह्मी-श्रियाविव ॥ ८ ॥
गेहिनी मूल्लकस्यास्ति नाल्ही गंगेव देहिनी ।
तयो रत्नत्रयाधाराः पुत्राः संजज्ञिरे त्रयः ॥ ९ ॥
आद्यो वइराकनामा द्वितीयश्छाहडः सुधीः ।
सीहडस्तृतीयः ख्यातः पुमर्था मूर्तका इव ॥ १० ॥
पुत्रिकाश्च तयोस्तिस्रो जाताः शक्तित्रयोपमाः ।
चांपला कर्मी कर्पूरी सत्य-शील-दयान्विताः ॥ ११ ॥
वइराकस्य सद्भार्या नय-विनयगुणान्विता ।
विस्तिणिर्वस्तुतत्त्वज्ञा स्वजनानंददायिनी ॥ १२ ॥
तस्या जाताविमौ पुत्रौ धर्म-शीलपरायणौ ।
आद्यो मदन एवासौ द्वितीयः कर्मसिंहकः ॥ १३ ॥
अथाशाधरकांताभूत् खेतूः क्षेत्रं सुकर्मणां ।
लक्ष्मीधरस्तयोः पुत्रो लक्ष्मीव(ध)र इवापरः ॥ १४ ॥
रूपला रुक्मिणीवास्ति तस्य सद्धर्मचारिणी ।
तत्सुतो हरपालाख्यः च्छाड्ढ दक्षा च तत्सुता ॥ १५ ॥
एवं स्वकुटुंबयुतः साधुर्मूल्ल् स्वमातृश्रेयसे ।
श्रीमन्महावीरचरित्रं गृहीतं निजगुरुभिर्वाचयांचक्रे ॥ १६ ॥

तस्मिन् विस्मयकारिहारिचरितं कृष्णर्षिशिष्यः पुरा
चंचच्चंद्रकुलध्वजः समजनि श्रीनन्नसूरिः प्रभुः ।
उद्गीते दिवि किंनरैर्यदमलश्लोके सुरा धुन्वते
मूर्ध्नः कांचनकिंकिणीकवचितश्रोत्रं गजास्यं विना ॥ १७ ॥

Colophon:—

संवत् १३६८ वर्षे कोलापुर्यां श्रीमहावीरचरितं श्रीनन्नसूरिभिः सभाऽव्याख्यां व्याख्यातं श्रावकमूल्ल-वइरासत्कं ॥ छ ॥

[१०४] १५. **उपदेशकन्दलीवृत्ति** by **बालचन्द्रसूरि.**

प. २८४; ३२"×२½"

Beginning:—

यन्नाभी-नासिका-भ्रू-दृगलिक-मुख-हृत्-तालु-मौलि-श्रवस्तु
ध्यानस्थानेषु रुद्ध्वा निरवधि मरुतः पंच पश्यंति किंचित् ।
तस्माद् दृष्यत् यदंतः किमपि गुरुगिरा लक्ष्यते लक्ष्यरूपं
यत्तेजः सर्वतेजोमदकदनमहं प्रत्यहं तन्महेहं ॥ १ ॥
वसञ्शैवे मूर्ध्नि प्रतिदिशमुदस्ताखिलतमाः
क्षपायां तन्वानो रुचिमुपचितां शैत्यनिचितां ।
कलाशाली कामं कुवलयसमुल्लासरसिको
मृगांकः श्रीशांतिर्भवतु भवतांतिप्रशमनः ॥ २ ॥
धर्मे निर्मलभासि दासितसिताभीषुप्रभासंपदि
क्षीरक्षालननिस्तुषत्रिजगतीनेत्रभ्रमं बिभ्रति ।
यस्तारातुलनां महोत्पलमहः संदोहसंदेहकृद्-
देहश्रीरभजद् विभुः स भवतु श्रीपार्श्वनाथः श्रिये ॥ ३ ॥
कंदाद् विनिर्गत्य मृणालमूर्तिर्या ब्रह्मरंध्रांबुरुहे निलीना ।
सा योगिनां कुंडलिनीति नाम शक्तिः प्रसूते कविता-मधूनि ॥ ४ ॥
आत्महितहेतवेहं सोदर्यायां विवेकमंजर्याः ।
वक्ष्ये श्रुत-वन-मह्यां विवरणमुपदेशकंदल्यां ॥ ५ ॥

इह किल कलिकालगौतमश्रीमदभयदेवसूरिसुगुरूपदेशपरिशीलितसकलसर्वज्ञसिद्धांतसारः सारस्वतज्योतिरुद्योतमानकविताडंबरः विवेकमंजरीप्रकरणकरणप्रवणसुकृतसौरभवासितवसुंधरः बंधुरोपजातगृहमेधिगुणः प्रगुणसम्यक्त्वनिःसीमः श्रीमदासडकविः कविसभाशृंगार इत्यपरनामधेयः स्वश्रेयःसमुदयायोपदेशकंदलीप्रकरणचिकीः श्रीमंतमिहावसर्पिण्यामाद्यमर्हंतमभिष्टुवन् विहिताभीष्टसिद्धिप्रथामिमामादौ भावमंगलगाथामाह–

तिहुयणमंगलतिलयं कयदुज्जयभाववेरिभवविलयं ।
केवलसिरिकुलनिलयं रिसहं पणमामि मुणिवसहं ॥ १ ॥

End:—

अथ ग्रंथसमाप्तौ मंगलमाह—

रइयं पगरणमेयं जिणपवयणसारसंगहेण मए ।
सम्मं समत्तवियासडंबरं दिसउ भवियाण ॥ १२४ ॥

व्याख्या–एतत् प्रकरणं मया रचितं । केन कृत्वा ? जिणपवयणसारसंगहेण जिनानां प्रवचनं सिद्धांतस्तत्र सारभूतानां पंचानामपि व्रतानां चतुर्णां च धर्मांगानां दान–शील–तपो–भावनारूपाणामपरेषां च चतुर्णां क्षांति–मार्दवार्जव–संतोषाणां संग्रहः एकत्र मीलनं जिनप्रवचनसारसंग्रहः तेन । अन्यदपि प्रकरणमुत्सवो विवाहादिः सारसंग्रहेण द्रव्योच्चयेन क्रियत इत्युक्तिलेशः । किं करोतु ? दिसउ ददातु । कथं ? सम्मं सम्यक् । किं तत् ? संमत्तवियासडंबरं सम्यक्त्वस्य सुदेव–सुगुरु–सुधर्मप्रतिपत्तिरूपस्य विकाशाडंबरो विस्तरस्तं सम्यक्त्वविकाशाडंबरं । केभ्यः ? भवियाणं भव्येभ्यः भद्रकेभ्यः इति कवेरुक्तिः । वयं तु ब्रूमः–एतत् प्रकरणं भव्येभ्यः **आसडं आ**सडनामानं सुकविं वरं प्रधानं दिशतु कथयतु । यतः कवयः काव्यकीर्त्तनैरेव परां प्रसिद्धिमायांतीति । किंविशिष्टमिदं प्रकरणं ? सम्मत्तवि 'वी प्रजन[न]-कांत्यशन–खादनेषु' इत्यनेन सम्यक्त्वं वेति समुद्दीपयति अवगमयति वा सम्यक्त्ववि क्विपा सिद्धमिति ।

अथ प्रशस्तिगाथामाह—

सिरि**भि**ल्लमालनिम्मलकुलसंभव**क**डुयरायतणएण ।
एय **आस**डेण रइयं गुरूवएसाणुसारेण ॥ १२५ ॥

व्याख्या–इति पूर्वोक्त**मु**पदेशकंदलीनामधेयं प्रकरणं **आस**डेन रचितं रचनामानीतं । किंविशिष्टेन ? सिरि**भि**ल्लमालेति निर्मलं निर्दूषणं च तत् कुलं निर्मलकुलं श्रिया उपलक्षितं च तत् **भि**ल्लमालाख्यं निर्मलकुलं च तत् तथा तस्मात् संभवति श्री**भि**ल्लमालनिर्मलकुलसंभवः स चासौ **क**टुकराजस्तस्य तनयः पुत्रो यः स तथा तेन । तद् यथा—

श्री**भि**ल्लमालनामा हिमाद्रिरिव गोत्रशेषरो जयति ।
यस्य प्रजा महेशप्रिया न कैर्वर्ण्यतेऽपर्णा ? ॥ १ ॥

गंगाप्रवाह इव तत्र बभूव पुण्यभावोत्कटः **क**टुकराज इति प्रसिद्धः ।
यः सर्वदा **जि**नपदाश्रयणप्रवीणमाहात्म्यतः पदमदत्त भवस्य मूर्ध्नि ॥ २ ॥
अर्णोलतेति (**आ**नलदेवी) दयिताऽस्य बभूव सीता रेखास्पदं वसुमतीव सती बभौ या
व्योमावनीव च जिनत्रिपदीविविक्ता पुन्नागनंदनवती त्वमरावतीव ॥ ३ ॥

तयोरजनिषातां द्वौ सुता**वा**सड–**जा**सडौ ।
सत्पथं न व्यलंघेतां धुर्यौ धर्मरथस्य यौ ॥ ४ ॥
आसडः **का**लिदासस्य यशो–दीपमदीपयत् ।
मेघदूतमहाकाव्यटीकास्नेहनिषेचनात् ॥ ५ ॥

श्रुत्वा नवरसोद्गारकिरोऽस्य कवितागिरः ।
राजसभ्याः **कविसभाशृंगार** इति यं जगुः ॥ ६ ॥
जिनस्तोत्र-स्तुतीः पद्य-गद्यबंधैरनेकशः ।
चक्रे यः कर्म-कृष्णाहि-जांगुलीमंत्रसंनिभाः ॥ ७ ॥
विवेकमंजरीनामधेयप्रकरणच्छलात् ।
कल्याणसिद्धये येन कृता सिद्धरस-प्रपा ॥ ८ ॥

तेन सदा जिनगुणप्रगुणांतःकरणकशाऽनुशासितहृषीकावगडेन श्रीम**तासडेन** महाकविनेद**मुपदेशकंदली**प्रकरणं किं स्वमनीषया विरचितमित्याह-गुरूवएसाणु-सारेण गुरवोऽत्र श्रीम**द्**भयदेवसूरिनामानस्तेषामुपदेशा गुरूपदेशास्तेषामनुसारोऽनु-वादस्तेनेति संक्षेपार्थः । व्यासार्थस्तु प्रशस्तेरवसेयः । सा चेयम्—

श्री**वी**(वय)रसेन इति **व**ज्रमुनीश्वरस्य पट्टे बभूव दशपूर्वधरस्य पूर्वं ।
शाखा य एष जिनशासनकल्पवृक्ष-स्कंधो दिगंतरगतीः सुपुवे चतस्रः ॥ १ ॥
शाखांकुरा गणभृतोऽत्र बभूवुरेते **ना**गेंद्र इत्यमलकीर्ति-नदी-नगेंद्रः ।
चंद्रश्च सांद्रमतिभागथ **नि**र्वृतिश्च **वि**द्याधरश्च भुवि विश्रुतनामधेयः ॥ २ ॥
एतेषु **चं**द्र इति यः प्रबभूव सूरिस्तस्य प्रफुल्लगुणगुच्छ-वनस्य गच्छे ।
भूयांस एव भुवनत्रयवंदनीयाः संजज्ञिरे गणधरा गुणिनो धरायां ॥ ३ ॥
प्रद्युम्नसूरिरिति तेषु रतिप्रियेषुभेत्ता बभूव निखिलागमशास्त्रवेत्ता ।
येन प्रबोध्य **त**लपाटपुरे नरेंद्रमुत्पाटयां तलत एव कलिर्बभूव ॥ ४ ॥
श्री**चं**द्रगच्छ-नवकैरवकेलि-चंद्र**श्चं**द्रप्रभः प्रभुरभिज्ञतमस्ततोऽभूत् ।
यो विश्वलोकविदितं मुदितांतरात्मा प्राभातिकीं **जि**नपतिस्तुतिमाततान ॥ ५ ॥
तस्माद् **ध**नेश्वर इति श्रुतपारदृश्वा विश्वाभिरामचरितोऽभ्युदियाय सूरिः ।
यो मंत्रमाप गुरुतः सुरभूयभाजः प्राबोधयच्च **स**मयूपुरदेवतां यः ॥ ६ ॥
तस्याभितः समभवन् भुवनप्रशस्याः शिष्याः श्रुताक्षकमलोद्धरणप्रवीणाः ।
चत्वार ऊर्जितरुचो विदुषां निषेव्या देव्याः करा इव पुराणकविप्रसूतेः ॥ ७ ॥
श्री**वी**रभद्र इति सूरिरमीषु मुख्यः श्री**दे**वसूरिरिति भूरिगुणो द्वितीयः ।
श्री**दे**वभद्र इति सूरिवरस्तृतीयो **दे**वेंद्रसूरिरिति च प्रथितश्चतुर्थः ॥ ८ ॥
श्री**मं**डलीति नगरी नगरीतिक्लृप्तप्रासादसंहतिरितोऽस्त्यमरावतीव ।
देवेंद्रसूरिसुगुरुर्विततान तस्यां तद्वासिनां च हृदि मूर्ध्नि च वासलक्ष्मीं ॥ ९ ॥
प्रातिष्ठिपन्निजपदे स विनिद्रभद्रे **भ**द्रेश्वरं प्रभुमनश्वरकीर्तिपूरं ।
आख्यानमनंग इति संगतवान् यदीयध्यानानले मदनवन्मदनो विलीय ॥ १० ॥

तत्पट्टमौलिमणितामभजद् भवार्त्तिभीतात्मनामभयदोऽभयदेवसूरिः ।
पापातपापगममन्वहमातपत्रीभूयांगिनां शिरसि यस्य करश्चकार ॥ ११ ॥
तस्योपदेशपदपेशललेशमाप्य वारांमुचेव कियदेव पयः पयोधेः ।
श्री**आसडे**न कविना जनि**तोपदेशकंदल्य**सावसुमतामुपकारहेतोः ॥ १२ ॥

किं च । तत्पट्ट—पर्वतमलंकुरुते स्म कर्म—ज्यालावली—हरियुवा **हरिभद्र**सूरिः ।
भूम्रा यदीयचरणोपनतैरशोभि मुक्ताफलोज्ज्वलतमैर्जगती यशोभिः ॥ १३ ॥
शिष्यस्तस्य विभोर्नमस्यचरणांभोजस्य जज्ञे महा—
साहित्योपनिषन्नभोंगण—रविः श्री**बालचंद्रः** कविः ।
यं स्वप्नांतमुपेत्य तद्दृढतरानुध्यानतुष्टा जगौ
मत्पुत्रस्त्वमसीति शीतलगिरा देवी गिरामीश्वरी ॥ १४ ॥

इतश्च । **आसड**स्य मृडस्येव गौरी—गंगे बभूवतुः ।
पृथिवीदेवी—**जै**तल्लदेव्यौ द्वे तस्य वल्लभे ॥ १५ ॥
जैतल्लदेव्यां तनयावभूतां द्वावेतयो**रा**जडनामधेयः ।
ज्येष्ठोतिविद्वान् कवयोभिदध्युर्बाल्येपि यं **बालसरस्वती**ति ॥ १६ ॥
दुर्वृत्तानां शंकनीयः कनीयान् मंत्री जैत्रः सिंहव**ज्जैत्रसिंहः** ।
मुद्रा सव्या त्यागिनोऽस्यापसव्या चापव्यापाराद्भुतस्यापि हस्तं ॥ १७ ॥
अरिसिंह इति च **पृ**थिवीदेव्यां कर—पुष्करश्रवद्दानः ।
गुरुगिरिपरिणतकर्मा गज इव कलभोंगजः समभूत् ॥ १८ ॥
मंत्रिणो **जै**त्रसिंहस्य पत्नी **ज**ल्हणदेव्यसौ ।
त्रीनसूत सुतान् वेदानिव वाणी प्रजापतेः ॥ १९ ॥
आशापाल इति प्रसिद्धगरिमा तेषां गरीयानयं
मध्यश्च**आ**जय इत्यनुगुणाध्यात्मैकधन्याशयः ।
चक्रे **ज्ञा**नविलासकीर्त्तनमसौ शास्त्रं पुमर्थात्मकं
पुण्यात्माऽमृतपाल इत्यसमधीपात्रं तृतीयस्त्वयं ॥ २० ॥
अरिसिंहस्य त**था**ल्हणदेवीति निवीतकलुषा पत्नी ।
रत्नत्रयमिव जिनवागजीजनत् तनुजनित्रितयं ॥ २१ ॥
आशाधरस्तेषु सुधीरधीती समग्रशास्त्रेषु किलाग्रिमोऽस्ति ।
विमध्यमश्च**आ**ल्हणसिंहनामा प्रज्ञागरिष्ठोऽभयदः कनिष्ठः ॥ २२ ॥
इत्येवं स्वकुटुंबवर्गसहितेनाभ्यर्थितो मंत्रिणा
श्री**जै**त्रेण विवेकिना निजपितुः श्रेयःश्रियो वृद्धये ।

एतां वृत्तिमुवाच तत्कुलगुरुः श्रीबालचंद्राख्यया
विख्यातोऽधिपतिर्गणस्य गणिनीरत्नश्रियो धर्मजः ॥ २३ ॥
देवानंदमुनींदुगच्छ-गगनालंकार-शीतद्युतेः
शिष्यः श्रीकनकप्रभाख्यसुगुरोस्त्रैविद्यचूडामणेः ।
श्रीबालेंदुकवींद्रपाणिकमलोन्मीलत्प्रतिष्ठः सुधी-
रेतस्यां सहकारि कारणमभूत् प्रद्युम्नसूरिः पुनः ॥ २४ ॥
एतां शोधयति स्म विश्रुतबृहद्गच्छांबरश्रीशिरो-
रत्नं किं च धनेश्वरस्य सुगुरोः पट्टोदयाद्रौ रविः ।
छंदोलंकृति-तर्क-लक्षणचणः सिद्धांतशुद्धाशयः
साहित्योपचयप्रपंचनविभुः श्रीपद्मचंद्रः प्रभुः ॥ २५ ॥
उत्सूत्रं यदसूत्रि सूत्रविकलेनालक्षणं लक्षण-
न्यूनेन श्लथरीति रीतिरिपुणा व्यर्थं हतार्थेन च ।
किंचित् कापि वचो मया प्रलपितं स्वच्छंदमच्छंदसा
तच्छोध्यं विबुधैः परैरपि परं कृत्वा प्रसादं मयि ॥ २६ ॥
पूर्वाशा कुंकुमांभःसुभगमिव मुखं बिभ्रति भानुबिंबं
संध्यारागांशुकश्रीपरिचयरचनाभासुरा वासरादौ ।
आत्मानं पश्चिमाशाधृतशशि-मुकुरे पश्यतीवात्र यावत्
तावद् व्याख्यायमाना कृतिभिरतितरां वर्ततां वृत्तिरेषा ॥ २७ ॥

इत्याचार्यश्रीबालचंद्रविरचितायामुपदेशकंदलीवृत्तौ चतुःकषायविरतिविवरणं त्रयोदशो विश्रामः समाप्तः ॥

शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥ ग्रंथाग्रं ७६००

Colophon:—

संवत् १२९६ वर्षे फाल्गुणशुदि ९ शुक्रे समस्तराजावलीपूर्वं महाराजाधिराज-श्रीभीमदेवकल्याणविजयराज्ये तन्नियुक्तमहामात्यदंडश्रीताते श्रीश्रीकरणं परिपंथयतीत्येवं काले पुस्तकमिदं लिखितमिति ॥

[२१] १६. **कुमारपाल(जिनधर्म)प्रतिबोध** by **सोमप्रभाचार्य.**

ग्रं. ८८०० प. २५५; २१"×२"

Colophon—

संवत् १४५८ वर्षे द्वितीयभाद्रपदशुदि ४ तिथौ शुक्रे दिने श्रीस्तंभतीर्थे बृहत्पौषधशालायां भट्टा० श्रीजयतिलकसूरीणां उपदेशेन श्रीकुमारपालप्रतिबोधपुस्तकं लिखितमिदं । कायस्थज्ञातीयमहं मंडलिकसुतषेतालिखितं । चिरं नंदतु ७

उ० श्रीजयप्रभगणिस(शि)ष्य उ० श्रीजयमंदिरगणिस(शि)ष्यभट्टा० श्रीकल्याण-रत्नसूरिगुरुभ्यो नमः पं० व(वि)द्यारत्नगणि......

[११] १७. **उपदेशमालाविवरण.** प. २४६; २९½"×२"

Beginning:—

जिन-जैमिनि etc. **सिद्धर्षिकृता** वृत्तिः etc.

Colophon:—

संवत् १२७९ वर्षे आषाढशुदि ६ सोमे अद्येह श्रीवटपद्रके पंडि० **सोहलेन** ॥

[११०] १८. **योगशास्त्रविवरण** by **हेमाचार्य.**

ग्रं. १२३९४ प. ३१९; ३१"×२"

Colophon:—

संवत् १४९२ वर्षे पोषशु. २ गुरौ अद्येह श्रीदर्भावत्यां......

१९. **कथारत्नाकर.** अव्यवस्थित त्रुटित. ३०"×२¼"

२०. (१) **अनुत्तरोपपातिकवृत्ति** by **अभयदेव.** त्रुटित ३१"×२"

(२) **विपाकसूत्रवृत्ति** ,, ,, ,,

(३) **प्रश्नव्याकरणवृत्ति** ,, ,, ,,

(४) **कथारत्नकोश** (प्रा.). ,,

(५) **त्रिषष्टिश. पु. चरित्र** (पर्व ७–९). प. १–३२१; २५½"×२"

२१. (१) **उत्तराध्ययन.** प. १–१२; ३०"×२"

('दुगपत्तिय' अध्ययनपर्यन्तम्).

(२) ,, **निर्युक्ति** (Illustrated) प. १–१४

(३) ,, **वृत्ति.** प. १४–३६६

Beginning:—

नमोर्हते ।

शिवदाः संतु तीर्थेशा विघ्नसंतोपघातिनः ।
भव-कूपोद्धृतौ येषां वाग् वरत्रायते नृणां ॥

On the board:—

उत्तराध्ययनबृहद्वृत्ति–द्वितीयखंड

[११७] २२. **आवश्यकवृत्ति** (द्वितीयखण्ड) by **हरिभद्रसूरि.**

प. २७७; ३३½"×२¾"

Colophon:—

संवत् १४४२ वर्षे श्रीस्तंभतीर्थे पौषधशालायां **आवश्यकवृत्तिद्वितीयखंड**-पुस्तकं लेखितं ।

[१०६] २३. **शान्तिनाथचरित** (प्रा० सचित्र) by **देवचन्द्रसूरि.**
प. ३१३; ३०″×२½″

Beginning:—

॥ ६० ॥ नमः श्रीशांतिनाथाय ।

सरलंगुलि-दलपडलं णह-मणिकेसरं णर-सुरालिं ।
तेलोक्कसिरि-णिलयं जिणपहुपय-पंकयं णमह ॥
दोसासंग-विमुक्कं तम-रयरहियं सुवित्तमकलंकं ।
पयडियपउरपयत्थं णमामि **णाभेय**-वरसूरं ॥
नमिरसुरासुर-नरसिरकिरीडगुरुरयणकिरणकब्बुरियं ।
बहुदुरिय-दारु-परसुं वंदे सिरि**वीर**-कमजुयलं ॥
तिलोक्कविहियसंतिं तावियवरकणय-निघससमकंतिं ।
मय-मोह-विडवि-दंतिं वंदामि जिणेसरं **संतिं** ॥
दुव्वारमार-करिकरडवियडकुंभय[ड]पाडणपडिट्ठं ।
तव-खरणहरकरालं णमिमो **गुण**सूरि-खरणहरं ॥
कविराय-चक्कवट्टिं वंदे सिरिइंदभूइमुणिनाहं ।
जस्स जले तेल्लं पिव वाणी सव्वत्थ वित्थरइ ॥
वंदामि **भद्द**बाहुं जेण य अइरसियं बहुकहाकलियं ।
रइयं सवायलक्खं **चरियं वसुदेवराय**स्स ॥
वंदे सिरि**हरिभद्दं** सूरिं विउसयणणिग्गयपयावं ।
जेण य **कहा**पबंधो **समराइच्चो** विणिम्मविओ ॥
दक्खिन्नइंधसूरिं नमामि वरवण्णभासिया सगुणा ।
कुवलयमाल व म(सु)हा **कुवलयमाला** कहा जस्स ॥
पणमामि **सिद्ध**सूरिं महामतिं जेण सव्वजीवाण ।
पच्चक्खं पिव रइयं **भव**स्सरूवं **कहा**बंधे ॥
अण्णे वि एवमाई जयंतु सव्वे वि जे पहाणकइणो ।
[ना]मग्गहणेण वि जाणं होइ अम्हारिसो [पयडो] ॥
कह सुयणो वन्निज्जउ जो पेच्छंतो वि मंगुलं कव्वं ।
नियसहावेणं चिय न जंपए तग्गयं दोसं ॥
पत्थुयपबंधसमए वण्णिज्जइ कह णु दुज्जणो एत्थं ? ।
वण्णिज्जंतो वि न जो दुज्जणपयइं परिच्चयइ ॥

एवं कयप्पणामो उग्घाइयघोरविग्घसंघाओ ।
सिरि**संतिणाहचरियं** संतिकरं वण्णइस्सामि ॥
पंडिच्चपयडणत्थं ण चेव एयं अहं पवक्खामि ।
किं तु **जि**णणाह–संकह–भत्तिए परवसत्तणओ ॥
धम्मोवएसणत्थं च किंचि भव्वाण तहय संघस्स ।
संतिनिमित्तं च इमं पारद्धं मंदमइणा वि ॥
जह **भ**रहपुच्छिएणं कहियं सिरि**उ**सभसामिणा एयं ।
तत्तो कमेण कहियं जं जिणेहिं अन्नेहिं वि जहेव ॥
गोयममाईहिं तहा कहियं भव्वाण णुग्गहट्ठाए ।
तह किंचि अहं पि इमं वोच्छामि सुयाणुसारेण ॥ १८ ॥

End:—

एव इमो **सं**तिजिणेसरस्स **च**क्काउहेणं तु समन्नियस्स ।
भवो मए वारसमो वि सिट्ठो भव्वाण सव्वाण वि जो विसिट्ठो ॥१२६५५॥
इइ **सं**तिणाहचरिए वारसमभवग्गहणं सम्मत्तं ॥
कह वन्निउं समत्थो सिरि**सं**तिजिणेसरस्स भवगहणे? ।
जेण अहं छउमत्थो मंदमई तह य अच्चत्थं(न्तं) ॥ १ ॥
तहा य। बहुजोयणगंतव्वे मग्गे कह जाउ पंगुलो पुरिसो ? ।
कह वा वि हु दुम्मेहो पढउ असेसं पि सुयणाणं ॥ २ ॥
भूमिट्ठिओ वामणओ कह वा गिण्हइ फलाणि तालस्स ? ।
कह वा वि मंदचक्खू पेच्छेउ वरक्खरे सुहुमे? ॥ ३ ॥
कह वा वि उच्चकन्नो सुणेउ अइगुत्तमंतमंतणयं ? ।
कह वा वि बाहुतरओ जाउ महाजलहि–पारंमि ? ॥ ४ ॥
कह वा वि वायभग्गो देउ जणाणंदगाणि करणाणि ? ।
कह वा वि अप्पविज्जो वियरउ आयासमग्गेण ? ॥ ५ ॥
एय–समो अहयं पि हु वन्नेमि कहं नु **संतिजिण–चरियं** ?
अहवा वि भत्तिवसया मुणंति णो अत्तणो सत्तिं ॥ ६ ॥
जहा जलहिमज्झि पडिओ बिंदुं प्पउ लेइ अत्तणो पूरं ।
बहुभोज्जे वि हु पत्ते लेइ नरो उदरभरमेव ॥ ७ ॥
जह बहुतारे वि गहे गणइ सुगणओ वि तारए कइ वि ।
जह बहुदव्वे वि जए पेच्छइ थोवाणि छउमत्थो ॥ ८ ॥

जह वरवक्खाणे वि हु मंदमई सुणइ कइ वि हु पयत्थे ।
जह सामन्ननरेंदो किंची भुंजेइ भरहस्स ॥ ९ ॥
तह संतिणाह–चरिए अ–पमाणगुणे अणेगवुत्तंते ।
अच्चंतमंदमइणा मए वि किंची समक्खायं ॥ १० ॥
जो णियसत्तिवियलो उप्पाडइ गरुयभत्तिए भारं ।
हास–ट्ठाणं जायइ णियमा सो सत्तिजुत्ताणं ॥ ११ ॥
तह अहमवि मंदमई पयट्टमाणो इमंमि कव्वंमि ।
जाउ(ओ) विउसजणाणं हास–ट्ठाणं महमईणं ॥ १२ ॥
अहवा णहि णहि एयं हसइ न कइया वि सज्जणो अन्नं ।
जो हियमज्झ–कलुसो सो पर जइ दुज्जणो हसइ ॥ १३ ॥
तेणं न वन्नणिज्जो सुयणो इह होइ कव्वयाराण ।
पेच्छंतो वि हु दोसं गूहइ कव्वंमि जो अहियं ॥ १४ ॥
वन्नामि दुज्जणे चिय एक्कं इह जीवलोयमज्झंमि ।
जो लेइ पयत्तेणं दोसं कव्वाउ उच्चिणिउं ॥ १५ ॥
उच्चिय–दोसं कव्वं णिद्दोसं होइ तेण सो चेव ।
वन्नणजोगो जायइ कवीण उवयारिभावेण ॥ १६ ॥
अहवा वि हु किमणेणं सव्वाण वि पत्थणं करेमि अहं ।
अवणेत्तु सव्वदोसे एवं सोहेह मह कव्वं ॥ १७ ॥
एवं एय सम्मत्तं सुहयरचरियं संतिणाहस्स रम्मं
जुत्तं चक्काउहस्स वरगणवइणो संकहाए सुहाए ।
जीवाणं संतिहेउं दलियकलि–मल...चच्चं नंदिंद चंदं
सुव्वंतं निच्चकालं सिव–सुहजणयं [हो]इ जीवाण सम्मं ॥ १८ ॥
सम्मं सम्मत्तमूलं दुदसभवकयं सव्वकल्लाण–ठाणं
भव्वाणं सव्वमाणं ललियपयजुयं सिद्धिसोक्खेकहेउं ।
संतं संतिप्पउत्तं तिहुयणतिलयं वन्नणिज्जं बुहाणं
देवचंदोहवंदं कुणउ इह सया सव्वजीवाण संतिं ॥ १९ ॥
परिहरियसुदारो वज्जियासेसखारो धरियवयसुभारो दुक्खलक्खोहदारो ।
तव-सिरि-वरहारो दोस-चोरिक्क-चारो चरण-धणअपारो अंतरंगारि-मारो ॥ २० ॥
कयपवरविहारो चत्तसव्वाणयारो पणमिरसुर-वारो मोह-वल्ली-कुठारो ।
दुह-दव-जलकारो केवलन्नाणकारो कयबहुअणगारो भव्वलोउवयारो ॥ २ ॥

सियमय-सुवियारो पाव-पंकावहारो पयडियसिव-पारो दिन्नसग्गप्पयारो ।
भव-जलनिहि-तारो संति-सोक्खेककारो जयउ तिजग-सारो **संतिणाहो** सुतारो॥३॥७

अत्थि धरित्तीए इहं पइट्ठिओ पउमहत्थ–साहालो ।
सुमण–समणाहिवासो **को**डियगणणाम–पवरतरू ॥ १ ॥

तस्स **वइ**राभिहाणा साहा अच्चंतवित्थडा जा उ ।
तीए सिरिचंदकुलं कुसुमं व समुज्जलं सहइ ॥ २ ॥

तस्स य फलसारिच्छो समत्थसउणाण विहियउवयारो ।
खंति–रमणीए हारो णिच्चं चिय उज्जुयविहारो ॥ ३ ॥

णवमेहसरिससद्दो कोहाइकसायजणियउवमद्दो ।
आगामिपवरभद्दो सूरी णामेण **ज**सभद्दो ॥ ४ ॥

जेण व(च) णीरोगेण वि संलिहिऊणं दढं णियसरीरं ।
उज्जंतसेल–सिहरे चउव्विहाहारचाएण ॥ ५ ॥

सिरि**पुन्नतल्लगच्छु**ब्भवेण कयमणसणं विहाणेण ।
कलिकाले वि हु वट्टंतयंमि दिवसाइं तेरस उ ॥ ६ ॥

तस्स य सिरिपज्जुन्नो हयपज्जुन्नो असेसगुणपुन्नो ।
सीसो अइसुपसन्नो संजातो गन्नसमपुन्नो ॥ ७ ॥

सत्तमुहो सुइ-सुहओ वाइज्जंतो जणेण अणवरयं ।
ठाणयपगरणरूवो जस्स जए भमइ जस–पडहो ॥ ८ ॥

वायरण–तक्क–सिद्धंत–कव्व–लंकार–कणय–कसवट्टो ।
णिस्संबंधविहारी महीयले विहरिओ सययं ॥ ९ ॥

तस्स वि सीसो जातो सिरिगुणसेणो विसिट्ठगुण–सेणो ।
निद्दलिय–सयल–एणो जसेण जियजण्हवी–फेणो ॥ १० ॥

णिहयमयणादिदप्पो जेणं णिच्चं पि पालिओ कप्पो ।
जो संजमे अणप्पो भव–वइ–तरणंमि वरतप्पो ॥ ११ ॥

वक्खाण–चारुमयरंद–लंपडुप्पेहडेहिं अणवरयं ।
सोयारय–भमरेहिं सेविज्जइ जस्स पय–कमलं ॥ १२ ॥

खंभाइत्थपुरंमि जेणं विहिऊण*] अणसणं विहिणा ।
संलेहणाइपुव्वं लोयाण कओ चमक्कारो ॥

---

* पत्तनीयताडपत्रादर्शपुस्तकस्य ३१० तमपत्रस्थः पाठोऽस्पष्टः कृच्छ्रेण वाच्य इत्येतादृक् [ ] कोष्ठकान्तर्गतः पाठो वटपद्रीयप्राच्यविद्यामन्दिरसङ्गृहीतादर्शपुस्तकादुद्धृत्य संयोजितः ।

तस्स य सीसेण इमं अन्नंतं मंदबुद्धिविहवेण ।
सिरि**देवचंद**नामेण सूरिणा **जिण**–सुभत्तेण ॥
सिरि**संतिणाहचरियं** रइयं सिवसंग–चारुसोक्खत्थं ।
अन्नाण वि जीवाणं देउ सया संति–वरसोक्खं ॥
सिरि**खंभतित्थ**नयरे **जिण**–पूयण–थुणण–वंदणजुत्तो ।
सामाइयाइनिरओ लेहियबहुपोत्थयसमूहो ॥
सेट्ठिसद्धम्मजवो नामेणं आसि **वीहवो** पवरो ।
सयलगुणाण निहाणं धुरंधरो धम्मपुरिसाणं ॥
तस्स य तग्गुणजुत्तो पुत्तो **सिरिवच्छ**नामओ सेट्ठी ॥
तव्वसहीए ट्ठिएहिं रइयं सिरिदेवचंदेहिं ॥
आसदेवो य गणी **थिरचंद**गणी य दोन्नि वि सुसीसा ।
मज्झ सहाया जाया लिहमाणा पट्टियाईसु ॥
एक्कारसहिं सएहिं विक्कमसंवच्छराउ **सट्ठेहिं** ।
रइयं **खंभाइत्थे** रज्जे **जयसिंघ**रायस्स ॥
जो पढइ सुणइ वायइ वक्खाणइ पवरभत्तिसंजुत्तो ।
सो पावइ इह संतिं परंपराए हवइ मुत्तो ॥
जावच्चंदो दिणिंदो सयलजलहरा जाव भूवीढमेयं
जावद्देवाण सेलो वरसुरसरिया जाव सग्गा[प]वग्गा ।
ता एयं मच्चलोए सिवसुहजणयं सव्वजीवाण सम्मं
णिच्चं नंदेउ एत्थं सिरिवरचरियं **संतिणाहस्स** रम्मं ।
एकेक्कक्खरगणणाए गंथपमाणं विणिच्छियमिमस्स ।
बारस उ सहस्साइं सएण एक्केण अहियाइं ॥

अंकतोपि सहस्रं १२१०० ॥

Colophon:—

श्री**वि**जयचंद्रसूरिशिष्यश्री**य**शोभद्रसूरिशिष्यश्री**दे**वप्रभसूरीणां सत्कं पुस्तकं ॥

Pras'asti of the Donor:—

प्राप्तो गोत्राधिपत्वं रसभरविलसन्नंदनारामरम्यः
सर्वस्याशाप्रकाशी सकलसुमनसां सेवनीयः सदैव ।
नानाकल्पागमानामुपचयजनको राज–सम्मानभावं
प्राप्तः श्रीधर्कटानां प्रकटितगरिमा वंश–मेरुः समस्ति ॥ १ ॥

सच्छायः सरसः सपत्रनिचयः शाखा–प्रशाखांचितः
पीनस्कंधविराजितः प्रतिपदं संतापहारी सतां ।
चिंतागोचरचारि वस्तुविसरं दातुं समर्थोऽर्थिनां
तत्राजायत कल्पपादपसमः श्रीजावडः श्रावकः ॥ २ ॥
तस्याभवन्निखिलकल्मषदोषहीनास्तिस्रः प्रियास्त्रिपथगा इव पूरिताशाः ।
लोकत्रयप्रथितशीलयुतास्तथापि प्राप्ताः कदाचन न दीनपथातिथित्वं ॥ ३ ॥
जिनदेवी बभूवासामाद्या मधुरवादिनी ।
स्त्रैणोचितगुणोपेता जिनेंद्रपदपूजिका ॥ ४ ॥
राकासुधारश्मिसमानशीला शुद्धाशयानंदितदीनलोका ।
रूपश्रिया तर्जितकामकांता कांता द्वितीयाजनि सर्वदेवी ॥ ५ ॥
कुंदावदातद्युतिशीलशालिनी मातेव सर्वस्य जनस्य वत्सला ।
पूर्णा तथा पूर्णमनोरथस्थितिर्जाता तृतीया गृहिणी विवेकिनी ॥ ६ ॥
यः सर्वदा सर्वजनोपकारी गंभीर–धीरो जिनधर्मकारी ।
तं दुर्लभं दुर्लभमल्पपुण्यैः प्रासूत तत्र प्रथमा तनूजं ॥ ७ ॥
संजातौ भुवि विख्यातौ सर्वदेव्याः सुतावुभौ ।
उदयाचलचूलायाः सूर्या–चंद्रमसाविव ॥ ८ ॥
आद्यस्तयोः सज्जनचित्तहारी नयी विनीतः सकलोपकारी ।
जिनेंद्रपूजाविहितानुरागः साधुप्रियोऽजायत देवनागः ॥ ९ ॥
द्वितीयश्च गुणावासः सत्य–शौचसमन्वितः ।
कलावानुज्ज्वलो जातः कुल–कैरव–चंद्रमाः ॥ १० ॥
सूरेः श्रीजिनवल्लभस्य गणिनः पादप्रसादेन त–
ल्लब्धं येन विवेक–यानमसमं दुःप्रापमल्पाशयैः ।
येनाद्यापि सुखं सुखेन कृतिनः संसार–वारांनिधेः
पारं यांति परं निरस्तसकलक्लेशावकाशोदयाः ॥ ११ ॥
शिरसि नमनं यः साधूनां दृशोरतिशांततां
वदन–कमले सत्यां वाणीं श्रुतौ श्रवणं श्रुतेः ।
मनसि विमलं बोधं पाणौ धनस्य विसर्जनं
जिनगृहगतिं पादांभोजे चकार विभूषणं ॥ १२ ॥
प्रालेयशैलशिखरोज्ज्वलकांतिकांतश्रीनेमिनाथभुवनच्छलतश्च येन ।
मूर्त्तः स्वधर्म इव सर्वजनीयदातुराविष्कृतः सकललोकहितावहेन ॥ १३ ॥

चारित्राचरणैकधीरमनसो गीतार्थचूडामणेः
विद्यानां मणिदर्पणस्य शमिनः सेव्यस्य पुण्यार्थिभिः ।
यश्च श्रीमुनिचंद्रसूरिसुगुरोः पादांबुजं सेवितुं
वांछन् मत्सरवर्जितः सुरवधू-प्राणेश्वरत्वं गतः ॥ १४ ॥

निःसीमधर्म्मनिलयं कलितं सदर्थैः सद्वृत्तताविरहितं न कदाचनापि ।
ख्यातं जगत्रयमिवापदनंतसत्त्वं पूर्णा सुतत्रयमतीवगभीरमध्यं ॥ १५ ॥

लक्ष्मीविलासकलितो बलिदर्प्पहंता सत्यानुरागिहृदयो विधिपक्षपाती ।
लक्ष्मीधरः सुतवरोजनि तत्र मुख्यश्चित्रं तथापि न जनार्दनतामुपेतः ॥ १६ ॥

आराधितश्रीजिननेमिनाथः संपादितानंतखलप्रमाथः ।
आसीद् द्वितीयो धनदेवसंज्ञः सदा सदाचार-विचार-विज्ञः ॥ १७ ॥

यस्यासमान-फलकांतगुणाभिरामं संरुद्ध-रंध्रमविलाभिजल-प्रवेशं ।
सद्धीवरैरनुगतं मति-यानपात्रं गंभीरकार्य-जलधेः परभागमेति ॥ १८ ॥

विवेकिजनवल्लभः स्फटिकशैल-शुद्धाशयः
कलंकविकलः सदा सकललोकसंतोषदः ।
बभूव जिनपूजकः सुगुरुवंदकः श्रावक-
स्तृतीय इह नंदनः सुजननंदनः श्रीधरः ॥ १९ ॥

तत्रोज्झिलस्य समजायत धर्म्मपत्नी मंदाकिनीसलिल-निर्मलशीलयुक्ता ।
लक्ष्मीः समस्तजनवांछितदानदक्षा चित्रं न निर्गुणरता न चलस्वभावा ॥ २० ॥

उल्लासकाः सुमनसां विदितानुभावसंपादकाः समयिनां बहुलं फलानां ।
नित्यं निजक्रमयुता भुवनप्रसिद्धाः पुत्रास्तयो ऋतुसमाः षडिहोपजाताः ॥ २१ ॥

कारुण्य-रत्नांकुर-मेरुशैलः सौजन्य-पीयूष-रसांबुराशिः ।
आद्यः सुतोजायत वर्द्धमानस्तेषां कलाभिः परिवर्द्धमानः ॥ २२ ॥

अपारगांभीर्यनिवासभूमिर्विद्वत्-सुश्राद्धादिजनोपकारी ।
अनल्पलावण्ययुतो द्वितीयः पुत्रः पवित्रोऽजनि मूलदेवः ॥ २३ ॥

कीर्त्तेः पात्रं निजगुरुगिरां पालने लब्धलक्षः
स्थानं नीतेर्जनकनयनानंददायी सदैव ।
दूरीभूताखिलख......लो जातवान् पुत्ररत्नं
तार्त्तीयीकः कुशलवसुतावल्लभो रामदेवः ॥ २४ ॥

बभूव कारुण्यपरिग्रहाय कृताग्रहः कुग्रह-दर्प्पहंता ।
विपत्ति-संपत्तिसमानुरागी यशोधरो धीरिमधाम तुर्यः ॥ २५ ॥

जिनेंद्रपूजारचनानुबंधबद्धोद्यमो निर्मलकीर्त्तिशेषः ।
भक्त्या समासेवितसर्वदेवस्ततोनुजो जायत **स**र्व्वदेवः ॥ २६ ॥
मुक्ताफलारंभरतिर्नदीनो विश्रामभूमिः पुरुषोत्तमानां ।
पयोधिवन्नित्यगभीरभावः षष्ठस्तनूजोऽजनि **चा**पदेवः ॥ २७ ॥

तत्रासीद् **रा**मदेवस्य वल्लभा शीलशालिनी ।
आसदेवीति विख्याता सुरूपा **रू**पिकापरा ॥ २८ ॥
यशोधरस्य जाया च **थे**हिका हितकारिणी ।
शोभना **स**र्वदेवस्य **चा**पदेवस्य **शां**तिका ॥ २९ ॥

अस्ति स्म **थे**हड इति प्रथिताभिधानः कुंदावदातहृदयः सदयः सदैव ।
धीरो **य**शोधरसुतः कलितः कलाभिर्नित्यप्रशस्तचरितः प्रणतो गुरूणां ॥ ३० ॥
आनंदकः सुमनसां सततं सुधर्म्मबद्धादरः कृतविमानमनःप्रवृत्तिः ।
आस्ते महेंद्र इव वल्लभचित्रलेखः श्री**रा**मदेवतनयो विनयी महेंद्रः ॥ ३१ ॥

हरिचंद्राभिधानश्च द्वितीयोभूत् तनूद्भवः ।
वल्लभः सर्वलोकानां प्रतिपच्चंद्रमा इव ॥ ३२ ॥
विनयी नयसंवासो **चा**पदेवस्य नंदनः ।
गोसलाख्यः सुशीलोभूद् गुण–रत्न–महानिधिः ॥ ३३ ॥
आसीदाद्या **म**हेंद्रस्य महाश्रीरूपसप्रिया ।
राज्यश्रीः शील–कारुण्य–दानौचित्यादिशालिनी ॥ ३४ ॥
राज्यश्रियस्त्रयः पुत्रा **वी**सलोथ **य**शोभटः ।
बोचिस्थश्चेति संजाता गुण–रत्नौघ–रोहणाः ॥ ३५ ॥
राज्यश्रीरन्यदा तत्र शुद्धश्रद्धानबंधुरा ।
इत्येवं चिंतयामास निस्समानगुणोज्ज्वला ॥ ३६ ॥

प्राणा वायुमयाः स्वभावतरला लक्ष्मीः कटाक्षस्थिरा
स्वाम्यं बालविलंबितातनुशिलावस्थानदुःस्थं सदा ।
वातांदोलितदीप–कुड्मलदलप्रायः प्रियैः संगम–
स्तन्नास्तीह किमप्युदारमनसामाशाभिवेशास्पदं ॥ ३७ ॥
तल्लब्ध्वा मनुजेषु जन्म विमलं संप्राप्य देशादिकं
श्रुत्वा श्री**जि**नचंद्रवाचमुचितां श्रीमद्गुरूणां पुरः ।
स्वाधीने च धने च संगतवति स्वीये कुटुंबे सतां
युक्तो धर्म्मविधान एव सततं कर्तुं महानुद्यमः ॥ ३८ ॥

सम्यग्ज्ञानपुरःसरश्च महतां धर्म्मादरः संमतः
प्रायस्तच्च जिनागमादविकलं संजायते धीमतां ।
सर्वं लोकमवेक्ष्य शांतविशदप्रज्ञाप्रकर्षोद्यमं
काले सोपि कलौ न्यवेशि मुनिभिः संघोत्तमैः पुस्तके ॥ ३९ ॥

चारित्रभारचरणासहमानसेन पंचप्रकारविषयामिषलालसेन ।
पात्रादिदानमयधर्मवता तदेयं(तत्) लेख्यं परिग्रहवता गृहिणा तदेव ॥ ४० ॥

एवं विचिंत्य सुचिरं श्रेयोर्थं स्वस्य सांब(थ) राज्यश्रीः ।
श्रीशांतिनाथचरितस्य पुस्तकं लेखयामास ॥ ४१ ॥

विरचितविचित्ररेखं सुवर्णपत्रावलीकलितशोभं ।
यद् भाति करे विदुषां कंकणमिव कीलिकारम्यम् ॥ ४२ ॥

राकाशीतांशुशुभ्रः स्फुरदमलदशः सर्ववस्तुप्रकाशी
सम्यग्ज्ञान–प्रदीपस्त्रिभुवन–भवनाभ्यंतरे भासमानः ।
यावन्मोहांधकारं शमयति सकलं पूरिताशेषदोषं
तावन्नंद्यान्मुनींद्रैरयमिह सततं पुस्तकः पठ्यमानः ॥ ४३ ॥

[१२४] २४. (१) **निशीथसूत्र** (उ. १–५). प. १–७; ३२½″×२½″
(२) ,, **भाष्य.** प. १–७७
(३) ,, **चूर्णि.** प. १–३०४

Colophon:—

संवत् १३३० वर्षे वैशाखशुदि १४ गुरौ निशीथप्रथमखंडचूर्णीपुस्तकं लिखितमस्ति

[१२३] २५. (१) **बृहत्कल्पचूर्णि.** प. ३८४; ३३′×२″
(२) ,, **सूत्र.** ग्रं. ४७४ प. ३८५–३९३

Colophon:—

संवत् १२९१ वर्षे पौषसुदि ४ सोमे

On blank folio:—

श्रीज्ञानसागरसूरिभ्यो नमः ।

श्रीजयतिलकसूरि श्रीमाणिक्यसूरि ।

[१२२] २६. (१) **नवपदप्रकरणवृत्ति** (अपूर्ण). प. २३७; ३१″×२″
(२) ,, (मूल) by **देवगुप्त.** प. २३७–२८०

Colophon:—

नवपदवृत्तिपुस्तक सो० **ज**सवीरसुतश्रे० **ज**सदेव ग्रं. ९५०० लखित पत्र २८० पाठा २ दोरि १

[८९] २७. (१) **धर्मविधिवृत्ति.** [वस्त्रे] प. १–७९; २५″×५″

End:—

इति श्री**उ**दयसिंहाचार्यविरचिता उदयांकाष्टद्वारा श्री**ध**र्म्मविधिवृत्तिः समाप्ता । ग्रंथाग्रं ५५२० ।

Colophon:—

संवत् १४१८ वर्षे **ची**बाग्रामे श्री**न**रचंद्रसूरीणां शिष्येण श्री**र**त्नप्रभसूरीणां बांधवेन पंडित**गु**णभद्रेण **क**च्छूलीश्री**पा**र्श्वनाथगोष्ठिक**ली**ंबाभार्या **ग**उरी तत्पुत्रश्रावक **ज**सा **डूं**गर तद्भगिनी श्राविका **वी**झी **ती**ल्ही प्रभृत्येषां साहाय्येन प्रभुश्री**श्री**प्रभसूरिविरचितं धर्म्मविधिप्रकरणं श्री**उ**दयसिंहसूरिविरचितां वृत्तिं श्री**ध**र्मविधिग्रंथस्य कार्त्तिकवदि दशमीदिने गुरुवारे दिवसपाश्चात्यघटिकाद्वयसमये स्वपितृ-मात्रोः श्रेयसे श्री**ध**र्म्मविधिग्रंथमलिखत् ॥

Pras'asti of the Donor:—

जावालिदुर्गे नगरे प्रधाने बभूव पूर्वं **ध**णदेवनामा ।
सहजल्हदेवी दयिता तदीया **ब्र**ह्माक **लिं**बा तनयौ च तस्याः ॥ १ ॥
गौरदेवि दयिता प्रबभूव **लिं**बकस्य तनयः **क**डुसिंहः ।
तस्य च प्रियतमा **क**डुदेवी तस्य चैव समभूद् **ध**रणाकः ॥ २ ॥
ब्रह्माकपुत्रः प्रबभूव **झं**झणः **प्रा**ग्वाटवंशस्य शिरोमणिस्तु ।
आशाधरस्तस्य बभूव नंदनः पुत्रश्च तस्य प्रबभूव **गो**गिलः ॥ ३ ॥
गोगिलस्य तनयः प्रबभूव **प**द्मदेवसुकृती सुकृतज्ञः ।
तस्य चैव दयिता **सु**रलक्ष्मीर्जैनधर्मकरणैककोविदा ॥ ४ ॥
अमी जयंति तनया यस्याश्च जगतीतले ।
सुभटसिंहः **क्षे**मसिंहः **स्थि**रपालस्तथैव च ॥ ५ ॥
जाया **सु**भटसिंहस्य **सो**निका हेमवर्णिका ।
तस्याः सुता जयंत्युच्चैरेते विदितविक्रमाः ॥ ६ ॥
तेजाको **ज**यतश्चैव **ना**(जा)वड **पा**तलस्तथा ।
एताः पुत्र्यश्च यस्या हि **का**मी **ना**मल **चा**मिकाः ॥ ७ ॥
जाया **स्थ**विरपालस्य श्राविका **दे**दिकाभिधा ।
तस्याः सुताः षडेते च जयंति जगतीतले ॥ ८ ॥

नरपालश्च हापाकस्त्रिभुवनस्तु कालुकः ।
केल्हाकः पेथडश्चैव षडेते सुरसुंदराः ॥ ९ ॥
स्थविरपालस्य साहाज्ञा(ज्ञया)त् श्रीरत्नप्रभसूरिभिः ।
विशालाया धर्मविधेः पुस्तकं वाचितं वरं ॥ १० ॥ ७ ॥

(२)

॥ ६० ॥ कच्छूलिकामंडनपार्श्वनाथपादारविंदस्य मरालतुल्यः ।
प्राग्वाटवंशे भुवनावतंसे बभूव पूर्वं सहदेवनामा ॥ १ ॥
गुणचंद्रनामा तनयस्तदीयः श्रीवत्सनामा च तदंगजोऽभूत् ।
श्रीवत्सपुत्रा जगति प्रसिद्धा अमी बभूवुर्गुणराशिसंयुताः ॥ २ ॥
छाहडो निरुपमाकृति–रूपो धर्मकर्मनिपुणो यशोभटः ।
श्रीकुमारतनयस्तु तृतीयो वीतराग–गुरुपूजनापरः ॥ ३ ॥
छाहडस्य च शाखायां श्रीमाणिक्यप्रभसूरयः ।
गुरवश्च ततो जाताः श्रीकमलसिंघसूरयः ॥ ४ ॥
यशोभटस्य शाखायां श्रीश्रीप्रभसूरयः ।
वयं च गुरवो जाताः प्रज्ञातिलकसूरयः ॥ ५ ॥
श्रीकुमारेण च पुरा वृद्धग्रामे अचीकरत् ।
श्रीकमलसिंघसूरीणां पदस्थापनमुत्तमं ॥ ६ ॥
श्रीकुमारदयिता अभयश्रीः साल्हकस्तदनु बोडकाभिधः ।
साल्हकः सुगुरु–धर्मतत्परास्तस्य चैव तनयाः प्रबभूवुः ॥ ७ ॥
सोभाकस्य च जायाभून्नाम्ना अविधवा सदा ।
सोला–गदाकनामानौ बभूवतुः सुतौ तयोः ॥ ८ ॥
गदाकस्य च जायाभूत् प्रथमा रतनिकाभिधा ।
श्रियादेवी द्वितीया च मूर्ति(र्ता)लक्ष्मीरिवापरा ॥ ९ ॥
कर्मा–भीमाकनामानौ श्रियादेव्याश्च नंदनौ ।
भीमाकस्यैव दयिता रुक्मिणी रुक्मिणी परा ॥ १० ॥
रुक्मिण्याश्च त्रयः पुत्रा बभूवुर्धर्मकारकाः ।
लींबाकः सोहडश्चैव पेथाकश्च तृतीयकः ॥ ११ ॥
लींबाकभार्या गउरी प्रसिद्धा भक्तौ जिनेंद्रस्य जसाक–डूंगरौ ।
पुत्रौ द्वितीयौ तदनु प्रसिद्धौ पुन्यश्च तिस्रो भुवने हि यस्याः ॥ १२ ॥

वींझिका तदनु तील्हिका श्रियो जैनशासनसरोरुहभृंग्यः ।
पूर्ववंशगुरुभक्तितत्पराः शील-रत्नभरिता भुवि पुत्र्यः ॥ १३ ॥
व्याख्यापितं श्रीउपदेशमालासुपुस्तकं श्राविकया च विंझया ।
स्ववंशरत्नप्रभसूरिपार्श्वात् समर्थनं श्राद्धजसेन कारितं ॥ १४ ॥

(३)

प्राग्वाटवंशे प्रबभूव पूर्वं कच्छूलिकायां पुरि पार्श्वनामा ।
तदंगजो देसलनामधेयो बभूवतुस्तत्तनयौ प्रसिद्धौ ॥ १ ॥
बहुदेव-वीरचंद्रौ पुत्रौ जातौ मनोरमौ ।
वीरचंद्रस्य पुत्रोभून्मालकः पुण्यधारकः ॥ २ ॥
मालकस्य तनया मनोरमा आसको गुणधरोपि हि सांबः ।
वीरकः सुकृतकार्यहीरकः आसकस्य तनयश्च सोलकः ॥ ३ ॥
सोलकस्य दयिता सरस्वती पंच यस्य तनयाः प्रबभूवुः ।
माल्हणस्तदनु पार्श्वचंद्रमा बूटरोथ महिचंद्र-सेढकौ ॥ ४ ॥
सेढाकभार्या जमि(सि)णीतिनाम्नी तयोश्च पुत्राः पडमी प्रसिद्धाः ।
आद्यो बभौ राल्हणनामधेयस्ततो द्वितीयः किल सोहडाह्वः ॥ ५ ॥
आल्हणा पद्मकश्चैव ब्रह्माको बोडकस्तथा ।
बोडाकस्य च दयिता वीरी धर्मे प्रवीरधीः ॥ ६ ॥
चत्वारस्तनया यस्या बभूवुर्वसुधातले ।
देपालो देवसिंहश्च सोमाकः सलपोऽपि च ॥ ७ ॥

(२) त्रिषष्टिश. पु. चरित (पर्व ८, सर्ग ३). प. ८०-९२

[११५] २८. व्यवहारवृत्ति (द्वितीयखण्ड उ. ४-८). प. ३२४; २९"×२½"

[१२८] २९. आवश्यकवृत्ति (शिष्यहिता). प. २८७; ३१½"×२"
द्वितीयखण्ड प्रत्याख्याननिर्युक्तिविवरण.

[१०९] ३०. योगशास्त्रविवरण by हेमाचार्य. प. ३०८; ३१"×२½"

On the Board:—

योगशास्त्रवृत्तिपुस्तकं सं. १४०७ आषाढशुदि १० बुधे

[११८] ३१. समराइच्चकहा (प्रा.) by हरिभद्रसूरि.
प. ३५४; ३२"×२" ग्रं. १००००

Pras'asti of the Donor:—

परस्परपरिस्यूतनयगोचरचारिणी ।
अनेकांतामृतं दुग्धे यद्गवी तं जिनं स्तुमः ॥ १ ॥

अप्राप्तोऽपि हि खंडनां गुणवते धर्माय हिंस्रो न वा
छायाभिः प्रणिहंति तापमभितो मुक्तः सदा पल्लवैः ।
निश्छिद्रोपि करोति यः श्रुतिसुखं वंशः क्षमाभृद्घनो–
ल्लासी कोपि महीतले स जयति श्रीमालनामा नवः ॥ १ ॥

वंशेऽत्र तेजोद्भुतवृत्तशाली मुक्तामणिर्वोसरिसंज्ञकोभूत् ।
तस्थौ न केषां हृदये गुणेन निजेन यश्छिद्रविनाकृतोपि ॥ २ ॥

शचीव देवराजस्य रोहिणीव सितद्युतेः ।
सद्वासनेव धर्मस्य लक्ष्मीस्तस्य प्रियाऽभवत् ॥ ३ ॥

अचलस्थितिः कुरंगव्याघाती नरवरवृत्तिसंयुक्तः ।
सिंह इव वैरिसिंहः सुतः सुता चानयोर्मादूः ॥ ४ ॥

गेहिनी गेहनीतिज्ञा तस्य श्रीरिव देहिनी ।
अभूदानलदेवीति धर्मकर्मसु कर्मठा ॥ ५ ॥

असूत सा पंच सुतान् मनुष्यक्षेत्रस्य धात्रीव सुमेरुपर्वतान् ।
परं सदाप्येकमुखत्वमेषां केषां न रेखाकरमस्ति चित्ते ॥ ६ ॥

आद्योऽस्ति भांडशालिकमदनो लाडीपतिर्जिनप्रतिमाः ।
कारितवान् मंगलपुरचैत्ये पुण्याय पितृ–मात्रोः ॥ ७ ॥

प्रवरां वेलाकूले पोषधशालां च मातृपुण्याय ।
तनया विनयादिगुणोपेताः पंचास्य विद्यंते ॥ ८ ॥

क्षेमसिंह–भीमसिंहौ तेजसिंहारिसिंहकौ ।
पंचमो जयसिंहस्तु दुहिता जासलाभिधा ॥ ९ ॥

प्रथमोपि धर्मकार्ये द्वितीयीकस्तु[मन]लघुबंधुः ।
कलिकाल–मत्तकरि[वर]–वरसिंहो विजयसिंहोस्ति ॥ १० ॥

यथा प्रभा प्रभाभर्तुर्यथा चंद्रस्य चंद्रिका ।
यथा छाया शरीरस्य तथाशेषगुणाश्रया ॥ ११ ॥

पूनी दयिताऽस्योदयपालोदयमतसुता विरेजे या ।
निजवंश–प्रासादे विमलगुणा वैजयंतीव ॥ १२ ॥ युग्मं ॥

आद्योस्ति राजसिंहस्तनयो जैत्रसिंह इतरस्तु ।
नायकि–सहजल–सोहग–पद्मलनाम्न्यस्तु पुत्र्य इमाः ॥ १३ ॥

नयनाभ्यां मुखं पुष्पदंताभ्यां गगनं यथा ।
आभ्यां **विजयसिंहोपि** सुताभ्यां शोभते तथा ॥ १४ ॥
धर्मकर्मसु निष्णातस्तार्त्तीयीकस्तु **धंधलः** ।
वल्लभो **बकुलदे**व्यास्तुर्यो **वरणिगा**भिधः ॥ १५ ॥
राजलजनको जयतलदेविधवो **जाल्हण**स्तु पंचमकः ।
दधतापि येन लघुतां बंधुषु भेजे परं गुरुता ॥ १६ ॥
स्मरः शरैर्मानुषभूमिदेशः सुमेरुशैलैस्तनुरिंद्रियैर्यथा ।
पंडुस्तनुजैरिव **वैरिसिंहो** रेजे तथा पंचभिरेभिरंगजैः ॥ १७ ॥
इतश्च । श्रीमन्**म**हावीरजिनेंद्रतीर्थकल्पद्रुगच्छे इह **चंद्र**गच्छे ।
शब्दान्वितः सुंदरपक्षयुग्मो द्विरेफलीलामवलंबमानः ॥ १८ ॥

[१२०] **३२.** (१) **निशीथसूत्र.** प. १०; ३१"×२"

(२) ,, **भाष्य** (द्वितीयखण्ड उ. ८–१४).
प. ११–१०२

(३) ,, **चूर्णि.** प. १०३–४०५

[११४] **३३. धर्मोपदेशमालाविवरण** by **जयसिंह.** प. ३२०; ३३"×२"

[१३४] **३४.** (१) **योगशास्त्रविवरण.** प. १–१३; ३१½"×२¼"

(२) **बृहत्कल्पवृत्ति** (द्वितीयखण्ड). ग्रं. १४१६०*प. १–४२०

[१३१] **३५. आवश्यकवृत्ति** (प्रथम खण्ड) by **हरिभद्रसूरि.**
प. ४३६; ३४"×२¼"

Beginning:—

श्री**सिद्धार्थनरें**द्रविश्रुतकुल etc.

[१३५] **३६.** (१) **अनुयोगद्वारसूत्र.** प. १–४३; ३४"×२"

Colophon:—

संवत् १४५६ वर्षे श्री**स्तंभतीर्थे वृद्धपौषधशालायां तपागच्छीयभट्टारिकश्रीजय-
तिलकसूरि** तत्पट्टे श्रीरत्न(? **ज्ञान**)सागरसूरि तदुपदेशेन पुस्तकं लिखापितं ॥

(२) **अनुयोगद्वारचूर्णि.** प. ४४–२१८

* ७, ३–१९८ पत्राणि न सन्ति ।

Colophon:—

संवत् १४५६ वर्षे श्रीस्तंभतीर्थे बृहत्पौषधशालायां भट्टारिकश्रीजयतिलकसूरि अनुयोगद्वारचूर्णि उद्धार कारापित ॥

(३) **अनुयोगद्वारवृत्ति** by **म. हेमचन्द्र.** प. २१८–४३०

[१०७] **३७. विशेषावश्यकवृत्ति**(? प्रथमखण्ड). प. ३२८; ३१"×२"

Beginning:—

प्रणिपत्य जिनवरेंद्रं वीरं श्रुतदेवतां गुरून् साधून् etc.

[९२] **३८. महावीरचरित्र** (त्रिषष्टि. पर्व १०). प. १–२०३; २९"×२"

Pras'asti of the Donor:—

पल्लीवालकुले पुनात्मजो बोहित्थसंज्ञितः ।
साधुस्तस्य सुतो जज्ञे गणदेवः सुधार्मिकः ॥ १ ॥
खंडं तृतीयं संलेख्य त्रिषष्टेः पुस्तके वरं ।
ददौ पौषधशालायां स्तंभतीर्थे पुरे मुदा ॥ २ ॥
यावन्नंदति जिनमतमिदमसमं सकलसत्त्वहितकारि ।
तावत् सुपुस्तकं वाच्यमानमेतद् बुधैर्जयतु ॥ ३ ॥

३९. दशवैकालिकटीका by **हरिभद्रसूरि.** प. ४५३

[१११] **४०. उपदेशमालावृत्ति** by **सिद्धर्षि.** प. २८४; ३१"×२¼"

Beginning:—

हेयोपादेयार्थोपदेशभाभिः प्रबोधितजनाब्जं ।

End:—

विषं विनिर्धूय कुवासनामयं व्यधी(दी)धरद् यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनासुधां नतोस्मि तस्मै निजधर्मसूरये ॥
उत्सूत्रमत्र विवृतं मतिमांद्यदोषात् गांभीर्यभाजि वचने यदनंतकीर्तेः ।
संसार–सागरमनेन तरीतुकामं तत् साधुभिः कृतकृपैर्मयि शोधनीयं ॥
तोषाद् विधाय विवृतिं गिरिदे(गीर्दे)वतायाः पुण्यानुबंधकुशलं यदिदं मयाप्तं ।
सर्वोपि तेन भवतादुपदेशमालाप्रोक्तार्थसाधनपरः खलु जीवलोकः ॥

Colophon:—

उपदेशमालाविवरणं समाप्तं । ग्रंथाग्र ९५०० । मंगलं महाश्रीः शुभं भवतु लेखक–पाठकयोः । संवत् १३३१ वर्षे प्रथमज्येष्ठवदि १५ शनौ महं० अरिसिंह–पुस्तकं लिखितं । सा. सामन्तसीहपुस्तकं ॥

[१०१] ४१. **ऋषभचरित** (प्रा.) by **वर्धमानाचार्य.** 3 Illustrated.

प. २९९

Beginning:—

नमः सर्वज्ञाय ।

नमह जुगाइजिणिंदं पुरिसोत्तमनाहिसंभवं पयडं ।
वरनाण–दंसण–रविं सुगयमणंतं महादेवं ॥ १ ॥
एगमणेगसरूवं दुह्लक्खं परमजोगिपच्चक्खं ।
अच्चयमसंखमक्खयमोसप्पिणिपढमतित्थयरं ॥ २ ॥

End:—

विक्कमनिवकालाउ सएसु एक्कारसेसु सट्ठेसु ।
सिरिजयसिंहनरिंदे रज्जं परिपालयंतम्मि ॥
खंभाइत्थट्ठिएहिं सियपक्खे चित्तविजयदसमीए ।
पुस्सेणं सुरगुरुणो समत्थियं चरियमियं ति ॥
लोगुत्तमचरियमिणं काऊण जमज्जियं सुहं किं पि ।
उत्तमगुणाणुराओ भवे भवे तेण मह होज्ज ॥
पुव्वावरेण गणियस्स सव्वसंखा इमस्स गंथस्स ।
एक्कारस उ सहस्सा सलोगसंखाइ नायव्वा ॥

श्रीवर्धमानाचार्यविरचिते श्रीऋषभदेवचरिते पंचमोऽवसरः समाप्तः ।

Colophon:—

संवत् १२८९ वर्षे माघवदि ६ भौमावद्येह श्रीप्रह्लादनपुरे समस्तराजावलीसमलंकृतमहाराजाधिराजश्रीसोमसिंहदेवकल्याणविजयराज्ये श्रीऋषभदेवचरितं पंडि० धनचंद्रेण लिखितमिति । मंगलं महाश्रीरिति भद्रं ॥

Pras'asti of the Donor:—

हृद्यप्रोद्यदखर्वपर्वसुभगः सच्छाययाऽलंकृतः
सद्वृत्तोज्ज्वलमर्त्यमौक्तिकमणिर्भूभृत्प्रतिष्ठोन्नतः ।
प्रेंखत्पत्रपरिष्कृतः परिलसच्छाखावृतो गूर्जरः
श्रीमालाभिध इत्युदारचरितः ख्यातोऽस्ति वंशः क्षितौ ॥ १ ॥
वंशे तत्र बभूव मौक्तिकसमः सद्वृत्तशैत्याश्रितः
ख्यातो ल्लकभांडशालिक इति स्वच्छस्वभावान्वितः ।
चित्रं छिद्रसमुज्झितोऽपि नितरां भूत्वा गुणानां पदं
विश्वप्राणिहृदि व्यधत्त वसतिं यश्छद्मवंध्याशयः ॥ २ ॥

तस्याभूल्ललना नाम्ना लल्लिका भांडशालिनी ।
शील-मुक्तावली कंठे यया दध्रे समुज्ज्वला ॥ ३ ॥
संतस्तयोस्त्रयः पुत्राः पवित्राश्चरितैः शुभैः ।
अजायंतागारभारोद्धारधुर्यत्वविश्रुताः ॥ ४ ॥

तेषां जविष्ठोऽजनि भांडशाली ख्यातो गुणैर्लोलकनामधेयः ।
श्रीमज्जिनाज्ञाकरणप्रतिज्ञाविभूपणं वक्षसि यस्य य(ज)ज्ञे ॥ ५ ॥

शुद्धात्माजनि भांडशालिकयशश्चंद्राभिधानोऽपरः
श्रीमद्देव–गुरुप्रयोजनविधौ बद्धादरोऽनारतं ।
येनौदार्यगुणैरनर्गलतरैरावर्य(र्ज्य) विश्राणिता
पात्रेषु स्थिरताप्रवर्त्तनकृते लक्ष्मीर्मनःस्वीच्छया ॥ ६ ॥

ततोऽभवद् देवकुमारनामा सुतो गुणैर्देवकुमारमूर्त्तिः ।
प्रवर्त्तयन्निःकपटं जिनानां वर्यां सपर्यामवदातचित्तः ॥ ७ ॥

लोलाकस्याभवद् भांडशालिनो भांडशालिनी ।
लक्ष्मीरित्यभिधानेन जिनपूजापरायणा ॥ ८ ॥
भांडशालिनो द्वौ पुत्रौ लोलाकस्य बभूवतुः ।
धंधूकाभिधः प्रथमः श्रीमदाद्यजिनार्चकः ॥ ९ ॥
वाहिनी गेहिनी तस्य बभूव प्रियवादिनी ।
यशोवीरस्तयोः पुत्रः सुशीला सिंधुका सुता ॥ १० ॥

धर्मोच्छृंखलभांडशालिकयशश्चंद्रस्य दानप्रिया
नित्यौचित्य-विनीतताऽऽर्जवगुणालंकारशृंगारिता ।
वर्यौदार्यगुणैर्विवेकविशदैर्दूरं यया रंजिता
आत्मन्यप्रतिमप्रमोदपरतां नीताः समस्ता जनाः ॥ ११ ॥

सा जज्ञे गेहिनी नाम्ना जिंदिका भांडशालिनी ।
सुकृतोपार्जिका श्रीमद्देव--सद्गुरुपूजया ॥ १२ ॥
यशश्चंद्रस्य जज्ञाते द्वेऽपत्ये भांडशालिनः ।
स्वगृहश्रियः सीमंतमौक्तिकतिलकोपमे ॥ १३ ॥

आद्या पुत्री समजनि वरा राजिकानामधेया
मंदाकिन्युल्लसितलहरीशीलसंभूपितांगी ।
यस्या अंतःकरणमृदुतासंगतं जंतुजातं
लक्ष्मीः साक्षादिव निजगृहे जंगमा यावतीर्णा ॥ १४ ॥

ठक्कुरशोभनदेवस्तामथो परिणीतवान् ।
संतोषभूषिता जाता संतोषाख्या तयोः सुता ॥ १५ ॥
श्रीसर्वज्ञपदांबुजार्चनरतिः संप्राप्तपुण्योन्नतिः
किंचिन्मीलितमालतीदलभरस्वच्छेतिशीले मतिः ।
भक्त्यावेशसमुल्लसद्गुरुनतिर्विस्तीर्णदानस्थिति-
र्निश्छद्मैकतपोविधानवसतिर्यस्या गुणैः संगतिः ॥ १६ ॥
दाक्षिण्योदधिभांडशालिकयशश्चंद्रस्य पुत्रोपरो
धर्मोद्दामनराग्रणीरिह यशःपालाभिधः शुद्धधीः ।
पण्यस्यापि न केवलैव महती भांडस्य शाला कृता
श्रीआद्यं वरिवस्यतां जिनपतिं येनात्र धर्मस्य च ॥ १७ ॥
भांडशालियशःपालस्याभवज्जयदेविका ।
औदार्य-शीलप्रमुखैः प्रेयसी श्रेयसी गुणैः ॥ १८ ॥
अभवंस्तयोस्तनूजाः सच्चरितास्त्रयो गुणैः ।
आनंददायिनः पित्रोरन्योन्यं प्रीतिशालिनः ॥ १९ ॥
आद्यः सुतः संश्रितधर्म्मकर्म्मा विवेकवेश्माजनि पार्श्वदेवः ।
अभ्यर्थन............भीरुः प्रकल्पितश्रीजिननाथसेवः ॥ २० ॥
अन्यो बभूवांबडनामधेयः कस्याप्यसंपादितचित्तपीडः ।
स्वकीयसंतानधुराधुरीणः स्ववेश्मलक्ष्मीहृदयैकहारः ॥ २१ ॥
सर्वौचित्याचरणनिपुणः प्रीतिपूर्वोभिलापी
[मुखाजिन्यार्जितगुरुगुणः सिद्धिवेश्म ।
गोत्राचारो जिन-गुरुपदाभ्यर्चनप्रह्वचेता-]
स्तार्तीयीकस्तदनु तनुजः पल्हणाख्यो बभूव ॥ २२ ॥
पार्श्वदेवस्य संजज्ञे पद्मश्रीनामिका प्रिया ।
यस्याः पतिव्रतात्वेन स्वकुलं निर्मलीकृतं ॥ २३ ॥
अथांबडस्योचितकृत्यदक्षा मंदोदरी नाम बभूव पत्नी ।
स्फुरद्विवेकोज्वलसारहारा स्वमंदिरे मूर्त्तिमतीव लक्ष्मीः ॥ २४ ॥
हरेरिव भुजादंडाश्चत्वारस्तनयास्तयोः ।
अजायंत सदाचार-गृहभारधुरंधराः ॥ २५ ॥
प्रथमोजनिष्ट तेषां पार्श्वकुमाराभिधो गुणैः प्रथमः ।
विनयद्रुमालवालः पित्राज्ञापालनप्रवणः ॥ २६ ॥

बभूव प्रेयसी तस्य पृथ्वीदेवीति नामतः ।
विनीतविनया नित्यमौचित्यप्रियकारिणी ॥ २७ ॥

तदनु तनयो द्वितीयः समजनि धनसिंहनामको विनयी ।
निर्म्मलकलाकलापस्थैणक्रीडाद्रिरभिरामः ॥ २८ ॥

नाम्ना धांधलदेवीति संजज्ञे तस्य गेहिनी ।
पुण्यार्जनोर्जितश्लाघा श्लाघ्यकर्म्माभिरंजिका ॥ २९ ॥

ततस्तृतीयोजनि रत्नसिंहः संतापकारिव्यसनेभसिंहः ।
दूरं परित्यक्तविरुद्धसंगः श्रीमज्जिनेंद्रक्रम–पद्म–भृंगः ॥ ३० ॥

तस्याजनिष्ट दयिता नाम्ना राजलदेविका ।
पेथुकाख्या तयोः पुत्री समस्तानंददायिनी ॥ ३१ ॥

अनन्यसौजन्यजनानुकीर्णो विवेकलीलोज्ज्वलचित्तवृत्तिः ।
सार्वत्रिकौचित्यविधिप्रवीणो जज्ञे जगत्सिंहसुतश्चतुर्थः ॥ ३२ ॥

पत्नी जाल्हणदेवीति नाम्ना तस्य समजनि ।
कुत्राप्यनुत्सेकवती प्रदान–विनयान्विता ॥ ३३ ॥

सोलुकाख्या ततः पुत्री बभूव प्रियवादिनी ।
यस्याः शीलजलैः शुद्धैः पुण्यवल्ली प्रवर्द्धिता ॥ ३४ ॥

पत्नी ततोजायत पल्हणस्य माणिक्यमालास्फुरदंशु–शीला ।
जिनोपदेशश्रुति–कर्णसारा कृपा–प्रपा माणिकिनामधेया ॥ ३५ ॥

समजनि तयोस्तनूजो वरणिगनामा समस्तगुण–पात्रं ।
निखिलस्वकुलैकधुरा–धुरंधरः स्मित–मधुरभाषी ॥ ३६ ॥

बभूव प्रेयसी तस्य धनदेवीति विश्रुता ।
दाक्षिण्योज्ज्वलशीलेन सर्वेषां मोददायिनी ॥ ३७ ॥
अजायंत ततस्तिस्रः शीलालंकरणाः सुताः ।
कर्पूरदेवी–भोपलदेव्यौ वील्हणदेव्यपि ॥ ३८ ॥

अभूद् देवकुमारस्य प्रेयसी छड्डिकाभिधा ।
पतिव्रतासमाचार–चातुर्यार्जितसद्यशाः ॥ ३९ ॥
कुमारपालसुतोभूत् पितुराज्ञोद्यतस्तयोः ।
जिनशासनानुरागी विरागी दोषवस्तुषु ॥ ४० ॥
विवेक–रविरन्येद्युः स्फुरति स्मातिनिर्म्मलः ।
संतोषाया मानसाद्रौ विद्रावितनमस्ततिः ॥ ४१ ॥

घातत्रस्ततुरंगमांगतरलाः संपत्तयोत्यूर्जिता
लुभ्यल्लुब्धकविभ्यदर्भकमृगीदृक्-चंचलं यौवनं ।
बं[धु]प्रेम तडिल्लता-द्युति-चलं चैतत् तथा जीवितं
मत्वैवं **जि**नधर्म्मकर्म्मणि मतिः कार्या नरैः शाश्वते ॥ ४२ ॥
सोनंतसुखनिदानो धर्म्मोपि ज्ञायते श्रुतात् ।
श्रुतं च पुस्तकाधीनं तत् कार्यः पुस्तकोद्यमः ॥ ४३ ॥
पुस्तकं लेखयामास स्वसुः श्रेयोर्थ**मांबडः** ।
संतोषनाम्न्याः स्नेहेन **प**ल्हणभ्रातृसंयुतः ॥ ४४ ॥
प्रोद्यन् यावदसौ बिभर्त्ति तपनः प्राची-पुरंध्री-मुखे
कांतिव्यक्तदिशं सुवर्णतिलकश्रीसंनिभं विभ्रमं ।
श्री**ना**भेयजिनस्य चारु चरितं तावत् कथाश्चर्यकृत्
नंद्यादत्र विचार्यमाणमनघप्रज्ञैः सदा कोविदैः ॥ ४५ ॥

[११६] ४२. **आवश्यकचूर्णि** (प्रथम खण्ड). प. २६४; ३३"×२½"

[१२९] ४३. **बृहत्कल्पवृत्ति** (तृतीय खण्ड) by **क्षेमकीर्ति.** प. १-३३५; ३३"×२"

End:—

इति श्री**कल्पटीका**यां षष्ठ उद्देशकः समाप्तः ॥

नंदी-संदर्भ-मूले सुदृढतरमहापीठिका-स्कंधबंधे
तुंगादेशोर्ध्व-शाखे दलकुसुमसमैः सूत्र-निर्युक्ति-वाक्यैः ।
सांद्रे भाष्यार्थ-सार्थामृतफलकलिते **कल्प-**कल्पद्रुमेस्मि-
न्नाकृष्टुं षष्ठशाखा-फलनिवहमसावंकुटीवास्तु **टीका** ॥ ६ ॥

समाप्ता चेयं **सु**खावबोधा नाम **क**ल्पाध्ययनटीका ॥
सौवर्णा विविधार्थ-रत्नकलिता एते षडुद्देशकाः
श्री**क**ल्पेऽथ निधौ मताः सुकलशा दौर्गत्य-दुःखापहे ।
दृष्ट्वा **चू**र्णि-सुबीजकाक्षरततिं कुश्याथ गुर्वाज्ञया
खानं खानममी मया स्व-परयोरर्थे स्फुटार्थीकृताः ॥ १ ॥

श्री**कल्पसूत्र**ममृतं विबुधोपयोगयोग्यं जरा-मरण-दारुणदुःखहारि ।
येनोद्धृतं मति-मथा मथितात् श्रुताब्धेः श्री**भद्रबाहु**गुरवे प्रणतोऽस्मि तस्मै ॥२॥

येनेदं **क**ल्पसूत्रं कमलमुकुलवत् कोमलं मंजुलाभि-
र्गोभिर्दोषापहाभिः स्फुटविषयविभागस्य संदर्शिकाभिः ।

उत्फुल्लोद्देशपत्रं सुरसपरिमलोद्गारसारं वितेने
तं निःसंबंधबंधुं नुत मुनि–मधुपा! भास्करं **भाष्यकारं** ॥ ३ ॥
श्रीकल्पाध्ययनेऽस्मिन्नतिगंभीरार्थभाष्यपरिकलिते ।
विषमपद–विवरणकृते श्रीचूर्णिकृते नमः कृतिने ॥ ४ ॥
श्रुतदेवताप्रसादादिदमध्ययनं विवृण्वता कुशलं ।
यदवापि मया तेन प्राप्नुयां बोधिमहममलां ॥ ५ ॥
गम–नय–गभीरनीरश्चित्रोत्सर्गापवाद–वादोर्मिः ।
युक्तिशत–रत्नरम्यो जैनागम–जलनिधिर्जयति ॥ ६ ॥
श्रीजैनशासन–नभस्तल–तिग्मरश्मिः श्रीसद्म–चांद्रकुल–पद्मविकाशकारी ।
स्वज्योतिरावृतदिगंबरडंबरोऽभूत् श्रीमान् धनेश्वरगुरुः प्रथितः पृथिव्यां ॥ ७ ॥
श्रीमच्चैत्रपुरैकमंडनमहावीरप्रतिष्ठाकृत–
स्तस्माच्चित्रपुरप्रबोधतरणेः श्रीचैत्रगच्छोऽजनि ।
तत्र श्रीभुवनेंद्रसूरिसुगुरुर्भूभूषणं भासुर–
ज्योतिः सद्गुण–रत्न–रोहणगिरिः कालक्रमेणाभवत् ॥ ८ ॥
तत्पादांबुज–मंडनं समभवत् पक्षद्वयीशुद्धिमान्
नीर–क्षीरसदृक्षदूषण–गुण–त्याग–ग्रहैकव्रतः ।
कालुष्यं च जडोद्भवं परिहरन् दूरेण सन्मानस–
स्थायी राजमरालवद् गणिवरः श्रीदेवभद्रप्रभुः ॥ ९ ॥
शस्याः शिष्यास्त्रयस्तत्पद–सरसिरुहोत्संगशृंगार–भृंगा
विध्वस्तानंगभंगाः सुविहितविहितोत्तुंगरंगा बभूवुः ।
तत्राद्यः सच्चरित्रानुमतिकृतमतिः श्रीजगच्चंद्रसूरिः
श्रीमद्देवेंद्रसूरिः सरलतरलसच्चित्तवृत्तिर्द्वितीयः ॥ १० ॥
तृतीयशिष्याः श्रुत–वारि–वार्द्धयः परीषहाक्षोभ्यमनः–समाधयः ।
जयंति पूज्या विजयेंदुसूरयः परोपकारादिगुणौघभूरयः ॥ ११ ॥
प्रौढं मन्मथ–पार्थिवं त्रिजगतीजैत्रं विजित्येयुषां
येषां जैन–पुरे परेण महसा प्रक्रांतकांतोत्सवे ।
स्थैर्यं मेरुरगाधतां च जलधिः सर्वंसहत्वं मही
सोमः सौम्यमहर्पतिः किल महत् तेजोऽकृत प्राभृतं ॥ १२ ॥
वापं वापं प्रवचनवचो–बीजराजीं विनेय–
क्षेत्रव्राते सुपरिमलिते शब्दशास्त्रादि–सीरैः ।

यैः क्षेत्रज्ञैः शुचिगुरुजनाम्नायवाक्–सारणीभिः
सिक्त्वा तेने सुजनहृदयानंदि सज्ज्ञान–सस्यं ॥ १३ ॥
यैरप्रमत्तैः शुभमंत्रजापैर्वेतालमाधाय कलिं स्ववश्यं ।
अतुल्यकल्याणमयोत्तमार्थसत्पूरुषः सत्त्व–धनैरसाधि ॥ १४ ॥

किं बहुना ? । ज्योत्स्नामंजुलया यया धवलितं विश्वंभरामंडलं
या निःशेपविशेषविज्ञजनताचेतश्चमत्कारिणी ।
तस्यां श्रीविजयेंदुसूरिसुगुरोर्निष्कृत्रिमाया गुण–
श्रेणेः स्याद् यदि वास्तवस्तवकृतौ विज्ञः स वाचांपतिः ॥ १५ ॥

तत्पाणि–पंकज–रजःपरिपूतशीर्षाः शिष्यास्त्रयो दधति संप्रति गच्छभारं ।
श्रीवज्रसेन इति सद्गुरुरादिमोत्र श्रीपद्मचंद्रसुगुरुस्तु ततो द्वितीयः ॥ १६ ॥
तार्तीयीकस्तेषां विनेयपरमाणुरनणुशास्त्रेऽस्मिन् ।
श्रीक्षेमकीर्त्तिसूरिर्विनिर्ममे विवृतिमल्पमतिः ॥ १७ ॥
श्रीविक्रमतः क्रामति नयनाग्नि–गुणेंदुपरिमिते वर्षे ।
ज्येष्ठश्वेतदशम्यां समर्थितैषा च हस्तार्के ॥ १८ ॥
प्रथमादर्शे लिखिता नयप्रभप्रभृतिभिर्यतिभिरेषा ।
गुरुतरगुरुभक्तिभरोद्वहनादिव नम्रितशिरोभिः ॥ १९ ॥

इह च । सूत्रादर्शेषु यतो भूयस्यो वाचना विलोक्यंते ।
विषमाश्च भाष्यगाथाः प्रायः स्वल्पाश्च चूर्णिगिरः ॥ २० ॥
ततः–सूत्रे वा भाष्ये वा यन्मतिमोहान्मयाऽन्यथा किमपि ।
लिखितं वा विवृतं वा तन्मिथ्या दुःकृतं भूयात् ॥ २१ ॥

Colophon:—

ग्रंथ ९५५१ साहू आसधरसुतसाधु० श्रीरतनसीहसुततेजपालश्रेयोर्थं अयं (इदं) कल्पवृत्तिपुस्तकं त्रितयखंडं कारापितं लिखापितं च ॥ शुभं भवतु ॥

४४. दशवैकालिकवृत्ति by **तिलकाचार्य.** प. २४०; ३०"×२$\frac{1}{8}$"

End:—

इति श्रीतिलकाचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिकायाष्टीका समाप्ता ।

तीर्थे वीरविभोः सुधर्मगणभृत्संतानलब्धोन्नति-
श्चारित्रोज्वलचंद्रगच्छ-जलधि-प्रोल्लास-शीतद्युतिः ।
साहित्यागम-तर्क-लक्षण-महाविद्यापगा-सागरः
श्रीचंद्रप्रभसूरिरद्भुतमतिर्वादीभ-सिंहोऽभवत् ॥ १ ॥

तत्पट्टलक्ष्मी-श्रवणावतंसाः श्रीधर्मघोषप्रभवो बभूवुः ।
तत्पाद-पद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंहदेवः ॥ २ ॥
तत्पट्टोदयशैल-शृंगमभजत् तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया कोप्यत्र भानुर्नवः ।
संप्राप्ताभ्युदयः सदैव तमसा नो जातुचिच्छायितः
नैवोद्दंडरुचिः कदाचिदपि न प्राप्तापरागस्ततः ॥ ३ ॥
विललास स्वैरं तत्पट्ट-प्रासादशालायां ।
श्रीमान् शिवप्रभगुरुः संयम-कमलाकृतासक्तिः ॥ ४ ॥
श्रीशिवप्रभसूरीणां तेषां शिष्योऽस्मि मंदधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाक् ॥ ५ ॥
एतां सोऽहं विषमदशवैकालिके वृत्तिटीकां
तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षं ।
तद् यत् किंचिद् रभसशवतो दब्धमस्यामशुद्धं
तत् संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ ६ ॥
टीकां रचयता चैतां यन्मया सुकृतं कृतं ।
.... ॥

स्वस्ति श्रीस्तंभतीर्थे तपापक्षे श्रीरत्नाग(क)रसूरिगच्छे वृद्धपौषधशालायां श्रीदश-वैकालिकपुस्तकं गृहीतं [श्रीसंघस्य]

On the board:— सा. लोहा

[११२] ४५. भगवतीविशेषवृत्ति. प. ५०१; २८"×२"

Pras'asti of the Donor:—

निजभुज...पितसद्द्रव्यकारितानेकतीर्थकृद्बिंबाः ।
सद्धर्मनिरतमनसो जाताः पुत्रास्तयोश्चामी ॥ ४ ॥
प्रथमो वोढकसंज्ञो वीरडाख्यो द्वितीयकः ।
तृतीयो वट्ठडो नाम चतुर्थो द्रोणकाभिधः ॥ ५ ॥
तेषां च मध्ये जिनसाधुभक्तः श्रेष्ठी गरिष्ठः किल वीरडाख्यः ।
एतस्य भार्या धनदेविनामा बद्धा(द्धा)दराभूज्जिनराजधर्मे ॥ ६ ॥
तयोश्च पुत्रः सरलस्वभावो जिनेशधर्म्मस्थिरचित्तवृत्तिः ।
कृपापरो दुःखितजंतुवर्ग्गे सतां मतः पूजितपूजकश्च ॥ ७ ॥
येनाकारि मनोहररूपं श्रीवीरनाथतीर्थकृतः ।
सत्पित्तलामयमघध्वंसकरं श्रीसमवसरणं ॥ ८ ॥

यो ऽव्यधापयदनिंद्यमुत्तमं पापकर्म–पटलक्षयक्षमं ।
उत्तराध्ययनवृत्तिपुस्तकं ज्ञानभक्तिवशगः स्वमुक्तये ॥ ९ ॥
किं बहुना यः स्वं स्वं धर्मस्थानेष्वयोजयद् बहुशः ।
यश्चाजस्रं वंदनक–गुणन–सद्ध्यानरतचित्तः ॥ १० ॥
श्रेष्ठी वरदेवाख्यः समजनि लक्ष्मीरतिप्रिया तस्य ।
लक्ष्मीः सौरेरिव हृदयहारिणी चारुरूपाढ्या ॥ ११ ॥
तयोश्च पुत्रः समभूत् प्रसिद्धः सिद्धाभिधः पुण्य–धनैकधामा ।
आदेयवाक्यो गुणिपक्षवर्त्ता(वर्ती) वीरः कृतज्ञो रतिकांतरूपः ॥ १२ ॥
बद्धादरो यो जिनराजधर्मे यश्चोपचक्रे जिनमंदिरेषु ।
योऽलब्धमध्योंबुधिवत् सुमेधा यो राजलोकेऽभिमतो गुणैः स्वैः ॥ १३ ॥
दृढप्रतिज्ञः प्रतिपन्नकार्ये दाक्षिण्यपाथोनिधिरस्तदोषः ।
दानांबुवर्षित्वपयोदकल्पः सदा सदाचारपरायणो यः ॥ १४ ॥
भगिनी यस्य चांप्रश्री...रासीच्चामृतदेविका ।
जिनमत्याख्या यशोराजपाजकांपा (?) तथा परा ॥ १५ ॥
यश्च दधिपद्रपत्तनवास्तव्योऽपि प्रकथ्यते लोकैः ।
पूर्वनिवासापेक्षावशेन मङ्गाहडपुरीयः ॥ १६ ॥
द्वे भार्ये तस्य संजाते पत्याज्ञारतमानसे ।
राजमत्यभिधानैका श्रियादेवी द्वितीयका ॥ १७ ॥
वीरदत्तांपसरणादयः सूनवो वीरिका–जसहीणिप्रभृतयः पुत्रिकाः ।
तस्य जाताः सदाचारिमार्गे रताः सर्वलोकीयचेतःप्रणयावहाः ॥ १८ ॥
अथान्यदा सिद्धपिता स्वकीयं पर्यंतमासन्नतरं प्रमत्य ।
परत्र पाथेयमतो जिघृक्षुः सिद्धाभिधं पुत्रमिदं जगाद ॥ १९ ॥
मच्छ्रेयसे वत्स ! वरेण्यतीर्थयात्रासु संघे जिनराजवेश्मनि ।
विशेषतः पुस्तकलेखनेषु वित्तं नियोज्यं भवता यथेच्छं ॥ २० ॥
अथासौ सुगते ताते लक्षं ग्रंथस्य साधिकं ।
पुस्तकेषु पवित्रेषु दशसंख्येष्वलीलिखत् ॥ २१ ॥
तत्थ य गंथा सूयगडंगवित्ती ससुत्त–निज्जुत्ती ।
तह य उवासगदसियाइअंगसुत्ताणि वित्तीओ ॥ २२ ॥
तह ओवाउ(इ)यसुत्तं वित्ती रायप्पसेणइयसुत्तं ।
तह कप्पसुत्त–भासा चउत्थए पंचमे य पुणो ॥ २३ ॥

कप्पचुन्नी छट्ठे दसयालियवित्ति–सुत्त–निज्जुत्ती ।
उवएसमाल–भवभावणाण दो पुत्थया रम्मा ॥ २४ ॥
तह पंचासगवित्ती सुत्तं लिहियं च नवमयं एयं ।
पिंडविसुद्धीवित्ती पढमयपंचासगस्स तहा ॥ २५ ॥
चुन्नी जसदेवसूरिरइया तह लहुयवीरचरियं च ।
रयणचूडकहा वि य दसमंमि य पोत्थयंमि फुडं ॥ २६ ॥

अन्यच्च सिद्धभार्यापि राजमत्यभिधानिका ।
कदाचिद् दिवमाराध्यैतया चोचे निजो वरः ॥ २७ ॥
भगवतीपुस्तके रम्ये कार्यं मत्पुण्यहेतवे ।
तेन तद्वचनात् तूर्णं कारितं पुस्तकद्वयं ॥ २८ ॥
एकत्र भगवतीसूत्रं द्वितीये वृत्तिरुज्वला ।
लेखिता चारुवर्णाढ्या मोक्षमार्गांतरप्रपा ॥ २९ ॥

संवत्सरे मुनि–वसु–स्मरवैरिसंख्ये श्रीमत्पुरेऽणहिलपाटकनामधेये ।
पृथ्वीं च शासति नृपे जयसिंहदेवे निष्पादितः प्रवरपुस्तकवर्ग एषः ॥ ३० ॥

श्रीशालिभद्राभिधसूरिशिष्यश्रीवर्द्धमानप्रभुपादपद्मे ।
इंदिंदिराकारजुषां ततः श्रीचक्रेश्वराचार्यविशिष्टनाम्नां ॥ ३१ ॥
समर्पितः पुस्तकवर्ग एष निरंतरं शोधन–वाचनाय ।
इदं च तन्मध्यगतं सुवर्णं सत्पुस्तकं राजति वाच्यमानं ॥ ३२ ॥

यावन्नभोंगणगताः शशि–भानु–तारा राजंति लोकतिमिरं सततं क्षिपंत्यः ।
यावद् ध्रुवः सुरगिरिश्च चकास्ति तावत् श्रीपुस्तको विजयतामिह पठ्यमानः ॥३३॥

Colophon:—

संवत् ११८७ वर्षे कार्त्तिकसुदि २ लिखितं भगवतीविशेषवृत्तिपुस्तकं श्रीचक्रेश्वरसूरीणां श्रे० सिद्धश्रावकस्य ।

Added in different hand:—

श्रीवीरप्रभसूरीणां श्रे० रामदेवादीनां ॥ छ ॥

[१२५] ४६. (१) सूत्रकृताङ्ग (मूल). प. १–४१; ३३″×२″
(२) „ निर्युक्ति. प. ४१–४५
(३) „ टीका by शीलाचार्य. प. ४६–३०३

End:—

समाप्ता चेयं सूत्रकृतद्वितीयांगस्य टीका । कृता चेयं शीलाचार्येण वाहरिगणिसहायेन ।

यदवाप्तमत्र पुण्यं टीकाकरणे मया समाधिमता ।
तेनापेततमस्को भव्यः कल्याणभाग् भवतु ॥ ग्रंथाग्रं १३९५०

Colophon:—

संवत् १४५४ वर्षे माघशुदि १३ सोमे अद्येह श्रीस्तंभतीर्थे लिखितमिदं पुस्तकं चिरं नंदतात् । शुभं भवतु ।

श्रीकायस्थविशालवंशगगनादित्योऽत्र जानाभिधः
संजातः सचिवाग्रणीर्गुरुयशाः श्रीस्तंभतीर्थे पुरा(रे) ।
तत्सूनुर्लिखनक्रियैककुशलो भीमाभिधो मंत्रिराट्
तेनायं लिखितो बुधावलिमनःप्रीतिप्रदः पुस्तकः ॥ १ ॥

यादृशं etc. । शुभं भवतु श्रीसंघस्य लेखक–पाठकयोश्च ।

Pras'asti of the Donor:—

ओं नमः सर्वज्ञाय ।

प्राग्वाटवंशमुकुटः श्रेष्ठी गांगाभिधः समजनिष्ट ।
अधरयति स्म धरायां धनदं यः स्वीयधननिकरैः(चयैः) ॥ १ ॥
एतस्य विशदशीला जज्ञे पत्नी च गउरदेनाम्नी ।
निःसीमरूपसंपल्लक्ष्मीरिव वासुदेवस्य ॥ २ ॥
प्रीमलदेवीसंज्ञा सकर्णजनवर्ण्णनीयगुणकलिता ।
अभवत् तयोस्तनूजा जिनपूजाधा(ध्या)नतच्चित्ता ॥ ३ ॥
विमलतमशीलसुभगा नूनं या शुद्धशीलचरितेन ।
चिरवीतामपि सीतां निरंतरं स्मारयत्येव ॥ ४ ॥
तामुपयेमे सुकृती भूंभुव(च) इति विश्रुतो विशदबुद्धिः ।
ठकुरकालाभार्यारांभलदेवीप्रसूततनुजन्मा ॥ ५ ॥
श्रीजिनशासन-नभो-भानुश्रीदेवसुंदरगुरूणां ।
प्रीमलदेवी साथ श्रुत्वा पीयूषदेश्यमुपदेशं ॥ ६ ॥
मत्वाऽसारतरं धनं धनफलं लिप्सुर्निजश्रद्धया
वेदेषूदधि–शीतदीधितिमिते [१४५४] संवत्सरे वैक्रमे ।
लक्ष्मीवैश्रवणातिशायिजनते श्रीस्तंभतीर्थाभिधे
द्रंगेलीलिखदेतदद्भुततमं श्रीसूत्रकृत्पुस्तकं ॥ ७ ॥
आचंद्रादित्यमेतद् विरचितचतुरानंदसंपद्विशेषं
संख्यावद्भिर्मुनींद्रैरहमहमिकया वाच्यमानं वितंद्रैः ।
उद्यदुःखातिरेकाकुलनिखिलजगज्जीवजीवातुकल्पं
श्रेयःश्रीहेतुभूतं प्रवचनमनघं जैनमेतच्च जीयात् ॥ ८ ॥ छ । श्री ।

[१०२] ४७. **विशेषावश्यकवृत्ति** (प्रथम खण्ड). ग्रं. १४००० प. ३६३; ३२½"×२"

Colophon:—

साहुरतनसीह–साहुकुमरसीहाभ्यां लिखापितं ।

उपा० श्रीउदयधर्मेण...... सं. १५०८ वर्षे श्रीपत्तने वाचयांचक्रे ।

On the board:— साहुरतनसीहसत्कं

[८६] ४८. **मल्लिनाथचरित** by **विनयचन्द्र.** प. ३–३००

[१२६] ४९. **महावीरचरित** (प्रा.) by **गुणचन्द्रगणि.** प. ३४८; ३१"×२"

[३६] ५०. **ज्ञाताधर्मकथा.** ग्रं. ५५०० त्रुटित प. १५९; ३१½"×२"

५१. **सूत्रकृताङ्ग**(सवृत्ति). त्रुटित. ३१½"×२"

[९३] ५२. (१) **उत्तराध्ययनलघुवृत्ति** (सुखबोधा) by **नेमिचन्द्र.** (अपूर्ण). प. १–२८९; ३१½"×२"

On the board:— सा. लोहदेव आसाधरसत्क

(२) **उत्तराध्ययन** (मूल). प. २९०–३३९

Added in later hand:—

श्रीमत्श्रीवृद्धतपागच्छे भट्टारकश्रीरत्नाकरसूरिसंताने भट्टारकश्रीजयतिलकसूरि-पट्टप्रभाकरभट्टा० श्रीरत्नसिंहसूरिशिष्यभट्टा० श्रीउदयवल्लभसूरि–श्रीज्ञानसागरसूरि-महत्तरः श्रीधर्मलक्ष्मीगणिनीप्रमुखपरिवारस्य वाचनाय पुस्तकमिदं । श्रीउत्तराध्ययन-सूत्रलघुवृत्तिश्च प्र १ आप

संवत् १५१६ वर्षे १५ रवौ मृगशीर्षनक्षत्रेऽद्येह श्रीमदणहिल्लपुरपत्तने पात० श्रीमहिमूदविजयराज्ये पं० मुनितिलकगणि–पं० उदयसारगणिभ्यां शोधितमिदं परं तथापि विद्वद्भिः शोध्यं ॥

[९०] ५३. **आवश्यकवृत्ति** (प्रत्याख्यानपर्यन्त) by **हरिभद्रसूरि.** त्रुटित. प. ५११; २६½"×२"

Pras'asti of the Donor:—

निःसीमदानोद्यतकृतिविलसत्कीर्तिकल्लोलिनीभिः
स्वर्गंगायाः प्रवाहैरिव विशदमिदं संगमोत्कंठये(चे)तः ।
कालंद्येव प्रयांत्योपपरिहरिणया नीलरत्नांशुभिन्न–
च्छायांभःश्रो(स्रो)तसा यद् वलयितमधिकं तीर्थभूतं विभाति ॥ १ ॥

ख्यातं हिरण्यनगरं गुरु तत्र चित्रपत्रोपनिषण्णसुचयः सुतरम्यशाखः ।
सद्गोत्रजोऽनुपमपर्वविराजमानो वंशोऽस्ति हुंबडनृणां शुभवर्णशाली ॥ २ ॥
तत्र स्ववित्तसुखतीकृतजंतुजातः कल्याणसंभृततया धनदायमानः ।
श्रेष्ठ्यंबकः सुहृदभून्न परं हरस्य मित्रं तथापि परमं स महेश्वराणां ॥ ३ ॥

अदक्षिणाशाऽपूर्वाशा न पराशा मनोमुदे ।
उत्तरेवोत्तमा भार्या तस्य नाढीति विश्रुता ॥ ४ ॥
नलकूवर इव पुत्रः प्रेयान् वैश्रमणपितृपरमभक्तः ।
जज्ञेऽश्वनागनामा तस्या वित्तोपयोगपरः ॥ ५ ॥
संपूर्ना च यशोदेवी राकानुमतिसंनिभे ।
चंद्रस्यैवास्य कांते द्वे प्रकाशे शुद्धपक्षतः ॥ ६ ॥

संपूर्णायाः सद्वा..................................नां ।
पुत्रो य(ज)ज्ञे ज्ञान–विज्ञानशाली शालीनात्मा सार्द्धदेवाभिधानः ॥ ७ ॥

यशोदेव्या यशोदायिकृत्यजातपरायणौ ।
वीरनाम्नाभवत् तस्य संजातौ द्वौ सुतोत्तमौ ॥ ८ ॥

सम्यग्बोध–सुराचलेन मथिते मिथ्यात्ववंधांबुधौ
या चंद्रामृतसादरीसदविषावेगानभिज्ञा परं ।
सौंदर्येण च यै...............कांतीकृता ॥ ९ ॥
केनासौ मदनस्तृतीयनयनज्वालाकलापे हुतः
किं ...त त्रिपुरांतकेन ननु सोथा......... ।
यत्पुत्रच्छलतश्चकार स पुनः पंचप्रकारं वपुः ॥ १० ॥
ते चामी वनदेवोंवट इलाकश्च केल्हणः खदिरः ।
पंचापि पंचबाणानुकारिरूपा अपि सुशीलाः ॥ ११ ॥
ये च क्रीडाभवनमतयो.........चरणनिभृते मूर्तिमान् पुण्यपुंजः ।
धृत्यं धाम प्रणयि परमाह्लादवृद्धेः समृद्धेः
बुद्धेः सिद्धेः शरणमरणिर्ध्यानवह्नेः शुभस्य ॥ १२ ॥
भगिनी तेषां साटीनि शील–सौंदर्य–रूपतत्त्वेन ।
कुलटं कुरूपाणामपि संवेगयतीव चेतांसि ॥ १३ ॥
वनदेवप्रमुखाणां लक्ष्मीः सीता च रुक्मणी धांवी ।
भार्या यशोमतिश्च क्रमेण जाता महासत्यः ॥ १४ ॥
याः कामधेनुप्रतिमा..............................लाः ।
लीलाललामां अपि नव्य......संवेगरंगांगणबद्धनृत्ताः ॥ १५ ॥

लक्ष्म्याः पुत्री शन्हा सलक्षणा नंदनाश्च सीतायाः ।
आभूश्च पार्श्वनागश्च संतुकश्चेति शांतहृदः ॥ १६ ॥
गिण्यः श्रश्नदेवोऽभूद् देवतानिष्ठिपूजकः ।
पुत्रोऽपि तादृशस्तिस्रस्वामी राजश्च मोहिनी ॥ १७ ॥
वधिकायाः पुनः पुत्री पूर्णिका शीलशालिनी ।
सर्वदेवो यशोमत्याश्च इति सकलकुटुंबपतिः ॥ १८ ॥

जिनपति–यतिपूजा–दानदत्तावकी(धा)नः ।
अक्ष(क्र)त सुकृतिरत्नं प्रातरन्येद्यु चिंतां
सुगुरुगदितवाक्याद्दीलकः श्रावको यः ॥ १९ ॥
इह हि जगति संप...पकासारसारा
रति रमि–मदसुतप्रेयसीस्तू वि(ल)लोला ।
ललितमपि वधूनां ध्वंसि वंधुश्च बंध–
स्तदिह शरणमेकं धर्ममेकं पवित्रं ॥ २० ॥
...ोऽनेकधा यद्यपि वादिमुख्यैर्निगद्यते मुक्तिकृते मुनींद्रैः ।
तथापि......जनानां.........................
...तो विवेकैकविवृद्धिहेतुरावश्यकं यद्विधम...लेखि
श्रेयःकृते स्वस्य तद्दीलकेन कुटुंबमालोच्य विवेकभाजा ॥ २१ ॥
इतश्च । श्रीचंद्रगच्छे सग.................................. ।
श्रीवर्द्धमानो मुनिपोसनि...मनो मनःप्रार्थित...सुदायी ॥ २२ ॥
पट्टे तदीये निजबुद्धियोगात् निः...तत्रै दशसूरिबोध–
शुद्धांतरात्मा गुणरत्नभूरिः श्रीमान् श्रुतोऽभूद् भुवि देवसूरिः ॥ २३ ॥
श्री.....................भूव भूतिलकः ।
संसारांबुधि-सेतुः केतुः साक्षादनंगस्य ॥ २४ ॥
श्रीयशश्चंद्रसूरेस्तु तत्पदस्थस्य पुस्तकं ।
पठनायेल्लकश्राद्धपुंगवेन समर्पितः ॥ २५ ॥
नानाजीवादिवस्तुव्यतिकरलहरीभंगसंग.........
प्रवाह......वशमितवा......संतोपसंपत् ।
यावत् सिद्धांत–सिंधुर्जयति जिनपतेः स्यात् तदोदात्तनक्र–
स्तावद् भूयाद् बुधानामयमपि रत्ये पुस्तकः पठ्यमानः ॥ २६ ॥
.........साकं सिंधुराजेन ि ि तभरत् ॥

[८७] ५४. **त्रिषष्टिश. पु. चरित** (द्वितीयपर्व) by **हेमाचार्य.**
का. प. १२०; २१$\frac{1}{4}$"×३" Illustrated.

Colophon:—

संवत् १४३६ वर्षे भाद्रपदवद ५ भूमे लक्ष(लिखि)तानि पं० **मलयचंदशिष्य-सान्हाकेन** लिखितमिति भद्रं । भग्न etc. शुभं भवतु ।

Pras'asti of the Donor:—

जितो गत्या गजो यस्य सेवाहेवाकितां गतः ।
चिह्नापह्नवतो यस्य सोस्तु श्रियै श्री**अ**जितो जिनः ॥ १ ॥
श्रीमाले भुवनाकाशे वंशे मौक्तिकवत् पुरा ।
देवासिंहाभिधः श्रेष्ठी जातो जिनमतोच्छ्रितः ॥ २ ॥
विमुक्तमाया जाया च तस्य **दे**वलदेव्यभूत् ।
माऊनाम्नी हिता पुण्ये **सा**मतस्य तु भ्रातृजा ॥ ३ ॥
दया–दाक्षिण्य–दमता–दान–मानादिभिर्गुणैः ।
माऊनाम्नीं विहायान्यां नाज्ञासिष्म वयं भुवि ॥ ४ ॥
इतश्च । श्रीमत्**को**रंटगच्छाब्धिसमुल्लाससुधानिधिः ।
सूरिः सैद्धांतिको जज्ञे **साव**देवः प्रभुः पुरा ॥ ५ ॥
तत्पट्टकमलाकेलिशैलः शीलकलोज्वलः ।
श्री**न**न्नसूरिसूरींद्रस्ततो जयति संप्रति ॥ ६ ॥
तन्मुखाद् देशनां श्रुत्वा पित्रोः पुण्यविवृद्धये ।
श्रीजि**ना**जितनाथस्य चरित्रमलीलिखत् ॥ ७ ॥
गते विक्रमतो वर्षे **सप्ताग्नि–स्वर**संख्यके ।
श्रीमद्भ्यो **नन्नसूरि**भ्यः पुस्तकं प्रददे तया ॥ ८ ॥
यावन्मेरुः स्थिरो यावदुदेति दिनकृद् दिवि ।
वाच्यमानं बुधैस्तावत् पुस्तकं नंदतादिदं ॥ ९ ॥

मंगलं भूयात् गुरुभ्यः ॥

५५. (१) **शान्तिनाथचरित्र** by **मुनिदेवसूरि.** त्रुटित खण्डित.
(२) **ऋषभदेवचरित्र** by **वर्धमानसूरि.** ,, ,,
(३) **त्रिषष्टिश. पु. चरित** (अष्टम पर्व). ,, ,,

[५०] ५६. (१) **पुष्पमाला.** गा. ५०५ प. १–४२
(२) **सङ्ग्रहणी** by **जिनभद्र.** गा. ३८८ प. ४२–७४

(३) **प्रवचनसन्दोह.** गा. ३३४ प. ७४-९६
(४) **नवपद** by **जिनचन्द्र.** गा. १३९ प. ९६-१०७
(५) **पिण्डविशुद्धि** by **जिनवल्लभ.** प. १०९-११६
(६) **धर्मोपदेशमाला.** गा. १०० प. ११६-१२५
(७) **जम्बूद्वीपक्षेत्रसमास.** प. १२५-१३१
(८) **एगवीसठाण.** प. १३१-१३७
(९) **विवेकमञ्जरी.** प. १३७-१४९
(१०) **स्थविरावली.** प. १४९-१५३
(११) **दूसमोद्धार** by **उदयप्रभसूरि.** प. १५३-१५६

Beginning:—

नमिऊण भुवणवीरं जिणिंदवीरं समासओ किं पि ।
वच्छे य दूसमा-सुसमाण वोच्छं समुद्धारं ॥ १ ॥

End:—

सिरिधम्मसूरि-जसभद्दसूरि-रविसूरिसीसलेसेहिं ।
सिरिउदयप्पहसूरीहिं विरइओ एस उद्धारो ॥ ४८ ॥

दूसमोद्धारः ॥

(१२) **भक्तामरस्तोत्र.** प. १५६-१६१
(१३) **श्रावकप्रतिक्रमण.** प. १६१-१६५
(१४) **चैत्यवन्दनादि.** प. १६५-१७४
(१५) **श्रावकवक्तव्यता**(षट्स्थानक). गा. १०३ प. १७५-१८२

Beginning:—

कयवयकम्मयभावो सीलत्तं चेव तह य गुणवत्तं ।

(१६) **षट्स्थानकभाष्य** by **अभयदेव.** प. १८२-१९४

End:—

इय पुव्वसूरिविरइयगाहाजुयलस्स विवरियं किंचि ।
मुणिपवरसिरि**जिणेसरसूरी**हिं अणुग्गहट्ठाए ॥ १७६ ॥
तप्पाय-पउम-छप्पय-मुणीससिरि**अभयदेवसूरी**हिं ।
दुरवगममित्थ सुगमं विहियं नियसीसवयणेण ॥ १७७ ॥

श्रीमदभयदेवसूरिविरचितं षट्स्थानकभाष्यं समाप्तमिति ॥

(१७) **धर्मकुलक.** प. १९४–२००

Beginning:—

नमिऊण **जिणं** जयजीवबंधवं धम्म–कणय–कसवट्टं ।
वोच्छं धम्ममईणं **धम्म**विसेसं समासेण ॥ १ ॥
नाणाचित्ते लोए नाणापासंडमोहियमईए ।
दुक्खं निव्वहेउं सव्वण्णुवएसिओ धम्मो ॥ २ ॥

End:—

नाणंकुसे निरुम्भह मण–हत्थी उप्पहेण वच्चंतो ।
मा उप्पहपडिवन्नो सीलारामं विणासेज्जा ॥ ८१ ॥

नाणाइत्तं सम्मत्तं ॥

(१८) **जीवदयाप्रकरण** (प्रा.). गा. ११३ प. २००–२०९

(१९) **धर्मघोषसूरिस्तुति** by **रविप्रभसूरि.** प. २०९–२१६

श्री**धर्म**घोषसूरीणां गुणालीं देवतामिव ।
अर्चयंति वचः–पुष्पैः श्री**र**विप्रभसूरयः ॥ १ ॥

सुलभविविधलब्धिर्भाग्य–सौभाग्यभूमि–
भवशतकृतपुण्यप्राप्यपादप्रसादः ।
जिनपतिमतचित्रोत्सर्पणाकेलिकारो
जयति कलियुगेस्मिन् **गौ**तमो **धर्मसूरिः** ॥ २ ॥

मिथ्यात्वोदधि–कुंभसंभवमुनिर्वादींद्रदर्पानल–
ज्वालाजाल–जलावलिसुभगता–गंगापगा–सागरः ।
आदेयत्वधरा–धुरा–धरणीभृत् संसार–रोगौषधं
क्रोध–ध्वांत–दिवामणिर्विजयते श्री**धर्मसूरिः** प्रभुः ॥ ३ ॥

व्युत्पत्तिर्वचनेष्वनन्यसदृशी वन्याहृतामौचितीं
कर्त्तव्येषु समाश्रितेषु विधूतोपाधिं विशेषज्ञतां ।
तत्तच्छास्त्रविधानशक्तिमसमां श्री**धर्मसूरि**प्रभोः
लोलोन्मौलि–गलद्वतंस–कुसुमस्तोमेन को नांचति ? ॥ ४ ॥

असमसमसमृद्धि–स्वर्धुनी–सिंधुनाथः
चरण–करण–संपन्नाटिका–सूत्रहा(धा)रः ।
अगणितगुण–ताराचक्रवालोदयाद्रि–
र्जयति जगति नित्यं **धर्मसूरि**र्मुनींद्रः ॥ ५ ॥

मुंचंत्यो मधुपूरये सभरसस्रोतः क्षिपंत्यः स्फुटा–
हंकाराकरवादिदर्प–कमलामुन्मूलयंत्योमलं ।
क्रीडंत्यो हृदयांगणे गुणवतां **शाकंभरी**भूभुजां
जीयासुः सुचिरं गिरो भगवतः श्री**धर्मसूरि**प्रभोः ॥ ६ ॥

मंद्रारद्रुममंजरीमलिकुलक्काणेन वाचालिता–
मुद्भुताद्भुतगीतभंगिसुभगां हित्वा विपंचीमपि ।
धत्ते सापि सरस्वती भगवती श्री**धर्मसूरि**प्रभो–
र्वाचं संप्रति विस्फुरन्नवरसामभ्यर्णगां कर्णयोः ॥ ७ ॥

नेदं व्योमनि पुंडरीकधवलं शीतद्युतेर्मंडलं
भ्राम्यत्यत्र न चैष भृंगसुभगो धत्ते कलंकस्थितिं ।
पट्ट–स्फाटिक एष तत्र च गुणी श्री**धर्मसूरेः** समः
सृष्टः कश्चन नो मयेति लिखिता वर्णावली वेधसा ॥ ८ ॥

अवदधत बुधेंद्राः ! सत्यमेतद् वदामो
जगति जलधि–सीम्नि स्नातविद्याकुलेपि ।
न हि न हि स विपश्चित् कश्चिदास्ते समः कः
क्वचिदपि विषये यः श्रीमतो **धर्मसूरेः** ॥ ९ ॥

पाताले वसुधातले दिविषदां लोके च नैवान्वहं
स्वच्छंदं विलसंति हार–सुहृदो गंगा–प्रवाहास्त्रयः ।
किं तु श्रीमति **धर्मसूरि**सुगुरौ सृष्टे स हृष्टो विधिः
नृत्यन् वर्धनके स्वयं निहितवान् तिस्रः पताका इमाः ॥ १० ॥

वैराग्यामृतसंभवैर्नववचः–कुंभैः समुद्भासिता
धर्माख्यान--महाप्रपा विजयते श्री**धर्मसूरि**प्रभोः ।
यामासाद्य तनुभृतो भव–पथा प्रस्थानखिन्नाश्चिरं
स्वं प्रक्षाल्य तृषां विहाय च कति स्युर्नाम नो निर्वृताः ? ॥ ११ ॥

आरुह्य वल्गद्गुण–वाजिराजीं स्वैरं यशः–सादिवसूर्यदीयाः ।
प्रसाधयामास दिशः स सेव्यः श्री**धर्मसूरि**र्मुनि–चक्रवर्ती ॥ १२ ॥

संदेह–द्रुम–धूमकेतनभरो निष्पो(श्शे)षविद्या–वधू–
लीनवेश्म मृगांकनिर्मलकला–कल्लोलिनी–नीरधिः ।
कंडूलप्रतिवादिवृंदवदनांभोजैक–शीतद्युति–
र्वाग्देवी–श्रुतिकुंडलं विजयते श्री**धर्मसूरि**र्गुरुः ॥ १३ ॥

आदेशं दिश वादि–सिंह–सरभ ! स्मः किं नवा स्मोथवा ?
तिष्ठामः प्रतिपद्य भक्तिमुभयीं शश्वद् विरुद्धामपि ।
यस्मिंस्तार्किक–चक्रवर्तिनि कृतोद्योगे परीक्षाकृते
भाषाः प्राहुरिदं पुरः स जयति श्री**धर्मसूरि**र्गुरुः ॥ १४ ॥

इंदोर्बिंबे यदस्मिन्नतिकुलमलिनं किंचिदाभाति लोकः
तल्लक्ष्मेति प्रपन्नो मम तु मतिरिदं निश्चिनोत्यन्यथैव ।
कीर्त्या श्री**धर्मसूरे**रहिम–हिमरुचोस्तुल्ययोर्जातु शंका
शंके कस्तूरिकायास्तबकमिममसौ रोहिणी न्यस्यति स्म ॥ १५ ॥

कस्त्वं नन्वस्मि पान्थः क नु कथय दिशि प्रस्थितो दक्षिणस्यां
हेतुः को हंत ! देवी नयनविषयतां शारदा प्रापणीया ।
भ्रातर्मूढोसि बाढं निवसति यदसावुत्तरस्यां न मूढः
सापेष(क्षा) तत्र, मुख्या त्विह जयति यति**धर्मसूरी**ति नाम्ना ॥१६॥

प्रीतिं कस्य न संशयाद्रिदलने दंभोलयः प्रोल्लसद्–
व्युत्पत्त्युज्ज्वलकेलयो विदधति श्री**धर्मसूरे**र्गिरः ।
यासां स्वादिमलेशतोप्यविधिना द्राक्षेक्षु–पं(खं)डामृत–
प्रायास्ते भुवनोदरे विदधिवि(रे)भावाः किल स्वादवः ॥ १७ ॥

व्युत्पत्तिं ध्वनिषु प्रकाशयति तां यस्मिन् जडः **पा**णिनिः
काव्यं कुर्वति यत्र सोपि विरसः श्री**का**लिदासः कविः ।
यस्मिन् वस्तु समस्तमेव वदति स्याद्वाद–मुद्रांकिते
मूकः सोपि बृहस्पतिः स जयति श्री**धर्मसूरि**र्गुरुः ॥ १८ ॥

देवैस्त्यक्तः सुराद्रिस्तुहिनगिरिधिया वासवोन्यान् गजेंद्रान्
अध्यास्ते स्वेभबुद्ध्या स्पृहयति कमला विष्णवे नो हलीति ।
रोहिण्युक्त्वा कलंकच्युतिसुभग इति श्लिष्यति श्वेतभानुं
यत्कीर्त्या शुभ्रमूर्त्तौ जगति स जयताद् **धर्मसूरि**र्मुनींद्रः ॥ १९ ॥

साम्योक्तिकथि शारदा भगवती श्रीशारदा भावतो
यस्मिन् वाङ्मयकोशसारमखिलं क्षिप्त्वा कृतार्था ध्रुवं ।
गत्वा क्वाप्यजने वने हिमगिरेस्तीव्रं तपस्तप्यते
सैकः (षः)कस्य चमत्कृतिं न कुरुते श्री**धर्मसूरि**र्गुरुः ? ॥ २० ॥

देवानां सदसि स्वयं बलभिदा प्रीतेन यस्योपमा
दत्तामात्मनि भावयन् सपुलकं सद्यः स वाचस्पतिः ।

श्रद्धालुत्वमुपाजगाम सुबहोः कालात् स्वकीये गुण–
ग्रामेसौ जयताद् बुधैकतिलकः श्री**धर्मसूरि**र्गुरुः ॥ २१ ॥
स जयति यतिराजो **धर्मसूरि**र्यदीयैः
स्रवति शिरसि पूर्णे निर्भरं कीर्त्ति–नीरैः ।
तुलयति कनकाद्रिं नीलमाकाशमस्मिन्
अथ कुवलयमस्मिन् राजहंसं बुधांश्च ॥ २२ ॥
सूरिः श्री**धर्मघोष**स्त्रिजगति जयति प्रोषिताशेषदोषः
सैकः स्वःसिन्धुनीरानुगुणगणमणिश्रेणिशृंगारितांगः ।
पीत्वा **शा**कंभरींद्रैरमृतरसमुचां वाचमुच्चैरुदंचद्–
रोमांचैरीदृगन्यः क्वचिदपि न गुणीत्यन्वहं तुष्टुवे यः ॥ २३ ॥
श्लाघ्यः श्री**शी**लभद्रो जगति मुनिपतिर्यस्य तुच्छेतरस्मिन्
शिष्यः भालस्थलतिलकमणि**र्धर्मसूरिः** स धुर्यः ।
धारायन्त्र ! त्यज स्वस्वसदसि चरितं यस्य गीतं सुरीभिः
शृण्वन्नानंद–वारि स्रवति सुरपतिर्लोचनानां सहस्रैः ॥ २४ ॥
श्रोता यस्या**जयेंद्रः** सदसि तिलकिते कोविदानां घटीभिः
सांख्यव्याख्यासु सूक्तीर्मधुमधुरसाः स्वैरमासाद्य सद्यः ।
घूर्णन्मौलिप्रवेल्लत्प्रविकचकुसुमोत्तंसलोलालिजाल–
व्याजान्नीलातपत्रं स्वयमधृत समस्तस्य को **धर्मसूरेः** ? ॥ २५ ॥
नंद्यादाचंद्रमिंद्रः स जगति गुणिनां **धर्मसूरि**र्वचस्वी
यस्योद्यद्गद्य–गोदालहरिषु परितः प्लावयंतीषु मग्नः ।
कोहं किं स्थानमेतत् प्रकृतमिह किमित्यादि नामंस्त किंचित्
दिग्वासःशेखरोसाव**जय**नरपतेः पर्षदि श्री**गुणें**दुः ॥ २६ ॥
अर्णोराजमहीपतेरधिसभं पश्यत्यशेषं जग–
त्यस्तित्वाखिलशास्त्रविन्मलयजैराकल्पितं **दि**क्पटं ।
आयांत्या जयसंपदा प्रकटितः सौभाग्य–भाग्योदयो
यस्यानन्यसमः चिरं स जयति श्री**धर्मसूरि**प्रभुः ॥ २७ ॥
एकोस्मिन् भुवनत्रये विजयते श्री**धर्मसूरि**र्गिरां
व्युत्पत्तिर्न शमस्य यस्य [च]शतं स **विग्रह**क्ष्मापतिः ।
ईदृक् कोस्ति विचक्षणः क्षितितलेत्ये(त्रे)त्यूचिवाऩ्नापरं
वक्त्रेण स्तवनोच्छलद्भुजलतालंकारनादैरपि ॥ २८ ॥

स्तुत्यः कस्मिन् न **धर्मसूरि**सुगुरुर्यस्योपदेशात् पुरे
स्वस्मिन् कारयति स्म **विग्रहनृपो जैनं** विहारं द्रुतं ।
यस्मिंस्तस्य गिरा चकार च गुरुर्बिंबप्रतिष्ठा[विधिं]
भूयोप्यस्य गिरा निवारितवधामेकादशीं स्वक्षितौ ॥ २९ ॥
ऊर्ध्वीकृत्य भुजं वदाम्यनुपमं श्री**धर्मसूरे**र्गिरा–
मादेयत्वमसौ यदस्य वचसा श्री**विग्रहेशः** स्वयं ।
यस्मिन् **राजविहार**–दंड–कलशारोप–प्रतिष्ठादिने
सार्धं श्री**अरिसीह–मालवमहींद्रा**भ्यां ध्वजे लग्नवान् ॥ ३० ॥
पीत्वा पीत्वा श्रुतिभ्यां दिशि दिशि विशदानंदमग्ना महांत–
स्तत् तच्चित्रं चरित्रं जिनमतविततोत्सर्पणाकारि तस्य ।
शैथिल्यं नित्यकृत्येष्वपि दधति मुहुस्तत्परामर्शवश्या–
स्तस्य श्री**धर्मसूरे**र्गुणलवमपि कः स्तोतुमस्मादृशः स्यात् ? ॥ ३१ ॥
एते शासनदेवि ! किंचिदुचितं विज्ञापयामो वयं
व्यासंगांतरतो निवृत्य हृदयं मातः ! समाकर्णय ।
लोकेस्मिन् **जि**नशासनोन्नतिकृतः श्री**धर्मसूरि**प्रभो
रक्षां कांक्षित–कल्पवल्लरि ! परोक्षाः समास्त्वं क्रियाः ॥ ३२ ॥

एतां श्री**धर्मसूरी**णां स्तुतिं मुक्तालतामिव ।
सतां कंठोत्थितां चक्रुः श्री**रविप्रभ**सूरयः ॥ ३३ ॥

(२०) **धर्मसूरिस्तुति** (बारह नावउं द्वादशमास अपभ्रंश).

प. २१६–२२१

Beginning:—

तिहुयणमणिचूडामणिहिं बारह नावउं **धमसुरि**नाहह ।
निसुणेहु सुयणहु ! नाणसणाहह पहिलउं सावणु सिरि फुरिय ॥ १ ॥

कुवलयदलसामल घणु गज्जइ नं महलु मंडलझुणि छज्जइ ।
विज्जुलडी झबकिहिं लवइ मणहरु वित्थारेवि कलासु ।
अन्नु करेविणु कलि केकारवु फिरि फिरि नाचहिं मोरला ।
मेइणि हार हरिय छमि णवर त्रीजण–भय उद्दिय नीलंबर
वियलिय नवमालइ कलिय ॥ २ ॥

हलि ! तुह कहियइं गुणइं निहाणु **धमसुरि** अनु **जससूरि**समाणु ।
अनु न अत्थि को वि जगि

इहु प्रिय ! वरिसंतउ न गणिज्जइ जायवि धमसुरि गुरु वंदिज्जउ ।
किज्जउ माणुस-जमु सफलु ॥ ३ ॥
वंदंतह धमसुरि गुरु भाद्रव मासु पहूतु ।
मयगलि जिम्व गुलुवि घणि जलु किउ महिहि प्रभूतु ॥ ४ ॥
तुहु सहि ! वियसिउ केउडउ सेरउ धवल विलासु ।
जससुरि-नयण-पराभविउ [नं] सेवइ वण-वासु ॥ ५ ॥
पउणि पहरि जिण पंचसय पढिविणि विम्हिउ लोउ ।
तसु धमसूरि गुरु तणिय वड हुयउ न होसइ कोइ ॥ ६ ॥
गुज्जरि बोलइ चालु प्रिय ! मज्झु मणोरह पूरि ।
देसण सुणहु सुहावणिय वंदेविणु जससूरि ॥ ७ ॥
महियलि विमलउ सयलु जलु वय पहुतउ आसोय मासु ।
धमसुरि-केरउं चित्तु जिम्व वय निम्मलु ठिउ आगासु ॥ ८ ॥
चंदा चंदा चंदडा वय चडावय चंदिणडउं करि चंगु ।
मंडिन महि तुहुं हंसडा ! वय भमरुल्ला कमलिहिं न रजु ॥ ९ ॥

End:—

पीपलि करिवि स पिंड पहिरि कन्हिहि चल कुंडल ।
झलझलंत कंकण सनाह हत्थीहिं पुण हत्थल ॥ ४१ ॥
नव-सरु मोत्तिय-हारु कंठि कलकंठि ! ठवेविणु ।
पाल विसाल चलंत चंचलु पायहि पहि पहिरेविणु ॥ ४२ ॥
चालिन ऊतावली सहिय ! पुरि पुरि विहरंतौ ।
जायवि धमसुरि नमहु सु पुणु जससुरि गुणवंतौ ॥ ४३ ॥
माणिणि ! माण महंतु मयगल मउ मोडिवि ।
सहि ! मंडलि वणि पत्तो आसाढ सु केसरि ॥ ४४ ॥
मेहुडलइ नवि गयणि घुडुक्कइ तहिं खणि विरहिणि-हियउं खुडुक्कइ ।
पसरिउ इंद्र-धणुहु फुड फारु किउ विज्जुलिय तरल झलकारु ॥ ४५ ॥
विदलिय कंद-केलि-कंपण-लालिय-तणु ।
व फुरिउ पवयणु पयट्टो दाहिण रवि-संदणु ॥ ४६ ॥
उचिय चडि वायस खज्जूरि लवि महुरइं सरि जोइवि दूरि ।
आवंतउ तउ धमसुरि नाहु पहुचि जिंव तसु वंदण जाहु ॥ ४७ ॥
अड्ढाइयवरिसेहिं जसु लोए समागमो ।
अहियमासु संपत्तो सो सहिय ! मणोरमो ॥ ४८ ॥

तहिं वंदउं जसमुरि सुहकारु तव–सिरि–कन्ह–वयंसपयारु ।
धमसुरि बारह नावउं संतह हरउ दुरिउ सुह करउ पढंतः(ह) ॥ ४९ ॥
विन्ह(न्न)त्तिय निसुणेहि सासणदि(दे)वि ! सायरु ।
नंदउ धमसुरि लोए जा चंद–दिवायरु ॥ ५० ॥

बारह नावउं सम्मत्तं ॥

(२१) **गाथाकोश.** गा. १५३ प. २२१–२३२

Beginning:—

निज्जरियजरा–मरणं वंदित्ता जिणवरं महावीरं ।
छप्पन्नयगाहाओ वुच्छं सुयणस्स जोग्गाओ ॥ १ ॥
पुरिसे सच्चसमिद्धे अलियदलिद्दे सहावसंतुट्ठे ।
तव–नियम–धम्ममईए विसमा वि गहा समा हुंति ॥ २ ॥

End:—

एयं गाहाकोसं जो पढइ वियड्ढविरइयं लोए ।
सो होइ विउलबुद्धी जणंमि सोहग्गइं लहइ ॥ १५३ ॥ छ ॥

गाहाकोसं सम्मत्तं ॥

(२२) **श्रावकविधि.** गा. २१ प. २३२–२३४
(२३) **दानविधिप्रकरण.** गा. २५ प. २३४–२३६
(२४) **नमस्कारफल** (प्रा.). गा. २५ प. २३६–२३९
(२५) **प्रव्रज्याविधान** (प्रा.). गा. २८ प. २३९–२४१
(२६) **जीवविचार** (प्रा.). गा. ५१ प. २४१–२४६
(२७) **पापप्रतिघात-गुणबीजाधानसूत्र.** प. २४६–२४९
(२८) **गुरुस्तुति.** प. २४९–२५१

[२९] ५७. (१) **पर्युषणाकल्पसूत्र.** प. १–९१; १४½"×२"

[८२] (२) **कालकसूरिकथा** (प्रा.). अपूर्ण प. १५४–१६९

Beginning:—

अणुसरि आगमवयणं सिरिकालयसूरिजगपहाणेहिं ।
पज्जोसवणचउत्थी जह आयरिया तह सुणेह ॥

[८२] (३) **दर्शनसप्तति** (प्रा.). गा. ७१ प. १–६

[२७] (४) **खण्डनखण्डखाद्यटीका** (शिष्यहितैषिणी).
प. ३०४–४५२; १३½"×२"

Beginning:—

ओं नमः सर्वज्ञाय ।

प्रमाण—तदाभासनिरुक्त्या द्वैत—तद्विरोधं परिहृत्याधुना निग्रहनिग्रहस्थानसद्भावेन विरोधं निराचिकीर्षुश्चोद्यमुद्भावयति—नन्विति । हेत्वाभासानां निग्रहस्थानभेदत्वात् तेषु निरस्तेषु परिशिष्टानि प्रतिज्ञाहान्यादीनि बुद्धिस्थानि भवंतीत्यानंतर्यतत्खंडनस्य प्रतिज्ञाहानेस्तावदनिर्वाच्यतामाह का पुनरित्यादिना स्वीकृतत्यागोपसिद्धांते ।

End:—

काशीधराल्लब्धमानत्वेन परब्रह्मचित्तेन साहित्यादिनैपुणेन च प्रणेतुर्निर्दोषत्वप्रसिद्धेः प्रकरणस्य प्रचयगमनमाशास्ते । तांबूलद्वयमिति ।

योब्रूते षट् पदार्थान् षडधिकदशधा भावभेदाभिधायी
यस्ताभ्यां विद्यमाना क्षणविकलगतिः कंटकाभ्यामिवासीत् ।
तावुद्धृत्याद्वितीयश्रुतिरधिकसुखा येन चक्रे **कवींद्रः**
श्रीहर्षोन्वर्थनामा स्वयमपि परमानंदभावं प्रपेदे ॥
ओंकारो वदनांतरालकुहरे सर्वाघविध्वंसको
यस्य ज्ञानमयस्तनोति सततं हेषारवाडंबरं ।
वेदैः कल्पितदिव्यमूर्तिविभवः सांगैस्तुरंगाननः
सोयं मानस—पंकजेषु भवतां कुर्याद्धरिः सन्निधिं ॥
येनोच्चैः परमात्मबोध—तरणेः पंथानमातन्वता
तुंगं मोह—गिरिं निरुध्य चुलुकीचक्रे भवैकार्णवः ।
सच्चेतः—पयसां प्रसत्तिकृदसौ चक्रे **पदं खंडने**
व्योम्नी**वान्व(नु)भवस्वरूप**भगवानव्याजकुंभोद्भवः ॥
इति **शि**ष्यहितैषिण्यां खंडनटीकायां चतुर्थः परिच्छेदः ॥

[३०] (५) **पाण्डवचरित** (सर्ग १–४ अपूर्ण) by **देवप्रभसूरि.**
प. ५४–१३२; १४″×२″

[७१] (६) **षडावश्यकोद्धार.** प. १–८३; ११″×१½″
(क) **सामायिकोद्धार** (प्रा.). गा. ४३ प. १–८
(ख) **चतुर्विंशतिस्तवोद्धार** (प्रा.). प. ८–९
(ग) **वन्दनकस्तवोद्धार** (प्रा.). गा. १९० प. ९–४२.
(घ) **प्रतिक्रमणोद्धार** (प्रा.). प. ४२–४९
(ङ) **कायोत्सर्गोद्धार** (प्रा.). गा. ५५ प. ४९–५८
(च) **प्रत्याख्यानोद्धार** (प्रा.). गा. ७१ प. ५९–८३

(७) पिण्डविशुद्धि. प. ८४–१०१

(८) दशवैकालिक (षड्जीवनिकाध्ययन). प. १०२–१२५

Colophon:—

संवत् १२९३ वर्षे भाद्रवाशुदि १० बुधे पुस्तिकेयं लिखितेति। श्राविकाचांपल-योग्या लिखिता एषा पुस्तिका। उदकानल etc. शुभं भवतु ॥

(९) पर्यन्ताराधना. प. १२६–१३६

(१०) नवतत्त्व. प. १३६–१४०

(११) जीवविभक्ति by जिनचन्द्रगणि. गा. २५ १४०–१४३

(१२) वन्दनालापक. प. १४३–१४५

(१३) पल्योपम-सागरोपमादिप्रकरण. गा. १५ १४५–१४७

Beginning:—

पलिओपमं च तिविहं उद्धारद्धं च खेतपलियं च।
एक्केकं पुण दुविहं बायर–सुहुमं च नायव्वं ॥ १ ॥

(१४) कवच(धर्मोपदेश प्रा.)by जिनचन्द्रसूरि. प. १४७–१६३

Beginning:—

नमिउं जिणवरवीरं धीरिमहेउं खलंतखवगस्स।
धम्मोवएसरूवं कवयं उस्सग्गियं वोच्छं ॥ १ ॥

End:—

इय सुगुरुजिणेसरसूरिसीस–जिणचंदसूरिणा रइयं।
कवयं समुवहंता न भावरिउणो खलिंति मुणिं ॥ १२३ ॥

शुभं भवतु लेखक–पाठकयोः ॥

[२०] (१५) उपदेशमाला (?) प. १–८४

(१६) धर्मोपदेशमाला. प. ८४–९९

(१७) योगशास्त्र (प्रकाश १–४) प. ९९–१६३

(१८) भक्तामर(स्तोत्र). प. १६३–१७३

(१९) श्रावकप्रतिक्रमण. प. १७३–१८३

(२०) प्रव्रज्याविधान. गा. २४ प. १८३–१८५

(२१) नमस्कारफलप्रकरण. गा. २३ प. १८५–१८९

(२२) पार्श्वनाथस्तोत्र. प. १८९–१९१

(२३) अतिचारगाथा. प. १९१–१९२

(२४) प्रभातप्रबोध (निसाविरामे) कुलक. प. १९२–१९६

[३४] ५८. (१) पञ्चसङ्ग्रहटीका by मलयगिरि. प. २६६; १५"×१½"
[३९] (२) सिद्धहेमबृहद्वृत्ति (पञ्चमोऽध्याय). १८३–३१२; १६ ×२"
[३७] (३) सप्ततिकाटीका by मलयगिरि. ग्रं. ३८०० १५½"×१¾".
[३२] (४) परिशिष्टपर्व by हेमाचार्य. प. ३२४; १४"×२"
[५२] (५) सङ्ग्रहणी by हरिभद्र. प. १–४; १०"×२".
(६) जम्बूद्वीपक्षेत्रसमास (नमिऊण) प. ४–१५
(७) लोकनालिका. गा. ३२ प. १५–१९
(८) कर्मस्तवभाष्य. गा. २४ प. १९–२१
अहिणवगहणं बंधो etc.
[५४] (९) धर्मोत्तरटिप्पन (परिच्छेद १–३) by मल्लवादी.
प. ४–८३; १२"×१¾ Much danger.

End:—

यदवाप्तं कुशलं कतिपयपदव्याख्यया कस्य न्यायविंदोर्ग्रंथस्येति श्लोकार्थः ।
इति धर्मोत्तरटिप्पनके श्रीमल्लवाद्याचार्यकृते तृतीयः परिच्छेदः समाप्तः ॥

मंगलं महाश्रीः ॥

Colophon:—

संवत् १२३१ वर्षे भाद्रपदशुदि १२ रवौ अद्येह जंत्रावलिग्रामवास्तव्य० दाहडसुत० चाहडेन धर्मार्थं धर्मोत्तरटिप्पणकं लिखापितं । जंत्रावलिग्रामवास्तव्य पं० प्रभादित्यसुतपं० जोगेस्वरेण पुस्तकं लिखितमिति ॥ यादृशं etc. हितं etc.

[५३] (१०) काव्यमीमांसा by राजशेखर. त्रुटित. प. ५०; १३"×२"
[५२] (११) कल्याणकस्तोत्र. गा. ११ प. १–३; १०"×१¾"

Beginning:—

ओहिनाणमुणियतित्थेसर मणुयत्तणपरिग्गह
जंमि हवंति सयलसुरसंहरि हरिसुद्धसियविग्गह ।
सो गय–वसहपमुहसुमिणावलिसुमुणियसुहसमुब्भओ
जयइ जिणेसराण गब्भागमकल्लाणमहूसओ ॥ १ ॥

(१२) दुःख-सुखविपाककुलक (प्रा.). गा. २७ प. ३–६

Beginning:—

अणवरयकम्म–जललहरिहीरमाणेहिं जंतुनिवहेहिं ।
भीमभवन्नवमज्झे लब्भउ पोउ व मणुयभवो ॥ १ ॥

End:—

इय चउविहज्झाण विवन्निजंतु दुह–सुहविवागसूयगं कुलगं सम्मत्तं ॥

(१३) **कुलक.** गा. ५ प. ६–७

Beginning:—

इयमच्छेरयभूयं पुव्वकयदुक्कडोदया जायं ।

जय जायवाण सुव्वइ वारवइकुलक्खओ पुव्विं ॥ १ ॥

End:—

जो यत्ताणं पाडइ सो अत्ताणं परिपाडिंतो ।

तो संकं कुणइ जणो आणारहिओ जिण–गुरूणं ॥ ५ ॥

(१४) **कन्दजातिकुलक** (?). गा. ६ प. ७–८

Beginning:—

सव्वा य कंदजाई सूरणकंदो य वज्जकंदो य ।

End:—

कंदजाई समत्ता ।

(१५) **सङ्ग्रहणी** (निट्ठविय). गा. ५०० प. १–५३

End:—

जं उद्धियं सुयाओ पुव्वायरियमहव समइए ।

खमियव्वं सुयहरेहिं तहेव सुयदेवयाए उ ॥ ५०० ॥

Colophon:—

वरनागगणिलिखितेयं स्वपठनार्थं कर्म्मक्षयार्थं च । वरनागगणिपुस्तिकेयं ॥

[६५] (१६) **गौडवध** (सटीक). प. ३–२२६; ११$\frac{3}{4}$"×२$\frac{1}{2}$"

End:—

कयरायलंछणस्स वप्पइरायस्स गउडवहं नामेण कहावीढं रइयं चिअ तह समत्तं च । गाथा ११६६

Colophon:—

इति गौडवहनाम महाकाव्यं समाप्तमिति । राजवीसलेन आत्मार्थे लिखितमिति ।

संवत् १२६४ कार्त्तिकशुदि पंचम्यां शुक्रदिने मूलनक्षत्रे धनस्थे चंद्रे लिखितमिति ।

[६८] **५९.** (१) **महावीरचरित** (प्रा.) by **नेमिचन्द्र.** प. २६९; १२"×१$\frac{1}{2}$"

(२) **पर्युषणाकल्पसूत्र.** प. ११६; १३"×२"

(३) **कालकाचार्यकथा.** प. ११६–१२१

Beginning:—

उत्पत्ति-विगम-ध्रौव्यत्रिपदीव्याप्तविष्टपं ।
महेम श्रीमहावीरं निरस्तवृजिनं जिनं ॥ १ ॥

End:—

इति श्रीकालकाचार्याः कृत्वा प्रवचनोन्नतिं ।
यथायुः पालयित्वांतेनशनेन दिवं ययुः ॥ ८७ ॥

कालकाचार्यकथा समाप्ता ।

Colophon:—

सं. १३६४ वर्षे वैशापशुदि अक्षयतृतीयायां सोमे पर्युषणकल्पपुस्तिका लिखापिता ॥

[६१] (४) **हैमसूत्रपाठ** (लिङ्ग-धातु-गणोणादिसहित). प. १९०; १२"×२"

[५५] (५) **सङ्ग्रहणीवृत्ति** by **शालिभद्र.** प. २२–१६३; १२½"×१¾"

[९] **६०.** (१) **सामाचारी.** ग्रंथाग्रं २००० प. ९८; ९½"×१½"

End:—

एयं आयारविहिं जं(जु)जंता नाण-दंसण[सं]जुत्ता ।
अचिरेण लहंति जिया जर-मरणविवज्जियं ठाणं ॥ २ ॥

[१२] (२) **शतपदिका.** प. २४४; १४"×२"

Colophon:—

संवत् १३०० वर्षे जेष्ठशुदि ३ रवौ लिखिता । ग्रंथाग्रं अंकतोपि ५२०० इति शतपदिका ॥

[११] (३) **कर्मस्तवटीका** by **गोविन्दगणि.** प. ७२; ११"×२"

[७] (४) **कल्पसूत्र.** प. १–८५; १३"×२"

(५) **कालकाचार्यकथा** (प्रा.). ग्रं. ४६० प. ८५–१०९

Beginning:—

अत्थि इहेव जंबुद्दीवे etc.

End:—

सूरी वि य कालेणं etc.

(६) **कल्पनिर्युक्ति-चूर्णि** (अपूर्ण). प. ११०–१५१

[१३] (७) **सिद्धहैमवृत्तिविवरण** (टिप्पन). प. २८७; १५"×१¾"

End:—

इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तिविवरणे तृतीयाध्यायस्य द्वितीयः पादः ॥

Colophon:—

संवत् १२८८ वर्षे आषाढवदि अमावास्यादिने भौमे राणकश्रीलावण्यप्रसाद-देवराज्ये वटकूपकवेलाकूले प्रतीहारशाखाप्रतिपत्तौ श्रीमद्देवचंद्रसूरिशिष्येण भुवन-चंद्रेण क्षुल्लकधर्मकीर्त्तिपाठयोग्या व्याकरणटिप्पनकपुस्तिका लिखितेति । पं. सोम-कलसेन शोधिता च । यादृशं etc. शिवतातिरस्तु श्रीजिनशासनस्येति ॥

६१. (१) ओघनिर्युक्ति. प. ९२; १३″×१″

Colophon:—

संवत् ११५४ वैशाखशुक्लप्रतिपदायां रविदिने श्रीअशोकचंद्राचार्यशिष्येण उदय-चंद्रगणिना जिनभद्रलेखकहस्ताद् विमलचंद्रगणिहस्ताच्च ओघनिर्युक्तिसूत्रं लिखा-(खा)पितं मंगलं महाश्रीः ॥

(२) **कथासङ्ग्रह.** प. ३–२०६; १४″×१½″

(अ) अभयश्रीकथा.		गा. २०७	प. १–२७
(आ) धनमित्रकथा.		१५७	प. २७–४७
(इ) जिनपालित-जिनरक्षितकथा		१४६	प. ४७–६६
(ई) धनपालकथा [दाने]		९४	प. ६६–७८
(उ) शाल-महाशालकथा [भावनायाम्]		८५	प. ७८–८९
(ऊ) इलापुत्रकथा	,,	९२	प. ८९–१०१
(ऋ) जयवर्म-विजयवर्मकथा	,,	९४	प. १०१–११३
(ॠ) प्रसन्नचन्द्रकथा	,,	११७	प. ११३–१२८
(ऌ) विष्णुकुमारकथा [तपसि]		८४	प. १२८–१३८
(ॡ) दत्त-शाङ्खायनकथा [अदत्तव्रते]			प. १३८–१४९
(ए) सुबन्धुकथा [दिग्व्रते]		८६	प. १४९–१६२
(ऐ) आषाढभूतिकथा [मायायाम्]		८६	प. १६२–१७४
(ओ) कपिलकेवलिकथा		६३	प. १७४–१८२
(औ) नागदत्तमुनिकथा.		५७	प. १८२–१९०
(अं) अरहन्नककथा.		८३	प. १९०–१९८
(अः) अचंकारिभट्टाकथा.			प. १९८–२०६

[४५] (३) **प्रशमरति.** प. १–३०; ११″×२″

(४) **चउसरण.** गा. २७ प. ३०–३३

(५) **सङ्ग्रहणी** by **जिनभद्र.** गा. ३६७ प. १–४६

[४७] (६) **कल्पसूत्र.** प. ५३–११०

(७) **कालकाचार्यकथा.** Illustrated प. १११–१४३; १३″×२″

End:—

सूरी चिय कालेणं etc. **कालिकाचार्यकथानकं समाप्तं ग्रं. ३७६**

Pras'asti of the Donor:—

ऊकेशवंशे भुवनाभिरामे छायासमाश्वासितसत्त्वसार्थो ।
श्रीराणकीयास्ति विशालशाखा साकारपत्रावलीराजमाना ॥
तत्राभवद् भवभयच्छिदुरार्हदंघ्रिराजीवजीवितसदाशयराजहंसः ।
पूर्वः पुमान् गणहरिर्गणधारिसार.................................

[कनी]यान् **थिरदेवस्य हरिदेवो**स्ति बांधवः ।
हर्षदेवीभवाः पुत्रा **नरसिंहा**दयोस्य च ॥
सहोदर्यः सप्तैत(?)स्य **लष्मिणि**र्धर्मकर्मठा ।
कर्मिणि हरिसणिश्च पुत्र्यस्तिस्रो **गुणश्रियः** ॥ १६ ॥
गुणधरस्य यो भ्राता कनिष्ठो **धंधुका**भिधः ।
षेढानामास्ति तत्पुत्रः पवित्रगुणसंततिः ॥ १७ ॥

अथ गुरुक्रमः ।

श्री**राजगच्छ**मुकुटोपम**शील**भद्रसूरेर्विनेयतिलकः किल **धर्म्मसूरिः** ।
दुर्वादिगर्वभरसिंधुरसिंहनादः श्री**विग्रह**क्षितिपतेर्दलितप्रमादः ॥

आनंदसूरिशिष्यश्री**अमरप्रभ**सूरितः ।
श्रुत्वोपदेशं **कल्प**स्य पुस्तिकां नूतनामिमां ॥ १९ ॥
उद्यमात् **सोमसिंह**स्य सपुण्यपुण्यहेतवे ।
अलेखयच्छुभालेखां निजमातु**र्गुणश्रियः** ॥ २० ॥

यावच्चिरं धर्म्मधराधिराजः सेवाकृतां सुकृतिनां वितनोति लक्ष्मीं ।
मुनींद्रवृंदैरिह वाच्यमाना तावन्मुदं यच्छतु पुस्तिकेयं ॥ २१ ॥

Colophon:—

संवत् १३४४ वर्षे मार्ग. शुदि रवौ **सोमसिंहेन** लिखापिता ।

[४६] (१) **पर्युषणाकल्पसूत्र.** प. १०७; १४½″×२″

(२) **कालकाचार्यकथा.** प. १०७–१४४

Beginning:—

अत्थि इहेव **जंबुदीवे** etc.

End:—

कालिकाचार्यकथानकं समाप्तं ॥ छ ॥ ग्रंथाग्रं कथानिकायाः । मंगलं महाश्रीः ॥

Pras'asti of the Donor:—

६० ॥ वंशः प्राग्वाटनामास्ति सर्ववंशशिरोमणिः ।
यो जातश्चोत्त(श्चित्र)माधारो महतामपि भूभृतां ॥ १ ॥
